NĀGARĪ No 3 Material relating [to] worship of BĀLĀ (TRIPURĀSUNDARĪ) + some DVAITA VED[Ā]NTA, paper - wooden boards

3A ff 1v-89v anonym. commentary (VIVR[Ṇ]AYA) on ĀNANDATĪRTHA's VIṢṆUTATTVA (incomplete)

3B1 ff 1v-21v MAHĪDHARA's BĀLĀPAṬA[L]A (?)

3B2 ff 21v-261R ŚRĪ TRIPURĀ BĀLĀ [P]ADDHATI OF ŚIVARĀMA

3B3 ff 261R-267R BĀLĀKAVACA att[r]ib. to RUDRAYĀMALA (dated samvat 1895, śaka 1759)

3C ff 1v-100v ŚRĪ SUNDARĪ SĀR[Ū]PYA SAHASRANĀMA STOTRA
edited (! यथामति संशोधितं) by SAKHĀRĀMAŚARMAN
dated (f. 100v line 5) s[a]mvat 1898 (?)

PHOTOGRAPHED JAN 2019

NĀGARĪ No 3   Meterial releting to worship of BĀLĀ (TRIPURĀSUNDARĪ) + some DVAITA VEDĀNTA, paper - wooden boards

3A ff 1^v-89^v anonym. commentery (VIVIRṆAYA) on ĀNANDATĪRTHA's VIṢṆUTATTVA (incomplete)

3B1 ff 1^v-21^v MAHĪDHARA's BĀLĀPAṬALA (?)

3B2 ff 21^v-261^R ŚRĪ TRIPURĀ BĀLĀ PADDHATI OF ŚIVARĀMA

3B3 ff 261^R-267^R BĀLĀKAVACA attrib. to RUDRAYĀMALA (dated samvat 1895, śaka 1759)

3C ff 1^v-100^v ŚRĪ SUNDARĪ SĀRŪPYA SAHASRANĀMA STOTRA edited (! यथामति संशोह्यितं) by SAKHĀRĀMAŚARMAN dated (f. 100^v line 5) samvat 1898 (?)

PHOTOGRAPHED JAN 2019

Digitized by Sarayu Trust and eGangotri. Equipment Heritage Foundation, Jalgaon

Public Domain

NĀGARĪ No (3) Material relating to worship of BĀLĀ (TRIRURASUNDARĪ) + some DVAITA VEDĀNTA

3A ff 1^v-89^v anon commentary (VINIRṆAYA) ON ĀNANDATĪRTHA'S VIṢṆUTATTVA (incomplete)

3B1 ff 1^v-21^v MAHĪDHARA'S BĀLĀPAṬALA (?)

3B2 ff 21^v-261^R ŚRĪ TRIPURĀ BĀLĀPADDHATI OF ŚIVARĀMA

3B3 ff. 261^R-267^R BĀLĀKAVACA attrib. to RUDRAYĀMALA (dated Samvat 1895, Śaka 1759)

3C ff. 1^v-100^v ŚRĪ SUNDARĪ SĀRŪPYA SAHASRANĀMA STOTRA

edited (! यथामति संशोधितं) by Sakhārāma śarman

dated (f. 100^v line 5) Samvat 1898 (?)

NĀGARĪ No. 3 ~~BĀLĀ~~ MATERIAL RELATING TO WORSHIP OF BĀLĀ (TRIPURASUNDARĪ) + SOME DVAITA VEDĀNTA

3A ff. 1v–89v aaoa commentary (VINIRṆAYA) ON ĀNANDATĪRTHA'S VIṢṆUTATTVA (incomplete)

3B1 ff. 1v–21v MAHĪDHARA'S BĀLĀPAṬALA (?)

3B2 ff. 21v–261R ŚRĪ TRIPURĀBĀLĀPADDHATI OF ŚIVARĀMA

3B3 ff. 261R–267R BĀLĀKAVACA attrib. to RUDRAYĀMALA (dated Samvat 1895, Śaka 1759)

3C ff. 1v–100v ŚRĪ SUNDARĪ SĀRŪPYA SAHASRANĀMASTOTRA edited (! यथामति संशोधितं) by Sakhārāmaśarman dated (f. 100v line 5) Samvat 1898 (?)

सो

१ श्रीवेदव्यासायनमः ॥ ॥विश्वस्योदयमातनोति तदनुत्राणंविधत्ते पुनर्ध्वान्तीनरहानिसाधनमलं
वक्ति श्रीतीर्थजिज्ञयन्नू स्वापवर्गंनयति श्रमापहंतये कृत्यावसानेनयस्तं देवंपितरंपतिंगुरुतमं
वंदेरमावल्लभं ॥१॥ लसत्तु श्रीमदानंदतीर्थेंदुर्नोहृदंबरे । यद्वचश्चंद्रिकास्वांतसंतापवि
निहंतति ।२। पूर्ववाक्यप्रमाणज्ञान्नुप्रणम्य शिरसागुरून् । व्याकरिष्येयथाबोधंवि
ष्णुतत्त्वविनिर्णयं ।३। विघ्नविघातादिसाधनतया अविगीतशिष्टाचारपरंपराधिगतं
नारायणवंदनंस्वयमनुष्ठायविधुरोऽपि भगवानानंदतीर्थमुनिः शिष्यान्ग्राहयितुंप्रक
रणादौनिबध्नाति । सदागमैकविज्ञेयमिति । सदावंदइत्यनेन ममनारायणवंदनेनप्रत्यूहवि
रहादिप्रयोजनोद्देशोनेतिसूचयति । नानिर्धारितस्वरूपस्यवंदनंयुक्तंनचलक्षणेनविना
निर्धारणमित्यतोनारायणलक्षणमाह । निर्दोषेति । निर्दोषश्चासावशेषसद्गुणश्चेतिविग्र १
हः । अत्रनिर्दोषग्रहणेनपारतंत्र्यराहित्यादीनि । अशेषसद्गुणमित्यनेनपरिपूर्णानंदत्वादीनि

वानंतानि लक्षणानि संचितानि । तदयमिवाशेषस्योक्तं । दुःखादीनामपि गुणत्वेन व्यवहारा
त्सदित्युक्तं । अथवा सत्यादिराहित्यं गुणानां सत्त्वेनावष्टे । एतल्लक्षणासंभावनार्थमुक्तं स
मतीतेति । क्षराक्षरपदाभ्यां जडमप्युपलक्ष्यते । समगनीते अतिक्रांते क्षराक्षरे येनासौ
तथोक्तः । जडजीवप्रकृतीभ्योत्यंतविलक्षणः । एतल्लक्षणयोरनुयासंभावनयान्वितो नारा
यणः कुतः प्रतिपन्न इत्यत उक्तं । आगमविज्ञेयमिति । आगमैर्विशिष्टतयाविलक्षणात
यावसेय । प्रत्यक्षानुमानाभ्यामन्यथाविज्ञायत इत्यत उक्तं एकेति । आगमानपेक्षस्य
प्रत्यक्षादेर्नारायणस्य सदोषत्वाद्धि प्रवृत्त्यनुपपत्तेः । तदपेक्षायां उपजीव्यविरोधेन न तस्य
तत्र प्रामाण्यमिति भावः । तथापि पाशुपतादागमैरन्यथाज्ञायत इत्यत उक्तं सदिति । अयोग्यज
नव्यामोहनाय प्रणीतानां तेषां दुरागमत्वान्न तदुक्तप्रकारेण ज्ञेयः । दोषैकदूरपुरोभागी हा
दैकमयीत्यादिप्रयोगदर्शनात् । सख्यार्थस्यैवैकशब्दस्य पूर्वकालिकेति पूर्वनिपातो न केव

२ लार्थस्य । अनेकवर्षाणि गृहीत्वा गामिव नागमो नारायणं गमयति किंतु लक्षणमुखेनैव । लक्षणम
पिना प्रमितलक्ष्यनिर्धारणस्येष्टेः । सतितेथापि प्रमाणप्रतीत्यसंभावनया पापीयते । यथादेवगवा
ग नामुक्तानानीवहनं । अत्रेयुपतत् अणुत्वमहत्वादीनां असंभावनया ऽपवादो माशंकीति लक्षणसं
भावेनाप्रमाणानां त्रयाणामपि कथनं युक्तं । प्रामाणिकत्वाच्चास्य । एतदेव नाननीनामपि यावि॒की
र्षितासमाप्तिः सा भक्त्यादिवेगुण्यादिनिमित्ता । यातु कृतवेदनानामपि समाप्तिः सादृष्टान्तराय
नेतिकल्प्यते । श्रेयांसि बहुविघ्नानीति विघ्नानां संभावितत्वात् । पाक्षिकस्यापि दोषस्य परिहार्य
त्वात् तन्निरासार्थः प्रयत्नो युक्त एव । स्यादेतत् । प्रकरणमेवेदं नारंभणीयं । विषयप्रयोजनसंबंध
शून्यत्वात् । प्रतीतघटस्वरूपप्रतिपादकवत् । काकदंतपरीक्षाग्रंथवच्च । सहि शास्त्रस्य विषयो भव
तियोऽज्ञातः संदिग्धो विपर्यस्तो वा अस्य च विषयत्वेनाभिमतो नारायणः सर्वस्य न तथा । नहि नारा
यणपदं अनर्थकं कोप्यंगीकरोति । नाप्यस्य प्रकरणस्य प्रयोजनमस्ति । ऐहिकपारत्रिकयोरुष्या २
दिगादिसाधनांतरसाध्यत्वात् । एतेन संबंधाभावाच्च । मोक्षस्यापि कर्मसाध्यत्वात् । एतत्संबंधाभा
ग्या वाच्च । सकलैहिकपारत्रिकभोगात्मकस्य तस्यापुरुषार्थत्वेन निरधिकारित्वापत्तेश्च सतत्ता । विशेषणा
वोच्च । सकलैहिकपारत्रिकभोगात्मकस्य

नीति। लक्षणत्वेन निर्दोषत्वमशेषसद्गुणत्वं यथाकामधेनुप्रभृतीनां लोकविलक्षणत्वात् प्रा
सादोद्धरणादिकं नासंभवि तथा भगवतोपीति प्रदर्शनाय सर्वतोप्यतिविलक्षणत्वं तत्र प्रमा
णाकांक्षायां वेदादिवेद्यत्वं तस्य विरोधपरिहाराय दुरागमाद्यवेद्यत्वमिति यानि हाद्यपद्येना
नारायणविशेषणानि कथितानि तान्येवेह ग्रंथे साधयिष्यामि। तत्त्वसंक्ते त्वन्यत्र। ननु स्वरू
पमात्रं प्रतन्नद्विशेषणवति च नारायणे संबंधो ज्ञानसंदेहविप्रतिपत्त्य इत्यनेन विषयो दर्शितः।
प्रकरणस्य विषयेण सह प्रतिपाद्यप्रतिपादकभावलक्षणः संबंधश्चोक्तः। स तु न युक्तः। सा
धकप्रमाणाभावात्। न तावदनुमानादिना सदागमैकविज्ञेयत्वादिविशिष्टतया नारायणः साध
यितुं शक्यते। स्ववचनविरोधात्। नापि वेदादिभिः सदागमैः। तत्र प्रामाण्यमनभ्युपगच्छतः सौग
तादीन्नादीन् प्रति तदुपन्यासायोगादित्यत उक्तं सद्युक्तिभिरिति। सदागमैस्तत्प्रामाण्यं च सा
धयिष्यामीति भावः। अथवा सत्यो वेदाद्या उक्ता योनुग्राहिका येषामनुमानादीनां तानि सद्यु
क्तीनि तैरपि। सदागमैकविज्ञेयमिति वेदादिविरुद्धानुमानाद्यवेद्यत्वमेवोक्तमिति हृदयं।

३०८।०

२ क्रमादिति मदानीम नः समाधानायोक्तं । अन्यथा कुत्रचित्साधितमिति मदाद्याकुलास्युः । निर्दिष्टक्र
मस्यात्र विवक्षितो न त्वाकांक्षाक्रमः । सविद इति प्रयोजनाभिधानं । ननु न खलु तावदर्थस्तं विन्मात्रं प्रयो
जनं । सुखदुःखावाप्तिहान्योरन्यतरत्वाभावात् । काकदन्तपरीक्षावदसाधारण्या श्रेयस्तदुक्तं स
ज्जनेति । सन्ति हि तथाविधाः पुरुषा येषां न सुखादिकमपि प्रार्थ्यं किंतु परमेष्ठस्य नारायणस्य
संविदेव । तान्प्रतीदसाधनमुपपद्यते । नहि सर्वाधिकारिकं किमपि शास्त्रमस्ति । अथवा संविच्छब्दे
न तत्साध्यो मोक्षो पलक्ष्यते । मोक्षस्य कर्मसाध्यत्वं निराकर्तुं प्रकरणस्य प्रयोजनेन संबंधमुप
पादयितुं च लाक्षणिकप्रयोगः । एवं तर्हि निरधिकारिकत्वमित्यत उक्तं सज्जनेति । ये खलु सात्वि
कप्रकृतयो धीनसो गाम्नायाः शमादिसंपन्ना नित्यानित्यवस्तुविवेकवन्तो खिलसांसारिकभोगे
भ्यो विरक्ता मुमुक्षवो भगवत्संविदेकसाध्यत्वान्मोक्षस्य तामेवार्थयन्ते तेषां संविदे । तस्मादि
दं प्रयोजनसंबंधाधिकारिसंपन्नत्वादारंभणीयं प्रकरणमिति स्थितं । क्रमादिति सदागमे ३
ष्वि [illegible] ते चस्य प्रथमप्रतिपाद्यत्वं प्रतिज्ञातं । सदुक्तिभिरिति चोक्तं । ननु कस्ता नारायणस्य सदा

गमैकवेद्यत्वं प्रतिपादयंस्तः सदुक्तयइत्यत आह । ऋगाद्या इति । ऋग्यजुःसामाथर्वसंज्ञका वेदाः । वाथ
शब्दाः परस्परसमुच्चये । एवशब्दयोरुक्तत एव सदागमास्तदन्ये ये ते सर्वे दुरागमा एवेति वा तेनैव विज्ञे
यरतेरेवज्ञेय इति वा सम्बन्धः । पञ्चरात्रागमानां जीवजननादिवादिनां केषांचिदंशानामप्रामाण्य
कं विद्य वक्षते तन्निरासार्थमखिलमित्युक्तं । एतदात्मकमृगाद्यनुकूलं । एषामृगादीनामनुयायि
नोनुकूला ग्रंथा मानवाद्याः तुशब्दो विशेषणार्थः । तदन्ये तद्बहिरुद्भास्ते दुरासीनाम्ना । कथं तर्हि वैशेषि
कादिभिरुक्तविशेषणो न ज्ञायत इत्यत आह । सदायुक्तैरिति । वेदाद्यर्थविचारे सदाभियोगयुक्तैः ।
ना८ वाक्यार्थो हि विशाभियोगएव स्फुरति । न च वैशेषिकादयो वेदाद्यर्थविचारेऽभियुक्ताः । तर्हि मीमांसकैः
किं न ज्ञायत इत्यत उक्तं । भक्तिमद्भिरिति । यादृग्यादरवांस्तस्यैव तदुक्तविधमानमपि स्फुरति । न त
नादरवतोन्यवादरवतश्चेत्यनुभवसिद्धं । न च तथा मीमांसकाः । भक्तिरपि न कापि वि क्ते वेदाद्यर्थे
भगवज्ज्ञानोपयोगित्वेनोक्तैः सुनिष्ठितैरिति । एतैरेवेत्यस्य दुरागमा इव व्यावर्त्यं इतरमप्यस्तीत्याह ॥
नचेति । केवलो वेदाद्यनुकूल्यरहितः । तर्कशब्देन दूषणानुमानं व्यावर्त्तितं । तदितरानुमानव्यावर्त्य
र्थमाह । न केनचिदिति । अथवा तर्कशब्देनानुमानमेवोक्तं । कुतु पाण्डववत्सामान्यविशेषभावमाश्रित्य

वि० टी०

४

थपिस्मादित्यादस्यार्थमिदमुक्तं। यद्वा केनचित्सदाद्युक्तत्वादिरहितेन पुरुषेण। केवलेति सर्वस्योपसंहा
रः। केवलग्रहणेन दूरागमादिनिरासः। आगमेति सदागमग्रहणं। भक्तैः सदायुक्तैः सुनिष्ठितैश्च।
ब्रह्माण्डपुराणे कथितमिति शेषः। नावेदवित्यादौ वेदशब्देन सर्वोपि सदागमो गृह्यते। सर्वमनुभ
वतीति सर्वानुभूः। आत्मानं परमात्मानं। सोपराधो मोक्षस्तदर्थं अतिर्वक्तीति शेषः। आ अपेति विरु
द्धार्थयोरुपसर्गयोः क्रमेण संबंधः। एषा परमात्मविषया मतिः शुष्कतर्केणानेयोत्पाद्यापनया
निराकार्या न भवति। किंतु। अन्येन जीवेश्वरादिभेदज्ञानिना भगवद्भक्त्यादिमतेति यावत्।
आचार्येण प्रोक्ता वेदप्रवचनेनेत्यादितैव सुज्ञानाय साक्षात्काराय भवति। प्रेष्ठेति नचिकेतसं
प्रति यमस्य संबुद्धिः। एतं परमात्मानं। तस्मादिदं न करणत्वे समानेपि असाधारण्येन व्यपदेशा
भवतीति न्यायाद्विशिष्टवस्तुवेदकत्वाद्वेदवद्धेतान्वेदा इत्याहुः। विवक्षितस्य सर्वस्याप्यर्थस्य प्रतिपा
दनात्पुराणवाक्यमादौ पठितं। अतएवैकदेशप्रतिपादनात्सच्छास्त्रादिति। अत्राहुः। यदनृतं तदप्र ४
माणं दृष्टं यथोन्मत्तवाक्यं। अनृतं च पुत्रकामः पुत्रेष्ट्याय यजेतेत्यादि वेदवाक्यं। ~~मात्स्यात्तरी स्तस्य~~

कृतायामपीष्टौ पुत्रजन्मानुपलम्भात् । एवं मदत्रवीदित्यादि । अनुमानविरुद्धत्वात् । स्वव्याहतत्वाप्रमाणे दृष्टं ।
स्वव्याहतं यथोदिते होतव्यमनुदिते होतव्यमित्यादि । पुनरुक्तं च वेदवाक्यं । शाखांतरोक्तस्य शाखांतरे भिधानात् ।
एकस्यामपि शाखायां वाक्यांतरे निर्दर्शनात् । त्रिः प्रथमामन्वाह त्रिरुत्तमामिति स्वयमेव विधानाच्च । निरर्थकं
वा प्रमाणं । निरर्थकं च सत्पुण्ये वेत्यादि कं । प्रमाणांतरसिद्धार्थं वा प्रमाणं । तथा विधं वा अग्निर्हिमस्य भेषजमित्यादि
वेदवाक्यं । एवं पुराणेप्यनृतत्वादीनि द्रष्टव्यानि । एतद्दृष्टांतेन शेषस्यापि वेदादिभागस्याप्रामाण्यमनुमातव्यं ।
किंच । संवादरहितं विप्रलंभकादिवाक्यमप्रमाणं । तथाविधं च वेदादिकं । एवं वेदपुराणयोरप्रामाण्यात्तदंत
र्गतानामुदाहृतवाक्यानामप्यप्रामाण्यमेव । एतेषां वचनानामेवाप्रामाण्ये सति कथमेतद्बलाद्विष्णोः सदा
गमैकविज्ञेयत्वसिद्धिः । एवमेव वेदादिसिद्धिर्निर्दोषत्वादिसिद्धेरपि परास्तेत्यत आह । नचैतेषामिति । चशब्दः स
मुच्चये । एतदाशंकापरिहारसमुचितस्येवोदाहृतप्रमाणस्याविवक्षितसाधकत्वात् । एवमुत्तरत्रापि बोध्यं ।
अयमभिप्रायः । किमिदमनृतत्वं । अर्थशून्यत्वमिति चेत् । नन्वेतदेवाप्रामाण्यमिति साध्याविशिष्टतास्यात् । प्र
माणांतरविसंवादोनृतत्वमिति चेत् । सकिमापाततः सर्वथा वा । नाद्यः । तस्य सर्वत्र संभवेनानैकांत्यात् । न द्वितीयः ।
संदिग्धासिद्धेः । किमत्र सर्वथाप्रमाणविसंवाद एव । उत वै गुण्यादिनिमित्तफलादर्शनादिकमिति संदेहापरि

हारात् । व्याघाते नापि द्वयोरप्यप्रामाण्यं साध्यमुतान्यतरस्य । नाद्यः । अन्यतरप्रामाण्येपि व्याघातसंभवेन संदिग्ध
कालातीतत्वस्यानैकान्तिकत्वस्य चापातात् । द्वितीये पक्षीकृतस्यैव प्रामाण्यसंभवेन संदिग्धबाधानिस्तारात् ।
किं च व्याघातोप्यापाततः सर्वथा वा । नाद्यो नैकान्त्यात् । द्वितीये संदिग्धासिद्धिः । किमत्र सर्वथा व्याघात एवो
ताधिकार्थादिभेदेन व्यवस्थेति संदेहानिस्तारात् । पौनरुक्त्यं तु प्रमाणसंप्लवे व्यभिचारादप्रामाण्यस्य सा
धकं न भवति । वैयर्थ्यं तु कथं विसाधयेत् । तदपि नास्ति । किमिदं पुनरुक्तमेवोताधिकविवक्षादिनानुवादादि
रूपमिति संदिग्धत्वात् । एतेन प्रमाणान्तरसिद्धार्थत्वमपि निरस्तं । नैरर्थक्यमप्यापाततश्छेदनैकान्तिकं । स
र्वथा तु संदिग्धं । किमत्र शक्तितात्पर्यापरिज्ञानादर्थाप्रतिपत्तिरुत सर्वथा नैरर्थक्यादिति संदेहात् । संवादराहि
त्यं च भागासिद्धं । अग्निर्हिमस्य भेषजमित्यादेः संवाददर्शनात् । किमयथार्थत्वादेव संवादोत्र नास्ति । उत तस्यार्थस्य तदे
कप्रमाणकत्वादित्यन्यथासिद्धिसंदेहाच्च नाप्रामाण्यमिति । अस्त्वेवं हेतुनासंदिग्धासिद्धादिना वेदाप्रामाण्यानि
श्चयः । तथापि तत्संदेहोस्त्येव । वैगुण्यादिनिमित्तत्वादेरनिश्चितत्वात् । तथा च भवतोभिमतसिद्धये वेदपुराण ५
वचनोदाहरणमयुक्तमित्यत आह । अपौरुषेयत्वादिति । वचनानामिति प्रकृतत्वेपि वेदस्येति पुनर्वचनं पुराणवचनस्या
पि प्रकृतत्वात्तस्यापि पक्षीकारे भागासिद्धिप्रसंगात्तत्परिहारेण तावदत्र वेदस्यैव पक्षीकरणज्ञापनार्थं । इदमुक्तं भ

वति। करणानामप्रामाण्यं खल्वबोधकत्वं विपरीतबोधकत्वं वा। तत्र शब्दस्याबोधकत्वं द्वेधा। पदानामभिमतानां निरभिधे
यत्वेन साभिधेयत्वेऽप्यन्वयाभावेन वेति। विपरीतबोधकत्वं तु विपरीतान्वयेन। तदिदं सर्वं तत्र वक्तृपुरुषदोषाधी
नं। ननु स्वभाववद्दृष्टस्य प्रामाण्यस्य परतन्त्रत्वं कस्मात् कारयतो वक्ष्यामः। पुरुषो ह्यज्ञानाद्विपरीतज्ञानात् प्रमादादपटु
करणत्वाद्वा निरभिधेयान्निरन्वयान्वा शब्दान्प्रयुङ्क्ते। प्रमादात्करणापटुत्वाद्विपरीतज्ञानाद्विप्रलम्भकत्वा
द्वा विपरीतान्वयान्। एतदभावश्च द्वेधा संभवति। अपौरुषेयत्वेन वा वक्तुराप्तत्वेन वा। विवक्षितार्थतत्त्वज्ञा
नादेराप्तिशब्दार्थत्वात्। तत्र वेदस्यापौरुषेयत्वेन पुरुषदोषनिबन्धनदोषाभावात्कारणाभावे च कार्यस्याश
कितुमशक्यत्वादप्रामाण्याभावो निश्चीयते। वेदानां प्रमाणेऽप्रामाण्यकारणदोषशून्यत्वात्प्रत्यक्षादिवत्।
शब्ददोषाश्च पुरुषदोषाधीनास्तदन्वयव्यतिरेकानुविधायित्वात्। यद्यदन्वयव्यतिरेकानुविधायी तत्तदधीनं
यथा पटस्तन्त्वधीनः। वेदो न पुरुषदोषनिबन्धदोषवान् पुरुषाप्रणीतत्वात्। यद्येनाप्रणीतं वाक्यं न तत्तद्दोषप्रयु
क्तदोषवत्। यथा यज्ञदत्ताप्रयुक्तं न यज्ञदत्तदोषप्रयुक्तदोषवदिति। विपक्षे तु कारणं कार्योत्पत्तिप्रसङ्गः। तथा
वान्तरत्वोदयः प्राग्प्रामाण्याभावनिश्चयात्संदिग्धासिद्धा निश्चिते तु प्रामाण्याभावनिश्चिततासिद्धा एव भवति। एव
मप्रामाण्यस्याभावे निश्चितेऽपि प्रामाण्यनिश्चयः कुत इति चेत्। अपौरुषेयत्वेन तन्निबन्धनाबोधकत्वविपरीतबोधक

वि॰टी॰

६

त्वज्ञन्यत्वादिति ब्रूमः। वेदो प्रमाणमाप्ताप्रणीतवाक्यत्वादुन्मत्तप्रणीतवाक्यवदिति चेत्। नावाक्यत्वावच्छिन्नेसाध्येना
प्तप्रणीतत्वस्य केवलत्वेनाप्रामाण्यकारणदोषवत्त्वस्योपाधित्वात्। वेदेचोपाधिद्वयाभावस्योक्तत्वात्। वाक्यप्रामाण्य
स्य वक्तृराप्तिमत्त्वेन तदभावे कारणकार्यत्वानिःस्यादिति नु प्रामाण्यस्य स्वतस्त्वप्रतिपादनेन निराकरिष्यते। आ
प्तोक्तत्वेनाप्रामाण्याभावप्रामाण्ययोर्निश्चयः किं न क्रियत इति चेत्। यथा न शक्यते तत्तथा वक्ष्यते। महाजनपरिग्र
हीतत्वात्प्रामाण्यादिनिश्चयोस्तु किमनेनापौरुषेयत्वकूटेनेति चेत्। किं महत्त्वं जनसंख्याप्रकर्षोभिधीयते पूज्यता वा।
नाद्यः। जनानामियत्तापरिज्ञानस्याशक्यत्वेन संदिग्धासिद्धत्वात्। देशादिविशेषे बौद्धादीनां महाजनपरिगृहीतत्वे
नानैकान्त्याच्च। न द्वितीयः। वेदपरिग्रहवतां पूज्यत्वस्य परैरनंगीकृतत्वात्। स्वशास्त्रपरिगृहीतॄणां तु सर्वांगीक
तत्वाच्चेति। अस्त्वेवं वेदस्यापौरुषेयत्वेनाप्रामाण्यकारणदोषाभावादप्रामाण्याभावनिश्चयः प्रामाण्यनिश्चयश्च। तत
एवं फलविसंवादादेरवश्यं वैगुण्यादिनिमित्तत्वस्य कल्पनीयत्वेन परोक्तहेतूनामसिद्धत्वनिश्चयोपि पुराणवाक्य ६
स्यानुकथ। न हि तदप्यपौरुषेयतयांगीक्रियते। तथात्वे वा पूर्ववाक्ये वेदस्येति नोच्येत यत आह। इतिहासेति। इति
हासश्च पुराणं चेति द्वंद्वैकवद्भावः। नपुंसकत्वं नाश्रितं। पुराणशब्दस्य विशेष्यलिंगत्वात्। अथ विशेषणत्वेन पुंलिंगत्वमेवाश्रि
तं। इतिहासपुराणौ वेदो वेदानां मन्त्रादीनां पञ्चमः। पञ्चत्वसंख्यापूरणो वेद इति। तेनाप्रामाण्यशंकाशून्यत्वेन प्रमा

णतया निश्चिते न वेदे न वेदसमानतया गृहीतयोः पुराणवचनस्याप्रामाण्याभावादिनिश्चयाद्युक्तं तदुदाहरण
मिति। अत्रैव यद्यपि सामान्येनोक्तं तथापि प्रमाणान्तरबलादेतदनुकूलयोरेवेतिहासपुराणयोर्ग्रहणमिति ज्ञातव्यं। न
न्वाप्तोक्तत्वेनैव पुराणस्याप्रामाण्याभावादिनिश्चयः किं न क्रियत इति चेन्न। आप्तत्वनिश्चयस्याप्यंततो वेदा
नुसरणमंतरेणाशक्यत्वात्। एतेन वेदादिभिर्विरुद्धानि दोषत्वादिसिद्धिरपि समाहिता। आहुः वेदप्रामाण्य
वादिनो बाह्याश्च। वेदस्यापौरुषेयत्वमयुक्तं। घटत्वनीरूपत्वयोरिव वाक्यत्वापौरुषेयत्वयोः परस्परपरिहारे
णैव स्वरूपलब्धेर्द्वयोरेकत्रासंभवित्वात्। न च तत्साधनमपि युक्तं। संभावितस्यैव साधनार्हत्वात्। तथो
क्तं। संभावितः प्रतिज्ञायाः पक्षः साध्येत हेतुना। न तस्य हेतुभिस्त्राणमुत्पतन्नेव यो हत इति। नहि
ममकर्णौ प्रविश्य गजो गर्जतीत्येतत्साधनार्हं। किं त्वनादरणीयमेवेत्यत आह। नयेति। अपौरुषेयं वाक्य
मेव नास्तीत्यनेन वाक्यत्वापौरुषेयत्वयोः परस्परपरिहारेणैव स्थितिरित्युक्तं। ततो वेदोऽपौरुषेय इत्येत
दसंभावितमेवेति वाक्यशेषः। इतः परापौरुषेयत्वं वस्त्वत एवेत्यतः प्राक्तनो ग्रंथः संभावनार्थः। कुतो न वाच्यमि
त्यत आह। तदभाव इति। धर्मादिकं तावदतींद्रियं वस्तु सर्वसमयानामभिमतं। ततस्तत्तत्समयसिद्धिः प्रामाण्यैक

त्वेन तदङ्गीकरणीय। प्रामाणिकत्वाभ्युपगमस्यैवार्थस्य शास्त्रसिद्धान्तत्वात्। न चापौरुषेयवाक्यं विना धर्मा
दिसाधकं प्रमाणमस्ति। अतोऽपौरुषेयवाक्याभावे धर्माद्यसिद्धिप्रसङ्गाद् प्रामाणिकस्य सर्वशास्त्राभिमतत्वा
योगात् सर्वैः समयिभिर्धर्मादिनिश्चयार्थं किमप्यपौरुषेयं वाक्यमङ्गीकार्यं। न तच्च वाक्यं चापौरुषेयं दृष्टं तद्
सम्भावितमिति। येषां वैनाशिकानां बौद्धादीनां चातीन्द्रियधर्मादिकं वस्त्वभिमतं तान्प्रत्यपौरुषेय
यवाक्याभ्युपगमः। यस्य तु लोकायतस्य धर्माद्यभिमानो नास्ति न तं प्रत्यापादनं युक्तं। तस्य स्वाभिमतप्रमेयस्य प्र
त्यक्षेणैव सिद्धेर्नातीन्द्रियस्याङ्गीकृतत्वेनापादकाभावात्। तथा च लोकायतं प्रति नासम्भावनापरिहारोऽस्तीत्या
शङ्क्य तेनापि धर्माद्यभ्युपगमं कारयित्वा तत्साधकापौरुषेयवाक्यमप्यङ्गीकारयिष्यामीत्याशयवानाह। यस्ये
ति। ननु कर्तृकरणयोस्तृतीयेति प्राप्तां तृतीयां बाधित्वा कर्तृकर्मणोः कृतीति प्राप्तायाः षष्ठ्या न लोकाव्य
यनिष्ठेति पुनः प्रतिषेधे तृतीययैव भवितव्यं देवदत्तेन भुक्तमिति यथा। यस्येति तु कथं उच्यते। अभिमतावि
ति बुद्धिपूजार्थस्य मतेर्वर्त्तमाने क्तः। क्तस्य च वर्त्तमाने इति प्रतिषेधबाधकत्वेन षष्ठीविधानात्सैवात्र युक्ता।
देवदत्तस्येष्टमिति यथेति। तौ धर्माधर्मौ अतीन्द्रियोपलक्षणं चैतत्। नासौ समयी स्यादिति शेषः। धर्मादिकं मन
ङ्गीकारिणो नास्तिकत्वापत्तिः कुत इत्यत आह। समयेति। प्रयुज्यन्ते प्रेर्यन्ते प्रणेता प्रणयने श्रोता च श्रवणे येन

तत्प्रयोजनं । विषयः साध्यत्वा समयस्य लोकायतशास्त्रस्य विषयाद्यभावप्रसंगादित्यर्थः । एतदुक्तं भवति । न तावल्लो
कायतशास्त्रस्यैन्द्रियको विषयः । प्रत्यक्षत एव तत्सिद्धेः शास्त्रानपेक्षणात् । फलमपि न दृष्टमर्थादिकं । तस्यान्यतो
लभ्यत्वात् । अनेन सर्वथाभावात् । ततो धर्मादिकमतीन्द्रियं विषयत्वेन स्वर्गापवर्गादिकं च फलत्वेनांगीकार्यं ।
तदपि चेन्नांगीक्रियेत तदा शास्त्रस्य निर्विषयत्वेन निष्फलत्वेन च काकदन्तपरीक्षादिवदशास्त्रत्वमापद्ये
त । वक्तुः श्रोतुरभिमतमनन्यसाध्यं फलमधिकृत्य तद्धेतुभूतं प्रमाणान्तराप्राप्तमर्थं प्रतिपादयतां वाक्यानां
समूहो हि शास्त्रमित्युच्यते । यथा व्याकरणादि । एवं चाशास्त्रत्वापत्तौ तस्याशास्त्रत्वं प्रसज्येत । न चैतस्य तदिष्टमिति
सर्वथा तेन विषयादिसिद्ध्यर्थं धर्मादिकमंगीकार्यमिति । ननु धर्माद्यनंगीकारेऽपि न शास्त्रस्य विषयादिशून्य
त त्वमापद्यते । धर्माद्यभावस्य विषयत्वात् । न च धर्मादिकं पश्वादिभिरिव स्वभावत एव प्रतिपन्नमिति किं तदभावप्रति
पादनेनेति वाच्यं । वेदादिजनितया भ्रान्त्या धर्मादिसद्भावस्य प्रसक्तत्वेन नायं सर्प इतिवत्तदभावप्रतिपादनस्योप
पन्नत्वात् । फलं च लोकस्य निरंकुशः कामोपभोगो दुःखनिवृत्तिश्च । यद्यपि शास्त्रं न कामान् ददाति । तेषामर्था
दिनैव लभ्यत्वात् । नापि भोजयति । रागत एव तत्संभवात् । नाप्यौषधादिवत् दुःखं शमयति । तथापि धर्मादिसद्भा
५ वभ्रान्त्या केचित् कामोपभोगादुपरुद्धाः क्लेशबहुलया यागाद्यनुष्ठानेन निमित्तेन च दुःखं प्रसक्तं । धर्माद्यभावप्रतिपादने तु

श्री०

८ भ्यां नो निवर्त्तयाय यथेष्टकामोपभोगो दुःखानुदयश्च स्यात्। शास्त्रप्रणेतुस्तु लोकोपकारः फलं। उपकृताश्च लो
काअस्माकं कामोपभोगापरोधं धर्मानुष्ठानादिकं शं वनिवारितवानित्यनुरागिणो भवन्ति। जनानुरागप्रभवा
श्च संपद इति तत्राह। न चैतेनेति। तेन शास्त्रप्रणेत्रा तेन शास्त्रेण प्रणीतेन लोकोपकारः कृतो भवतीति न च वा
च्यमित्यर्थः। लोकप्रयोजनादिप्रतिषेधस्याप्यफलत्वमेतत्। कुतो नेत्यत आह। धर्मेति। ज्ञाने लोकस्य लो
कायत्तशास्त्रेणोत्पादिते सति हिंसादिनाप्राप्तेन। एतदुक्तं भवति। यदि धर्मादिज्ञानं प्रमायादिवाभ्रान्तिः। सर्व
था सर्वमर्यादास्थितिहेतुत्वेन महान्तमनर्थपर्यहासीत्। इदानीं तु धर्माद्यभावज्ञाने सति तु सर्वमर्यादाभंग
न धनवनितापरिहारादिना लोकस्य परस्परहिंसादिकं प्राप्नोत्येव। तथा चापकार एव लोकस्यानेन कृतो
भवति। नहि कंपदिकालाभार्थं लक्षलाभनाशयन्नुपकारी भवति। ततश्च श्रोतॄणामिदमफलमेव। फलसं
बंधिन एव विषयत्वेन निर्विषयत्वं च। शास्त्रप्रणेतरि च लोकस्यापकारबुद्ध्या द्वेष एव भवति कुतोऽनुराग इति। नन्व
विवेकिनां भवतु केषांचिद्द्वेषः। विवेकिनस्त्वस्मत्सुखाद्यर्थमनेनोद्यमः कृतः। यत्तु हिंसादिकं प्राप्तं तदस्मत्साम
र्थ्याभावनिबंधनं। तत्रायं किं करोत्विति मन्वाना अनुरज्यंत एव। यथारोग्यार्थं भिषजौषधे दत्ते स्वापराधेन व्या ८
निष्टोत्पादे जाते नामयावी तस्मै द्रुह्यति। किंतु प्रत्युत उपकारायैवेति चेत्। न। तथापि समभ्युपफलत्वेन शास्त्रकरण

प्रयोजनम् इति। अर्थशब्दो निवृत्तिवचन इति केचित्। तत्राज्ञानादि प्राप्तिलक्षणेन परामृश्यते। अर्थशब्दश्चावर्त्तनीयः।
तस्यार्थो निवृत्तिस्तदर्थः। सोऽर्थः प्रयोजनं यस्य सर्वज्ञकल्पनस्येति। उक्तन्यायेन सर्वज्ञकल्पने विप्रलंभाद्यभावस्तत
एव सेत्स्यतीति पूर्वपक्षिणोऽभिप्रेतत्वात्सर्वज्ञ इत्येवोक्ते। कुतोऽनेनस्यत आह। अन्यत्रेति। एवं वदता नावलोकास्मिंश्चित्पुरुषे
प्रमाणेन विना सर्वज्ञत्वस्य कल्पनं न कार्यं। तथाहि। न तावत्तदीयं सार्वज्ञं स्माकं प्रत्यक्षमस्ति। अस्माकमपि तत्प्रसंगा
त्। सर्वं हि ज्ञात्वा तदीयज्ञानस्य तद्विषयत्वं प्रत्यक्षेण ज्ञातव्यं। न चासौ सार्वज्ञमस्ति। तथात्वे वु हादि कल्पना वैयर्थ्यात्।
तदिदमुक्तमन्यत्रास्मास्वदृष्टस्येति। अनुभवविरुद्धं चास्माकं परापि तच्छक्तिप्रत्यक्षीकरणं। नाप्यनुमानं। तद्धि येन ध
र्मिणा व्याप्तमन्यत्रोपलब्धं तस्यैव गमकं भवति। न च सर्वज्ञत्वमन्यत्रादृष्टं। येनानुमानस्य व्याप्तिर्गृह्येत। एतदप्युक्तं।
अन्यत्रादृष्टस्येति। आगमोऽपि न तावदपौरुषेयः परेणांगीक्रियते। पौरुषेयोऽपि किं सर्वज्ञप्रणीतोऽन्यप्रणीतः। नान्त्यः। अ
नाश्वासात्। आद्येऽपि किं तत्सर्वज्ञप्रणीत उत सर्वज्ञांतरप्रणीतः। नाद्यः। इतरेतराश्रयप्रसंगात्। तस्य सार्वज्ञसि
द्धौ तत्प्रणीतागमप्रामाण्यसिद्धिस्तेन च तस्य सार्वज्ञसिद्धिरिति। अन्यथा स्वशक्यो नास्माकमपि तत्सिद्धेन। न च
तदास्ति। तदप्याह। अन्यत्रादृष्टस्येति। अन्यत्र स्ववाक्येन सिद्धतयादृष्टस्येत्यर्थः। न द्वितीयः। पुरुषांतरे सार्वज्ञस्यादृष्ट

11 त्वात्। सर्वज्ञेतरवाक्येन तत्कल्पनेन व्यवस्थितेः। पूर्वसर्वज्ञवक्त्राश्रयणे चेतरेतराश्रयणात्। इदमप्युक्तमन्यत्रादृष्टस्येति।
नाप्युपमानं। नहि सदृशवायमिस्येन सदृशो सावितिवोसघेन। न चान्यत्र सार्वज्ञप्रतीतये नोपमानस्योदयः स्यात्।
एतदप्युदितमन्यत्रादृष्टस्येति। नाप्यर्थापत्तिः। अनुपपन्नभावात्। बुद्धस्य धर्मादिदेशना महाजनपरिगृहीत
त्वेनानुपपद्यमाना सार्वज्ञं गमयतीति चेत्। तर्हि जिनस्यापि न स्यात्। न चास्त्विति वाच्यं। विप्रतिपत्त्यभावप्रसंगात्।
इदमप्याह। अन्यत्रादृष्टस्येति। नाप्यभावः। तस्य भावविषयतया क्वाप्यदृष्टत्वात्। एतदेवाह। अन्यत्रादृष्ट
स्येति। अन्यत्राभावप्रमाणविषयतया दृष्टस्य भावरूपस्येति। आर्हतास्त्वाहुः। कश्चिदात्मा सकलपदार्थसा
क्षात्कारी तद्ग्रहणस्वभावत्वे सति प्रक्षीणप्रतिबंधकत्वात्। यदेवं तदेवं यथापगततिमिरादिप्रतिबंध
लोचनं विज्ञानं रूपसाक्षात्कारीति। तदसत्। सकलपदार्थसाक्षात्कारित्वस्यान्यत्रादृष्टत्वेनाप्रसिद्धवि
शेषणत्वात्। तद्ग्रहणस्वभावत्वं चाविवक्षितं स्यात् तन्नांगीक्रियते सर्वेषां वा। नाद्यः। अन्यत्रादृष्टत्वेनास्
त्वात्तत्रापि तदभावसाधनसौलभ्यात्। न द्वितीयः। अस्मदादौ तत्स्वभावत्वस्य प्रमाणादृष्टत्वात्। व्याप्तिज्ञानेन सर्व 11
विषयसर्वात्मनां स्वभावो दृश्यत इति चेत्। न। परोक्षसामान्यज्ञानस्वभावत्वेनापरोक्षविशेषज्ञानसाधन

स्यातिप्रसंगित्वात्। अन्यस्य तत्स्वरूपसाक्षात्कारस्वभावेपि लोचनविज्ञानेरससाक्षात्कारित्वस्यादृष्टत्वात्। न स्वभाव
त्वस्यासिद्धत्वादेव प्रतिबंधककल्पनानुपपत्ते सत्यपि क्षयस्याप्यनुपपत्तेरेव। नहि तेजसोन्यत्र दाहप्रतिबंधकदृ
ष्टं। किंचान्यत्रादृष्टस्यावरणप्रक्षयस्य विवक्षितेप्यात्मनि कुतः सिद्धिः। आवरणत्वादेवेति चेत्। न। कस्यचित्तिमि
रादेर्यावद्ध्रियमाणभावित्वात्। कमनीयकांतास्पर्शादावपि रागाद्यनुदयात् प्रक्षीणप्रतिबंधकत्वसिद्धिरि
ति चेत्। न। रागाद्यभावस्याप्यन्यत्रादृष्टस्य कल्पकाभावात्। बाह्यविक्रियाभावेन न दृष्टा वानुमानमिति चेत्।
न। जगद्वशीकरणार्थं धैर्येण स्थगनसंभवात्। अन्यत्र दृष्टांते च सकलपदार्थसाक्षात्कारित्वं न स्वभावत्वं
वाऽदृष्टमेव। यद्ग्रहणस्वभावत्वे सति प्रक्षीणप्रतिबंधकं तन्न साक्षात्कारीति व्याप्तिरिति चेत्। तथापि विज्ञानस्य
साक्षात्कारत्वेन साक्षात्कारित्वाभावात्। किंच। सकलपदार्थसाक्षात्कारित्वस्यान्यत्रादृष्टस्यात्राप्यात्मत्वादेवा
भावः किंन साध्यत इति। ननु धर्मादिकं कस्यचित्प्रत्यक्षं वस्तुत्वात् घटवदिति सामान्यतः सर्वज्ञत्वसिद्धिरिति।
मैवं। अत्र किं धर्मादेः प्रत्यक्षत्वमात्रं साध्यते उतैकपुरुषप्रत्यक्षं। आद्येऽर्थांतरं। कस्यचित्केनचित्प्रत्यक्षीकृतत्वे
नापि प्रतिज्ञार्थस्य सिद्धेः। न द्वितीयः। दृष्टांतेऽदृष्टत्वात्। न हि पक्षातिरिक्तस्य सर्वस्यैकपुरुषप्रत्यक्षत्वं संमतं।

१२ एको घट एकस्य प्रत्यक्ष इति चेत्। तर्हि धर्म एकस्य प्रत्यक्षोऽपरस्याधर्म इत्येवं प्रतिज्ञार्थस्योपपत्तेर्नैरर्थक्यं नरतादवस्तु
स्थ्यात्। धर्ममपि त्वमन्नधर्मं कथनमपि पश्यतीति चेत्। किमियमसत्संभावनानुमानं। नाद्यः। असाधकत्वात्। न द्वितीयः।
व्याप्त्यभावात्। यो शक्यमेकं करोति सोऽपरमपीति व्याप्तिरिति चेत्। न। वराहगृध्रादिषु दूरस्थशब्दरूपग्रहणस
मर्थेष्वपि तथाविधरसादिग्रहणसामर्थ्यस्यादृष्टत्वात्। अस्तु वा विप्रतिपन्नमेकस्यैव प्रत्यक्षं तथापि कुतः सार्वज्ञ
सिद्धिः। न हि सर्ववस्तुप्रतिपन्नमपि पश्यतीत्यत्र प्रमाणमस्ति। कैमुत्यसिद्धं नेदिति चेत्। न। तद्बीजाभावात्। यो दुष्करा
र्यं करोति स सुकरं करोत्येवेति चेत्। न। कूटकान्भक्षयितर्युष्ट्रे कदलीफलभक्षणस्यादृष्टत्वात्। धर्मादि
ज्ञानेनैव प्रकृतोपयोगात् किं कीटसंख्यादिपरिज्ञानेनेति चेत्। न। धर्मादिसाध्यसाधनाद्यपरिज्ञाने धर्मादिज्ञान
स्यानुपयुक्तत्वादिति। ननु यक्षित्यादिकं सकर्तृकं कार्यत्वात् घटवदिति क्षित्यादेः कर्तृसिद्धे तस्य सार्वज्ञ्यसिद्ध
मेव। उपादानादिसाक्षात्कारवत एव कर्तृत्वात्। सर्वस्यापि क्षित्याद्युपादानादौ प्रविष्टत्वादिति चेत्। न। घटादी
नां कर्तरि कुलालादौ तदुपादानादिविषयसाक्षात्कारस्यादृष्टत्वात्। नहि कुलालो घटे पलपरिमाणेयन्ताविशेष ११
वंतं निमित्तं कालदिशामदृष्टं तदाश्रयं वा पुरुषं तत्प्रयोजनविशेषं वा साक्षात्करोति। किंच। घटादौ सपक्षेऽदृष्टस्य

वकर्तृकत्वस्यक्षित्यादौ कुतः सिद्धिर्येन तस्य सार्वज्ञं स्यात्। कल्पनालाघवादिति चेत्। न। अतिबहुतरकार्यजात
स्यानेककर्तृताया एवौचित्यादित्यलं प्रपंचेन। एवं सार्वज्ञ्यासिद्धौ तस्यापि प्रलंभकत्वमप्यप्रामाणिकं कल्प्यमेव।
सार्वज्ञेपि कुतो विप्रलंभकत्वाभावः। रागाद्यभावादिति चेत्। न। तद्रहितेष्वपि बुद्धादिष्वीश्वरावतारेषु दर्शनात्। वी
तरागाणामपि ज्ञानांकुरसंरक्षणार्थं छलादिना प्रतिवादिप्रतारणस्य सर्वैरंगीकृतत्वात्। एवं पटुकरणत्वादिकं क
ल्प्यमेव न तु प्रामाणिकं। किं चास्तु कश्चित्सर्वज्ञोऽविप्रलंभकश्च। तथापि धर्मादिप्रतिपादकस्य वाक्यविशेषस्य त
त्कृतत्वं कुतः सिद्धं। न चैवंभूतः स्वीयहिताहितप्राप्तिपरिहारसाधनमविदुषो नानाविधव्यसनसागरे निमग्नान्
जंतूनवलोकयन्नानुपदिश्य स्थातुमर्हतीति चेत्। न। एवंभूतानामपि क्लिष्टानामुदासीनानामंगीकृतत्वात्। उ
पदिशेत्तु वा सोऽसौ यमुपदेश इति तु कल्प्यमेव। तदेवं कल्पनागौरवप्रसंगेन न पौरुषेयेण वाक्येन धर्मादिनिश्चयः श
क्यः। न हि लोके विना प्रमाणेन कस्यचित्पुरुषस्याप्तत्वं प्रकल्प्य तत्प्रणीततो कस्यचिद्वाक्यस्य कल्पितत्वात्प्रेक्षावंतस्त
दर्थनिश्चयं कुर्वंति। कुर्वाणा वा किं स्वास्मन्येव तत्सर्वं न कल्पयेयुः। तस्मात्पौरुषेयवाक्येन धर्माद्यसिद्धेस्तत्प्रतिपादकं
किमप्यपौरुषेयवाक्यमंगीकृत्य बुद्धर्षभादयस्तु तदर्थस्यानुवादका इति तैर्वादिभिः सिद्धं धर्मादिनिश्चयमभिलषद्भिरभ्यु

पेय। यथाहुः। शौद्धोदनिप्रभृतयः संप्रदायप्रवर्त्तका इति। ननु प्रसिद्धानि बौद्धादिवाक्यानि परित्यज्य धर्मादिप्रतिपाद
कं किंचिदपौरुषेयवाक्यं प्रकल्प्यमिति सामर्थ्यमेवेत्यत आह। अपौरुषेयेति। पौरुषेयैकवाक्येन धर्मादिनिश्चयसिद्ध
ता यथा बहुतरसर्वज्ञत्वादिकल्प्यं। तथापौरुषेयवाक्याङ्गीकारेण किंचिद्बहुतरकल्प्यं। किं त्वपौरुषेयवाक्यमे
कमेव। तथा च धर्मादिनिश्चयस्यावश्यंकार्यत्वे बहुकल्पनापक्षपरित्यागेनाल्पकल्पनापक्षाश्रयणमेव न्याय्यः।
यत्राहुः। यत्राल्पीयान् दोषः स पक्ष इति। तथापि दुष्टस्य कथमङ्गीकार इति चेत्। किं कार्यं गत्यन्तराभावात्। अ
यं च परेषामेव। यथा वास्माकं न दोषस्तथानुपदमेव वक्ष्यते। एवं सर्वसमयिभिरपौरुषेयवाक्यस्यावश्यमङ्गीका
र्यत्वाद्वेदोऽपौरुषेय इति वाक्यं नासंभावितार्थमिति सिद्धं। अस्तु वेदस्यापौरुषेयत्वं संभावितं। तन्निश्चयस्तु नास्ति।
न चानिश्चितो हेतुर्भवतीत्यत आह। अपौरुषेयत्वेति। वेदस्येति शेषः। वेदस्यापौरुषेयत्वमसंभावनया निरूढं दुःसाधन
मभूत्। इदानीमसंभावनायां निरस्तायां तु स्वत एवानायासेनैव निश्चितं जातमित्यत आह। वेदेति। कर्त्तरि स्वेति प्रतिषि
द्धस्य याजकादिभिश्चेति पुनः प्रसवात् तृजन्तेन षष्ठ्याः समासोपपत्तिः। द्वितीयान्तस्य तु नन्तेन वा यः समासः। श्रितादिषु १६
गमिगाम्यादीनामुपसंख्यानात्। वेदोऽपौरुषेयोऽप्रमितकर्तृकत्वाद्गगनवदिति सर्पः। ननु यथा गिरिदरिविवरवर्त्तिनगां

र्तुरस्यास्मादिभिः केनापि प्रमाणेनाप्रमितस्यापि सद्भावस्तथा वेदस्य कर्तुरस्मादिभिरप्रमितस्यापि सद्भावः शंक्यत इत्यत आह।
अप्रसिद्धौ चेति। कल्पने शंकायां। अप्रमितमपि वेदस्य कर्त्तारं अनुमानः किं धर्मीदिकमंगीकरोति न वा। नेति पक्षेऽसमर्थी
स्यात्। आद्ये बुद्धादिपुरुषवाक्ये न वा तन्निश्चिनुयाद्वेदेन वा। वाक्यांतरमपौरुषेयं कल्पयितव्यं तेन वागत्यंतराभा
वात्। अनुमानादीनां निराकरिष्यमाणत्वात्। प्रथमद्वितीययोर्बुद्धादीनां वेदकर्तुर्वा सर्वज्ञत्वादीकं प्रमाणेन वि
ना कल्पनीयमिति कल्पनागौरवं स्यात्। तृतीये तु तद्वाक्यं तस्यापौरुषेयत्वं च कल्प्यमिति कल्पनागौरवमेव। न च
प्रयोजनानुरोधेन प्रमाणकल्पना युक्ता। किं नाम निश्चितेन प्रमाणेनान्यदप्युपगम्यते। अतः कल्पनागौरवप्रसं
गान्नाप्रमितो वेदस्य कर्त्ता शंकनीयः। ननु तर्हि किमित्यत आह। अकल्पने चेति। एवं वेदकर्तुरप्रमितत्वे कल्पना
गौरवप्रसंगभयेनाकल्पने शंकायां अप्यभावे वेदस्याकर्तृकत्वं सिद्धमेव। यथा धूमस्याग्निसंबंधेन कश्चि
दुपाधिः प्रमितस्तत्कबलेनाशंकाप्युपाधिविषया निराक्रियते। ततो निरुपाधिक एवासावनुमानबीजसंब
धः सिध्यति तथैवेति। एवं वेदस्याकर्तृकत्वेनानुमानमभिधाय तत्स्थैर्येऽनुकूलं तर्कोऽप्यभिहितः। तत्र शंकते। अस्ति
ह वेदस्याप्रमितकर्तृकत्वं वेदः सकर्तृको वाक्यत्वात् लौकिकवाक्यवदित्याद्यनुमानेन वेदकर्तुः प्रमितत्वादिति। तत्रा
ह। न च लौकिकेति। वेदस्य वाक्यत्वादिति हेतुनानुमेयमिति शेषः। कुत इत्यत आह। तस्येति। तस्य लौकिकवाक्यस्य स

कर्तृकत्वमितिवर्त्तते। पक्षीकृतस्य त्वकर्तृकत्वप्रसिद्धिमत्त्वादकर्तृकत्वमस्तीति वाक्यशेषः। इदमुक्तं भवति। वाक्य
त्वादौ समानेपि लौकिकवाक्यस्य वेदवाक्यत्वात्सकर्तृकत्वमस्तु। अस्य तु वेदत्वादकर्तृकत्वं भवत्वित्याशंकायां
बाधकाभावेनाप्रयोजकत्वान्नैवमनुमातव्यमिति। न च साध्यदृष्टान्तयोर्धर्मविकल्पेन प्रत्यवस्थानाद्विकल्प
समाख्यजात्युत्तरमेतदिति शंकनीयं। तथा सति कुत्राप्यनुकूलस्य विपक्षे बाधकस्यावचनव्याजात्तर्कैकत्वापादन
स्यैवप्यर्थ्यापत्तेः। किंतु साध्ये वा दृष्टान्ते वा साध्यदृष्टान्तयोर्वा धर्मविकल्पात्कस्यचिद्धर्मस्य किंचिद्धर्मव्यभिचार
दर्शनात्साधनस्यापि साध्यव्यभिचारापादनं विकल्पसमा जातिः। ननु किमिदं वेदत्वं। यद्भावाभावाभ्यां पक्षसप
क्षयोः साध्यस्याभावो भावश्च व्यवस्थाप्यते। न तावद्वाक्यत्वमदृष्टविषयवाक्यत्वं वा। बौद्धादिवाक्यानामपि वेदत्वप्र
संगात्। नापि प्रमाणत्वे सत्यदृष्टविषयवाक्यत्वं मन्वादिवाक्यानामपि तत्प्राप्तेः। नाप्यपौरुषेयवाक्यत्वं व्यव
स्थाप्यमानातिरिक्तव्यवस्थापकाभावादित्याशंक्य तस्यावेदत्वादिति वक्तव्ये वेदशब्दार्थज्ञापनार्थं तस्याकर्तृक
त्वप्रसिद्धिरहितत्वादित्युक्तं। तथा चाकर्तृकत्वप्रसिद्धिमत्त्वं वेदत्वं तदभावश्चावेदत्वं ताभ्यां साध्यविकल्पः शं
क्यतेऽसंभवितं भवति। अकर्तृकत्वप्रसिद्धिमत्त्वं नाम प्रत्यक्षादिप्रमाणैर्विप्रलम्भादिकं वा स्वमूलं नोपलभ्य तच्छून्यप्रसि १४
द्धिविषयत्वं। एतच्चानुपलभ्यमानमूलत्वे सति महाजनपरिगृहीतवाक्यत्वं वेदत्वमिति वरदतो दयनेनाप्यंगीकृतं। तत्र

नुपलभ्यमानमूलत्वग्रहणेन प्रत्यक्षादिमूलत्वस्य महाजनपरिगृहीतत्वग्रहणेन विप्रलंभादिमूलत्वस्य च व्यावर्तित
त्वात्। सर्वज्ञज्ञानमूलत्वं वदतापि तस्य प्रमाणत्वाभावादेवं वक्तुं शक्यत एव। एतच्चानुमानं वैशेषिकादीनां। तथा
च सूत्रं बुद्धिपूर्वा वाक्यकृतिर्वेद इति। अतस्तान्प्रत्येव वेदशब्दार्थं निरूप्य तद्भावाभावाभ्यां साध्यविकल्पत्वशंकोप
पद्यते। विप्रलंभादिमूलत्वमभ्युपगच्छतः सौगतादीन्प्रति तु पक्षतावच्छेदकत्वेन यद्वेदत्वं तैरंगीक्रि
यते तद्भावाभावाभ्यामेव शंकनीयं। एवं चाप्रयोजकोन्यथासिद्धो वा वाक्यत्वादिहेतुरिति। सकर्तृकत्वाभा
वे प्रामाण्याभावप्रसंगः प्रमायाः परतंत्रत्वादित्यादिबाधकं तु तत्र तत्र निराकरिष्यते। अकर्तृकत्वप्रसिद्धिम
द्वाक्यत्वं वेदत्वमिति यद्वेदलक्षणमुक्तं तदयुक्तं। गूढकर्तृकस्य कृताकर्तृकत्वप्रसिद्धिकस्यापि वाक्य
स्य वेदत्वप्रसंगात्। अन्यथातिव्यापकत्वादित्यत आह। न च केनचिदिति। वेद इत्युक्ते कृताकर्तृकत्वप्रसिद्धि
कवाक्ये। वेदसमप्रसिद्धे वेदवद्वेदत्वापत्तेः। प्रसज्यत इति शेषः। हेतुमाह। परंपरेति। अकर्तृकत्वप्रसिद्धिमत्वे
नामानुपलभ्यमानप्रत्यक्षादिमूलत्वमित्युक्तं। अस्य चाध्येतृपरंपराभावेन यद्यस्मिन्विच्छिन्नपरंपरं वाक्यं
तन्न प्रत्यक्षादिमूलं यथा संप्रतिपन्नमिति। अतो नोक्तवेदलक्षणं गूढकर्तृकेस्तीति। नाध्येतृपरंपरावनगू भा
ढकर्तृकस्य वेदलक्षणाभावोनुमातुं शक्यते। अध्ययनेन विना वसिष्ठादयो वेदान्पश्यंतीति भवदंगीकारात्।

वे० टी०

१५

ततश्च स्वयमेव प्रतिभानो वेदो येषां तैर्दृष्टस्य परंपराभावेन वेदलक्षणाभावापत्त्या वेदत्वाभावापत्तेः। अन्यथा
नैकाद्यप्रसंगादित्यत आह। न च स्वयमिति। भवति प्रसज्यत इत्यर्थः। अप्रसंगे हेतुमाह। परंपरासिद्धेति।
अध्यापकपरंपरावत्त्वेन यत्प्रसिद्धवेदवाक्यं तदनुसारित्वान्न तत्समानत्वात्। एतदुक्तं भवति। परंपरानामाध्येतॄ
णामध्यापकानां च प्रवर्तनमेवेदमधीमहेऽध्यापयामश्चेति प्रतिपत्तिः। न त्वध्ययनाविच्छेदः। तदभावश्च गू
ढकर्तृकस्य वेदलक्षणराहित्यहेतुत्वेनेहोपपत्तेः। न चासौ स्वयंप्रतिभानवेदे दृष्टे वर्त्तते। तस्यापि परंपरासिद्धवेदवा
क्यांतरवत्साक्षान्नमेवैतदिति न प्रतिपत्तिविषयत्वात्। अतो नावेदत्वप्रसंगो नाप्यन्यतरानैकान्त्यमिति। नन्वेवं
तर्हि गूढकर्तृके परंपराभावस्य हेतोरसिद्धिः स्यात्। वसिष्ठादय एव गूढादिकर्त्ता प्रसिद्धमेवेदं मया दृष्टमिति
वदेयुर्वेति चेत्। न। तद्वचनस्यान्यतरत्वात्। वसिष्ठादयो वेदानां पुरातनानां द्रष्टार एव तथा वदंति अपरे तु दृष्टेवा
नृतभाषीति कुतो निश्चयः। तथा च संदिग्धानैकान्त्यं संदिग्धासिद्धिर्वेत्यत आह। वेदद्रष्टॄणामिति। वेदद्रष्टॄणां ये गु
णा उक्ता आगमेषु तद्वत्त्वान्नेषां वसिष्ठादीनां प्राक्तनवेदद्रष्टृत्वं निश्चेतुं शक्यते। इतरस्य तु तदभावादनृतत्वा
दित्वं निश्चीयत इति भावार्थः। उक्तशब्दस्य नित्यसापेक्षत्वात्समासः। अथवा वेदद्रष्टॄणां तथापि मतानां तेषां वसिष्ठादी १५
नामित्यन्वयः। गुणशब्देन च वेदद्रष्टृलक्षणमुच्यत इति। के ते गुणाः कुत्र च वेदद्रष्टॄणां लक्षणानि तेनोक्तानीत्यत आह।

उक्तं चेति। एवं लक्षणका वेदस्य इष्टार इत्येतदुक्तं चेत्सत्यं तत्पठति। विंशादिति। विंशतिशब्दपर्यायो विंशशब्दः। शास्त्रे
यान्युत्तमस्य पुरुषस्य द्वात्रिंशल्लक्षणान्युक्तानि तेषां मध्ये विंशल्लक्षणोनोऽनूनलक्षणवान्। वेद इत्येव प्राक्तन एवा
यमित्येव। यद्वा कश्चिद्विशेषसंज्ञानदर्शी नादृष्ट्वा दृष्ट्वा पन्नयेत्। अनलिंगमविवक्षितं। स्त्रीणामपि वेददर्शनसद्भावात्। अ
थीदं प्रकृतोपयोगो दृष्टव्यः। अथवा तस्याकर्तृकत्वे सत्यनेन वेदत्वाभावो वाक्यत्वानुमानस्योपाधिरुच्यते। तत्रेद्धि
मिदं वेदत्वं। यदभावउपाधित्वेनाभिप्रेयते। न तावद्वाक्यत्वादृष्टविषयवाक्यत्वादृष्टविषयप्रमाणवाक्यत्वानामन्य
तमत्। तदभावस्य साध्याव्यापकत्वात्। नाप्यपौरुषेयत्वं। तदभावस्यैव साध्यत्वात्। नापि वैदिकत्वाद्यलक्षणोपेतत्वं।
तदभावस्य भारतादिषु साध्याव्यापकत्वात्। यथोक्तं। विशुद्धत्वप्रसन्नत्वाक्लिष्टत्वभाव्यतादयः। वेदधर्मा हि दृश्यन्ते
व्यासादिवचनेष्वपीति। अध्ययननियमविशेषास्तु शाखादिभेदेनाव्यवस्थितानोपसंगृहीतुं शक्यंते। नियमसामा
न्यं तु भारतादावप्यस्तीति तदभावोपि साध्याव्यापक एव। नापि नियतक्रमवत्त्वस्यापि भारतादौ सद्भावात्। क्रमव्यत्या
से वेदत्वाभाववद्भारतत्वाभावात्। नापि वेदव्यवहारगोचरत्वं। इतिहासपुराणादिष्वपि तद्भावात्। नापि मुख्यतद्गो
चरत्वं। तदभावस्य पक्षेतरत्वात्। प्रतिपक्षपर्यवसाने वा साधारणत्वादिसाङ्कर्याद्वेदत्वादिति वक्तव्यतान्निर्वचना
र्थमकर्तृकत्वप्रसिद्धिर्त्वाहितत्वादित्युक्तं। अकर्तृकत्वप्रसिद्धिमत्त्वं वेदत्वं। न इहितत्वादेव तस्य लौकिकवाक्यस्य सकर्तृ

प०टी०

१६ कर्तृत्वनन्वाक[illegible]त्वं प्रयुक्तमित्यर्थः। नन्वेतल्लक्षणे गूढकर्तृके पिवा कोस्तीति तस्यापि वेदत्वं प्राप्तं। तथा च तदभावस्य
साध्याव्यापकत्वमित्यत आह। नचेति केनचिदिति। अकर्तृकत्वप्रसिद्धिमत्त्वेनानुपलभ्यमानोचितकारणानां। वाक्य
स्योचितं कारणं प्रत्यक्षादिकं वा विप्रलंभादिकं वा। नच गूढकर्तृके स्वपरपराभावेनानुमानेनोपलभ्यत एवेति
कथं तस्य वेदत्वप्राप्तिरित्यर्थः। एतेनेतदपि निरस्तं वेदस्य सकर्तृकत्वनिरासात्प्रागकर्तृकत्वप्रसिद्धिमत्त्वस्याभा
वात्साधनव्यापकत्वमिति। अकर्तृकत्वप्रसिद्धिमत्त्वस्यानुपलभ्यमानप्रत्यक्षादिमूलतया व्याख्यातत्वात्। तस्या
श्चेश्वरकर्तृकत्ववादिभिरप्यंगीकृतत्वात्। नच स्वयं प्रतिभातेत्यादिकं परंपराभाव[illegible]स्य हेतोर्विशेषवार परिहा
रार्थत्वेन पूर्वव[illegible]व्याख्येयमिति। तर्कपराहतं च वाक्यत्वानुमानं। पूर्वोक्तकल्पनागौरवप्रसंगादिरूक्तप्रायमेव। तथा
वक्ष्यमाणश्रुतिपुराणादिविरुद्धं च। एतेन वेदाः सर्वज्ञप्रणीताः वेदत्वाद्व्यतिरेकेण लौकिकवाक्यवदित्यपास्तं। विपक्षे
बाधकाभावेनाप्रयोजकत्वात्। किंच। वेदस्य सर्वज्ञप्रणीतत्वनिश्चये सति प्रामाण्यनिश्चयः तन्निश्चये सर्वज्ञनिश्च
यः तन्निश्चये विशेषणप्रसिद्ध्यानुमानप्रवृत्तौ वेदप्रामाण्यनिश्चय इति चक्रकप्रसंगः। प्रकारांतरेण सर्वज्ञसिद्धेर्निर
स्तत्वात्। प्रमाणांतराणि तु तत्र तत्र निराकरिष्यंत इति। यदुक्तं वाक्यत्वानुमाने विपक्षे बाधकाभावादप्रयोजकमिति। तत्र १६
सत्यं। तथाहि। संवादेन खलु प्रमाणानां प्रामाण्यमनुमातव्यं। संवादश्च सजातीयेन विजातीयेन वा भवति। तत्र वेद

स्यन तावत्सजातीयसंवादोस्ति। सदागमैकविज्ञेयमिति नदिष्यस्य प्रमाणांतरागोचरत्वाभ्युपगमात्। नाप्यर्थ
क्रियासामर्थ्यादिकं विजातीयमस्ति। मोक्षादेः प्रत्यक्षाद्यवेद्यत्वात्। तथा चाप्तोक्तत्वेनैव तत्प्रामाण्यमनुमातव्यं। प्रमा
णजन्यत्वेनेव नेत्रजन्यज्ञानप्रामाण्यमपि। तथा चाह काणादः। तद्वचनादाम्नायप्रामाण्यमिति। अक्षपादोपि। तत्प्रा
माण्यमाप्तप्रामाण्यादिति। न च श्रुतेर्वेदस्याकर्तृकत्वे प्रामाण्यासिद्धिप्रसंगस्य बाधकस्य विद्यमानत्वात्कथमप्रयोज
कत्वं वाक्यत्वाद्यनुमानस्य। अतएवाकर्तृकत्वानुमानमपि प्रतिकूलतर्कपराहतं। उपाधेरपि साध्यव्यापकत्वभंगः सि
ध्यति। यथोक्तं। अनुकूलेन तर्केण सनाथे सति साधने। साध्यव्यापकताभंगात्पक्षे नोपाधिसंभव इति।
तत्राह। प्रामाण्यं चेति। सर्वेषामपि ज्ञानानां यथार्थत्वलक्षणं प्रामाण्यं स्वत एव ज्ञानग्राहकेणैव गृह्यत इति शेषः।
एतदुक्तं भवति। भवेदेवं। यदि ज्ञानेन मानसावसेयं तदीययाथार्थ्यमुक्तविधयासंवादेनानुमेयमिति परतः प्रामा
ण्यग्रहणं स्यात्। न चैवं। किंनाम। ज्ञानं साक्षिप्रत्यक्षवेद्यं। तद्वक्ष्यते। तत्प्रामाण्यमपि साक्षिवेद्यमेव। इंद्रियलिंग
शब्दानां तु यथार्थज्ञानसाधनत्वलक्षणप्रामाण्यमन्वयव्यतिरेकावसेयं। तथा च कुत्रापि प्रामाण्यग्रहे नाप्तो
क्तत्वादेरुपयोग इति। ज्ञानग्राहकमात्रेणैव तत्प्रामाण्यग्रहणमित्येव कुतइत्यत आह। अन्यथेति। प्रामाण्यं ता
वदवश्यं केनचित्प्रमाणेन ज्ञातव्यं। अन्यथा तदभावप्रसंगात्। न च ज्ञानग्राहकातिरिक्तेन तद्ग्रहणसंभव

ति। तत्प्रामाण्यस्याप्यन्येन ग्रहणांगीकारेऽनवस्थानात्। न स्वतस्त्वे प्रथमस्यैव तथात्वांगीकारोपपत्तेः। अतः परि
शेषात्स्वतस्त्वसिद्धिः। तथा च प्रयोगः। ज्ञानगतं याथार्थ्यं तद्ग्राहकेणैव ग्राह्यं। ग्राहकांतरानुपपत्तौ सत्यां गृह्य
माणत्वात्। यद्यतोऽन्येनानुपपद्यमानग्रहणं गृह्यते तत्तेनैव ग्राह्यं। यथा चक्षुषोऽन्येनानुपपद्यमानसा
क्षात्कारं साक्षात्क्रियमाणं रूपं चक्षुषैव साक्षात्क्रियत इति। न त्वविशेषणासिद्धिः। ग्राहकांतरस्यानवस्था
प्रसंगेन निरस्तत्वात्। न च साक्षिवेद्यत्वेऽप्यनवस्थाप्रसंगः समान इति वाच्यं। साक्षी स्वयंप्रकाशः स्वात्मानप्रा
माण्यं च गोचरयतीत्यंगीकारात्। ज्ञानस्य तथाभावोऽभ्युपगम्यतामिति चेत्। अंतःकरणपरिणतेर्ज्ञानस्य ज
डत्वेन स्वयंप्रकाशत्वायोगादिति। ननु प्रामाण्यं परतो ज्ञायते। अभ्यासदशायां सांशयिकत्वादप्रामाण्यवत्।
अप्रामाण्यं हि ज्ञानग्राहकातिरिक्तेन विसंवादादिनालिंगेनानुमेयमित्यत आह। अन्यथेति। अनवस्थालक्ष
णप्रतिकूलतर्कपराहतमनुमानमित्यर्थः। नन्वपौरुषेयत्वाद्वेदस्यैव पौरुषेयतया निर्दोषत्वेनास्य तत एव त
ज्जन्यज्ञानस्यापि प्राक्प्रामाण्यमनुमितं। तत्कथमिदानीं प्रामाण्यं स्वतएवेत्युच्यत इत्यत आह। न चेति। प्रा
माण्यस्येति विषयेण विषयिणो ज्ञानस्योपलक्षणं। नापौरुषेयत्वाद्युक्त्या वेदप्रामाण्यं ज्ञापितं प्रागित्य
र्थः। प्रामाण्यज्ञापनाय युक्तेरनुपन्यस्तत्वात्कथमनेनेत्यत आह। वुद्धीति। अनंतव्याघातादिदर्शनेन वेदविषयाया

प्रामाण्यशंका सा बुद्धिदोषदूष्यते। अथ मणिसिद्धिः। साक्ष्येव ज्ञानेन प्रामाण्यं च विषयीकर्तुं क्षमः। किंतु करणांतरोपनिपा
तजेन मानसापरोक्षेण प्रतिबद्धज्ञानमात्रं गृहीत्वा प्रामाण्यग्रहणास्वनेहे। यथा स्वयमेव गतिसमर्थोऽपि गजो गोक्षुर
कादिना प्रतिबद्धो न चलितुं क्षमते। न च युक्त्यनुसंधानलक्षणपरीक्षावसरः। सा च बुद्धिदोषमात्रं निरस्यति। त
स्मिन्निरस्ते साक्षी स्वमहिम्नैव प्रामाण्यं गोचरयति। यथा गोक्षुरकाद्यपसारणे स्वयमेव गजो गच्छति। ततः प्रा
चीनो युक्त्युपन्यासः साक्षिणः प्रामाण्यग्रहणप्रतिबंधकबुद्धिदोषनिरासार्थमिव वक्तो न तु प्रामाण्यज्ञाना
र्थमिति न पूर्वोत्तरविरोधः इति। एतेनैतदपि निरस्तं। यदाहोदयनः। यदि प्रामाण्यं स्वतो ज्ञायेत न कदाचिदपि प्रामाण्य
संशयो न स्यात्। ज्ञानत्वसंशयवत्। निश्चिते तदनवकाशात्। नहि साधकबाधकप्रमाणाभावमवधूय समान
धर्मादिदर्शनादेवासौ। तथा सति तदनुच्छेदप्रसंगात्। अथ प्रमाणवदप्रमाणेऽपि तत्प्रत्ययदर्शनाद्विशेषादर्शनाद्भ
वति शंकेत्यभिप्रायः। तत्किं प्रमाणज्ञानोपलंभेऽपि न तत्प्रामाण्यमुपलब्धं। प्रमाणज्ञानमेव वानोपलब्धं। आद्ये
कथं स्वतः प्रामाण्यग्रहः प्रत्ययप्रतीतावपि तदप्रतीतेः। द्वितीये कथं तच्छंका। धर्मिण एवानुपलब्धेरिति। धर्म्युपल
ब्धावपि व्याघातादिदर्शनेन साक्षिणि प्रतिबद्धे प्रामाण्यविषये मनसि संशयाद्युपपत्तेः। युक्तीनां बुद्धिदोषनिरासमा
त्रकारणत्वेन नतु वेदप्रामाण्यज्ञप्तिकारणत्वमित्येतत्कुत इत्यत आह। अदुष्टेति। यस्मिन्सत्येव यद्भवति नासति त

त्वन्तु तस्या कारयाः। सतीष्वेव च युक्तिषु बुद्धिदोषनिरासो भवति। नासतीषु। प्रामाण्यं त्वन्तर्व्याघातादनुसंधानरूपबु
द्धिदोषरहितानां पुंसां स्वत एव युक्त्यपेक्षां विनैव सिद्धमित्यनुभवसिद्धं। तस्मादुक्तयैव स्थैर्ययुक्तेति। संवादान्वयव्य
तिरेकानुविधायित्वात् प्रामाण्यज्ञप्तेस्तत्कार्यत्वमिति यत्तदप्यनेन निरस्तं। व्यतिरेकाभावस्यानुभवसिद्धत्वात्। एतेनैवा
नभ्यासदशायां सांशयिकत्वस्यासिद्धिरप्युक्ता वेदितव्या। बुद्धिदोषाभावेनाभ्यासदशापन्नज्ञाने प्रामाण्यस्या
पि निष्कंपस्यैव प्रतीयमानत्वात्। केचित्संशयस्यान्यथोपपन्नत्वादिति। स्यादेतत्। जलादिज्ञाने जाते सति तत्प्रामाण्य
शंकायां प्रवृत्तिसामर्थ्यं वा तज्जातीयत्वं वा प्रमाणांतरं तल्लिंगं यार्थमपेक्ष्यते। तदीयप्रामाण्यशंकायाम
पि प्रमाणांतरं। यत्प्रामाण्ये तु शंकैव नोदेति तत्र प्रमाणांतरसंवादोपि नापेक्ष्यते। अतः प्रामाण्यग्रहणस्य परतस्त्वे
पि नानवस्थास्ति। अस्ति चासावर्थो यः स्वप्नेपि न व्यभिचरति। तथाहि। जलज्ञानाज्जलार्थिनः प्रवृत्तिः। प्रवृ
त्तस्य प्राप्तिः। प्राप्तस्य पानं। पाने सत्युदन्यानिमित्तदुःखोपशांतिस्तल्लिंगं। ततो दुःखाभावस्य सुखस्य वानुभवः। न च
जलादिज्ञानस्येव दुःखाभावादिज्ञानस्यापि प्रामाण्ये कस्यचिच्छंकास्ति। तत्कस्य हेतोः। जलादिज्ञानस्य मरुमरी १८
चिकादौ व्यभिचारदर्शनात्। दुःखनिवृत्त्यादिज्ञानस्य क्वापि व्यभिचारादर्शनात्। अवश्यं चैतत्स्वतःप्रामाण्यग्रहवादि
नी नाप्यंगीकर्त्तव्यं। अन्यथा प्रामाण्यशंकानिवर्त्तनाय युक्त्यनुसंधानात्मकपरीक्षापेक्षायां तत्रापि परीक्षांतरापेक्षायामनवस्था

नस्वदुर्वारत्वात्। उक्तंच। न परीक्षानवस्था स्यात्साक्षिसिद्धेच संशयादिति तत्राह। न चेति। आकांक्षायां प्रामाण्यशंका
यां सत्यां प्रमाणांतरापेक्षत्वात्प्रामाण्यज्ञप्तेरिति न दोषः। कुतो न वा स्यादिति चेत्। यत एवं वदतः प्रामाण्यशंकानि
वृत्त्यैव प्रमाणांतरसंवादस्योपयोगो न प्रामाण्यज्ञप्त्याविष्कृतं स्यात्। अन्यथा शंकाभावेपि प्रामाण्यज्ञानार्थं
प्रमाणांतरसंवादानवस्थाभावेन व्यवस्थानादवस्था स्यात्। तथा वा स्वतस्त्वमेवांगीकृतं न भवेत्। तत्कथमिस्यत आह।
आकांक्षायामेवेति। परेणोक्तमाकांक्षानिवृत्तौ प्रमाणांतरस्योपयोग इति। अस्यापि स्वबुद्धिदोषनिरास इति।
आकांक्षा च बुद्धिदोषश्चेत्यनर्थांतरमिति। अवश्यं वेद्यत्वाभावान्नानवस्थेत्यभिप्राय इति चेत्। न। निःशंकप्र
वृत्तो वक्तव्यत्वे वेद्यत्वात् ज्ञाने हि ज्ञाते न प्रामाण्यानुपलब्धौ कथं संशयो न स्यात्। सति च प्रामाण्यसंशयेर्थसं
शयोपि कथं न भवेत्। तथा च कथं निःशंका प्रवृत्तिः स्यात्। यद्यपि लोके संशयवतोपि प्रवृत्तिर्भवति। तथापि न बहु
तरशारीरायासवित्तव्ययादिसाध्यपारत्रिकी प्रवृत्तिस्तथा भवितुमर्हति। ज्ञानं स्वरूपेणैव प्रवृत्तिहेतुर्न तु तज्ज्ञा
नमपेक्ष्यत इति चेत्। तथापि सुखादिवत्सत्यां सामग्र्यां वेद्यत्वापरिहारात्। सुखादिकमनुभूतिं न ग्राह्यं। न
तु तथा ज्ञानं। अन्यथा सुषुप्त्याद्यभावप्रसंगादिति चेत्। तथा सत्यप्रामाणिकस्य ज्ञानस्यासत्वप्रसंगात्। साक्षि
वेद्यत्वपक्षे सुषुप्त्याद्यभावप्रसंगाभावात्। किंच। परलोकार्थप्रवृत्तिमतो बुभुत्साप्यवर्जनीयैव। अन्यथा कथं

तत्प्रामाण्यनिश्चयाय तज्जातीयत्वादिकमन्वेष्यत इति। यद्येवं ज्ञानग्राहकमात्रेणैव प्रामाण्यग्रहणमि
ति प्रामाण्यस्य स्वतस्त्वे स्यात् तदा ज्ञानग्राहकस्य साक्षिणः प्रामाण्यग्रहणस्वभाव इत्युक्तं भवति। परानपेक्ष
स्य स्वभावत्वात्। तथा च बौद्धादिवाक्यजनितज्ञानस्यापि साक्षी प्रामाण्यं गृह्णीयात्। स्वभावस्यानपायात्।
स चाव्यभिचारी संगीकरणीयः। अन्यथा परीक्षानवस्थायां दुष्परिहरत्वापत्तेः। ततश्च तदपि प्रमाण
मित्यापद्येतेत्यत आह। दुष्टेति। ज्ञानग्राहकः साक्षी प्रमाणतयैव गृह्णातीत्युक्तं सम्यगेव। विसंवादलक्षणात्
रतोपवादाद् अप्रामाण्यं वा गृह्णाति। सहकारिणः सहजशक्तिं प्रतिबध्य विपरीतशक्तिं जनयतीति हि प्रसि
द्धं। दावदहनदग्धानां वेत्रबीजानां वेत्रांकुरमजनयित्वा कदलीकाण्डजनकत्वस्य दर्शनात्। अस्ति च
बौद्धादिज्ञानस्य विसंवाद इति तदप्रामाण्यतया साक्षी गृह्णाति। विसंवाददर्शनिमप्रामाण्यग्रहण
कारणमित्यत्र दृष्टान्तः। दुष्टबुद्धीनामेवाप्रामाण्यशंकेतीति। विसंवाददोषकलुषितमनसां पुंसां
वेदजनितविज्ञानेऽप्रामाण्यशंका दृष्टैवेति हेतोरिति। नात्राप्रामाण्यशंका साक्षिणः किंतु मनस एव। य १८
त्किंचिद्व्यभिचारिस्यादर्शने मानसं संहितत्। इत्युक्तत्वात्। अतः सामान्यमात्रे दृष्टान्तोयमिति ज्ञातव्यं। अथवा
यदि प्रामाण्यं ज्ञानग्राहकमात्रग्राह्यं स्यात् तर्हि प्रामाण्यमपि तथा स्यात्। ज्ञानधर्मत्वाविशेषात्। तथा च वेदजनि

तज्ज्ञानस्यप्रामाण्यमिवाप्रामाण्यमपिसाक्षिगृहीतमित्याशङ्क्यनिरसनमाह। दुष्टबुद्धीनामेवेति। नप्रामाण्यमिवाप्रा-
माण्यमपिज्ञानग्राहकमात्रग्राह्यंयेनोक्तदोषःस्यात्। किंतर्हि। परतोविसंवाददर्शनेनानुमीयते। नचवेदजनितवि-
ज्ञानस्यतत्त्वतोविसंवादोऽस्ति। कुतोऽयंविभागइत्यतउक्तंदुष्टेति। अनेनाप्रामाण्यग्रहणस्ययुक्त्यनुसंधानएव
भावोऽन्यथाभावउक्तोवेदितव्यः। दुष्टबुद्धीनामितिश्लोकेतिनप्रकृतेवेदजन्यज्ञानोपक्षयोक्तेः। वस्तुतस्तुवि-
संवादानुसंधानवतामेवाप्रामाण्यज्ञप्तिर्नत्विहहिनानाभिस्वव्यभिचरितानन्यथासिद्धान्वयव्यतिरेकस-
द्भावादनुमेयमेवाप्रामाण्यंनपुनर्ज्ञानग्राहकमात्रग्राह्यमित्युक्तं[illegible]केज्ञातव्यं। प्रामाण्यग्रहणस्यतुयुक्त्यनु-
संधानापेक्षानास्तीतिप्रागेवोक्तं। अदुष्टबुद्धीनांस्वतएवसिद्धत्वात्प्रामाण्यस्येति। ननुचैवंसतिविसंवादाभा-
वेसतिप्रामाण्यंप्रतीयतइतितदपिपरतएवस्यान्नस्वतइत्यतआह। प्रामाण्यंचेति। नहिदाहाभावएववेत्रबीजंवे-
त्राङ्कुरंजनयतीत्येतावतादाहाभावोवेत्राङ्कुरस्यकारणंभवति। किंतुततोविपरीतकार्यानुत्पादेसतिवेत्रबीज-
स्वमहिम्नैवाङ्कुरंकरोति। अन्यथोत्सर्गापवादौक्वापिनस्यातामितिभावः। किंच। अप्रामाण्यग्रहणकारणाभावस्यापिप्रा-
माण्यग्रहणोपयोगाङ्गीकारेऽपिनप्रकृतेकाचिदस्माकंहानिरिति। ननुतथापिनापौरुषेयत्वंवेदस्योपपद्यते। तस्यव-
र्णसमुदायरूपत्वात्। वर्णानांचोच्चारणेनोत्पाद्यमानत्वात्। नचोत्पत्तिमतांसमुदायिनांसमुदायोनोत्पत्तिमानिति

युज्यते। न च वाच्यं प्रागुच्चारणादनुपलब्धा वर्णा उच्चारणोत्तरमुपलब्धाः पुनर्नोपलभ्यन्त इत्येवानुभवसिद्धं न तु ते-
षामुत्पत्तिर्विनाशो वा न चोपलब्ध्यनुपलब्धिमात्रेणोत्पत्त्याद्यध्यवसायो युक्तः तथा सत्युपलब्ध्यनुपलब्ध्योर्नी
घटादीनां तदेतोत्पत्त्यादिप्रसंगादिति। वर्णास्तावन्न घटादिवदन्यत आगतास्तान्यत्र गताः। अमूर्त्तत्वात्। तदपि
गुणत्वात्। द्रव्यत्वेपि सर्वगतत्वात्। अणुत्वेऽतीन्द्रियत्वापत्तेः। मध्यमपरिमाणत्वे नित्यत्वविरोधात्। नापि कुत्रचिला-
गारवत्त्वादनुपलब्धिः। आवरणापगतावुपलभ्य पुनस्तदुपनिपाते नोपलभ्यन्ते। आवरकानुपलम्भात्। अमूर्त्त-
त्वेनावरणानुपपत्तेश्च। न चेन्द्रियदोषादनुपलब्धिः। वर्णान्तरोपलब्धेः। न च श्रोतुरनवधानं। अवधानेप्यनु-
पलम्भात्। न चातीन्द्रियाः। उच्चारणेप्यनुपलब्धिप्रसंगात्। न च सहकार्यभावः। अन्वयव्यतिरेकवतस्तस्यानुपलम्भा-
त्। उच्चारणं सहकारीति चेत्। न। आकिंचित्कुर्वतः सहकारित्वानुपपत्तेः। न च व्यंजकं भिन्नदेशत्वात्। उच्चारणं हि व-
क्तृवक्त्रे वर्त्तते। वर्णास्तु श्रोत्रदेशे प्रतीयन्ते। नहि विभिन्नदेशयोर्घटालोकयोर्व्यंग्यव्यंजकभावोस्ति। तस्माद-
गमनाद्यनुपपत्तावुच्चारणानंतरोपलब्धिर्वर्णानां तदुत्पाद्यत्वेनैवोपपद्यते। अन्यथा कुलालव्यापारानंतरप- २०
लभ्यमानो घटोपि तदनुत्पाद्य आपद्येत। तदेवं समुदायिनां वर्णानां पुरुषव्यापारोत्पाद्यानां वीचीतरंगन्यायेन
श्रोत्रदेशावर्णान्तरजनकत्वं तेषां वोपलब्धिरित्येवं तत्समुदायरूपस्य वेदस्यापि पौरुषेयत्वमेव युक्तमित्यत आह।

नवोच्चारणेति। सामीपिकाधिकरणे सप्तमी। उच्चारणकालानन्तरमेवेत्यर्थः। उच्चारणस्य कालः उच्चारणकालः।
आनन्तर्यलक्षणश्च सम्बन्धः षष्ठ्यर्थ इति वा। तदनन्तरमेव विनाशोऽस्येति विग्रहः। कुतो नवाशमितो व्यंजकभा
वाभावाभ्यामेवोपलम्भानुपलम्भौ उच्चारणं तु व्यंजकजनकत्वेनोपयुज्यते। व्यंजकाश्च ध्वनयस्ते च नाभसाः इत्या
दिकं तु कुमस्याश्च कल्पनाया वर्णानामनादिनित्यत्वास्थितौ नावेवेसम्भवाच्च साधकमुपस्थाप्याङ्गीकारे चबाधकं प्रमा
णं हेतुत्वेनाह। तदेवेदमिति। उच्यते अभिधीयते। ध्वनिनेनेति वर्णाभिव्यञ्जकेन शब्देन गृह्यते। पूर्वं गकारश्रुतवतः पुनस्त
च्छ्रवणे स एवायं गकार इति निरावरणप्रत्यभिज्ञा जायते। सा च श्रूयमाणगकाराभेदं गोशब्दस्योच्चारणजन्यत्वं वि
रुणद्धि। नहि प्राक्तनस्येदानीन्तनेनाभेदः संयुज्यते। एवं पूर्वपूर्वेतरस्मिन्ननादिनित्यत्वेनैव वर्णानां प्रत्यभिज्ञया सिध्यति।
अत्र केचित्। तानेव शाटकानाच्छादयामः तानेव शालीन्भुंज्महे इतिवत् एवमेव वर्णा इति व्यपदेशमात्रमित्याचक्ष
ते। तदसत्। प्रत्यभिज्ञानस्य साक्षिसिद्धत्वात्। तदिदमुक्तं प्रत्यभिज्ञेति। प्रत्यभिज्ञैवेयं न व्यपदेशमात्रमिति भावः। अप
रे तु गत्वादिजातिविषया प्रत्यभिज्ञा न तु वर्णविषयेत्याहुः। तदप्यसत्। सामान्यनित्यतायाः प्रमाणविरुद्धत्वात्। वर्ण
विषयत्वस्य स्पष्टप्रतिभासत्वाच्च। अन्ये तु मन्यन्ते। गौरित्यत्र गकारौकारविसर्जनीयेभ्यो व्यतिरिक्तः पदस्फोट एव प्रत्य
भिज्ञायते इति। एतदप्ययुक्तं। वर्णातिरिक्तस्फोटप्रमाणाभावात्। एकं पदमिति प्रत्यक्षं प्रमाणमिति चेत्। न। भिन्नेष्वपि वर्णे

थैकार्थाभिधानोपाधिनैकत्वस्य संभवात्। एकदेशावस्थानेन निमित्तेनानेकेष्वेव तरुषु वनमितिवत्। तदपि वर्णानामि
तिप्रकृते वचनग्रहणेन सूचितं। न वर्णाः प्रत्येकमर्थमभिदधति। अनेकवर्णोच्चारणवैयर्थ्यापत्तेः। नापि समुदि
ताः। क्रमवर्तां समुदायानुपपत्तेः। नित्यत्वेपि प्रतीतानामेवार्थाभिधायकत्वं प्रतीतस्य च क्रमभाविन्य इति न समुदायः
संभवति। अतो वर्णैरनुपपद्यमानमर्थाभिधानं तदतिरिक्तं पदस्फोटं कल्पयतीति चेन्न। न। एकबुध्यारूढत्वे
न वर्णानामेवार्थाभिधायकत्वोपपत्तेः। तदिदमुक्तं वचनमिति। एवमेव पदातिरिक्तवाक्यस्फोटनिराकरणाय व
र्णेषु प्रकृतेष्वपि तद्वदेव स्यादिति वेदग्रहणं। तदेव वेदवाक्यमिति वाक्यग्रहणं करिष्यति। वर्णानामेव पदबुद्धिविषया
णामन्वितस्वार्थाभिधायकत्वेन वाक्यार्थवेदनसंभवे तदतिरिक्तवाक्यस्फोटकल्पकाभावादिति। अन्यथा वर्णा
नां स्फोटव्यंजकत्वमप्यनुपपन्नं। प्रत्येकं समुदितविकल्पस्य तत्रापि संभवात्। प्रथमोच्चारितेनैव वर्णेनाभि
व्यक्तोपि स्फोटो द्वितीयादिवर्णोच्चारणेन विशदीक्रियत इति चेन्न। न। निरवयवस्य वैशद्यावैशद्यकल्पनानुपपत्तेः।
न च गकारमात्रश्रवणेऽविशदापि पदप्रतीतिरनुभूयते। अतो वर्णविषयैवेयं प्रत्यभिज्ञेति स्थितं। अस्तु तथापि
नानया वर्णानां नित्यत्वं सिध्यति। यतः पूर्वोच्चारितेन गकारेणेदानीमुच्चारितस्य गकारस्य सादृश्यात् तन्निबंधना २१
भ्रांतिरेवेयं। यथा परिलूनपुनर्जातकुन्तलकलापयोः सादृश्यात् स एवायं कुंतलकलाप इति प्रत्यभिज्ञाभ्रांतिरित्य

नन्वाह ॥ नवसादृश्यादिति ॥ कुतो नवा स्यामिति चेत् वैषम्यात् । युक्तं कुंतलकलापप्रत्यभिज्ञाया भ्रांतित्वकल्पनं । परि
लूनकुंतलकलापस्य भ्रमोपपत्तिः तस्य तदन्यत्वेनायमसाविति बाधकप्रत्ययोदयात् । न चात्र तथा बाधकप्रत्ययोस्ति । ए
वमेव भ्रांतिकल्पने चातिप्रसंग इति भावः ॥ ननु वर्णेष्वपि तीव्रमंदत्वादि विरुद्धधर्माध्यासेन भेदानुमानं प्रत्यभि
ज्ञाया बाधकं विद्यते । विरुद्धधर्मोपि करणानामप्यभेदे कुत्रापि भेदाभावप्रसंगेन निरवकाशमनुमानं प्रत्यभि
ज्ञाप्रत्यक्षमपि बाधितुं क्षमत एवेति चेन्न । किं यादृशं तादृशो विरुद्धधर्माध्यासो भावभेदहेतुरंगीक्रियते उत विशिष्टः ।
आद्येतिप्रसंगमाह । सोयमिति । तथात्वे देवदत्तादेरपि शिखी मुंडी जटिल इति विरुद्धधर्माध्यासेन भेदप्राप्तेः ।
सोयं देवदत्त इत्यादेरपि प्रत्यभिज्ञाया भ्रांतित्वप्राप्तेः ॥ यत्र देशकालपुरुषावस्थादिभेदस्य व्यवस्थापकस्याभाव
स्तत्रैव विरुद्धधर्माध्यासो भेदहेतुरिति द्वितीय एव पक्षोंगीकरणीयः । यथा जीवेश्वरयोः सर्वज्ञत्वाल्पज्ञत्वादिरूपः ।
न च तथाविधो विरुद्धधर्माध्यासो वर्णेष्वस्ति । एकस्यैव वर्णस्य कालभेदेनोच्चारयितृपुरुषभेदेन नासिकास्था
नभेदेन विरुद्धधर्माध्यासोपपत्तेः । केनापि प्रकारेण यज्ज्ञानद्वयप्रामाण्यानुपपत्तौ खल्वन्यतरस्याप्रामाण्यमंगी
करणीयमित्याशयः । ननु वैशेषिकादयो देवदत्तादेरपि पार्थिवद्रव्यस्य पाकेन प्रतिक्षणमुत्पत्तिविनाशावंगीकुर्वाणाः
सोयमिति प्रत्यभिज्ञाया भ्रांतित्वमंगीकुर्वंत एव तत्कथमिदमापादनमिति चेत् । सत्यं । तथापि पार्थिवपरमाणुरूपादि

परिवर्त्तनाकाशादिषु च शब्दादिभावाभावेन प्राप्तस्यातिप्रसंगस्य कः प्रतीकारः। एतदेव दर्शयितुमिति सादेरिसादिग्रह
णकृतं। किंच। पाकेन देवदत्तादेरप्यापरमाणु विनाशे पुनर्द्व्यणुकादिप्रक्रमेणोत्पत्त्यंगीकारे प्रत्यभिज्ञाभ्रां
तित्वाभ्युपगमोनुपपन्न एव। तथासति सौगतैः सह विवादाभावप्रसंगात्। पार्थिवं सर्वं द्रव्यं देवदत्तसमानं। आ
प्यतैजसवायवीयानां च वायुपघातादिमात्रेणावयवापगमोस्त्वेव। आकाशस्य स्थायित्वं तैरप्यंगीकृतमेव। आ
त्मानुस्वरूपत एव नांगीकृतः। तथा कर्मसामान्यविशेषसमवायाः गुणाश्च द्रव्यातिरिक्ता न सन्त्येव केवलं परमाणुषु
विवादोवशिष्यते। तेषां चातीन्द्रियत्वेनास्मत्प्रत्यभिज्ञागोचरत्वेन स्थायित्वसाधनोपायाभावः। निबिडावयवं स्फटि
कादिकं विवादपदमिति चेत्। न। तस्यापि प्रबलवातातपाद्यभिघातेनावयवव्यपगमस्यावर्जनीयत्वात्। पूर्वापरक
लाविकलकालवर्त्तित्वं क्षणिकत्ववादिनैवाभ्युपगतं। वैशेषिकादिभिस्त्वाशुविनाशित्वमिति चेत्। सत्यं। अयं तु
विवादो न प्रत्यभिज्ञामात्रेणानिस्तरणीयः। नन्वस्माभिरपि देवदत्तादेराशुविनाशित्वेन भेदोंगीक्रियत एव। सत्यं।
परिणामवादे ऽभेदस्यापि विद्यमानत्वेन सोयमिति प्रत्यभिज्ञानस्याभ्रान्तत्वोपपत्तिः। अवयवोपचयापचयनि
मित्तकपरिमाणभेददर्शनेन देवदत्तादौ परिणामोंगीक्रियते। न च वर्षेषु परिणामज्ञापकं किमप्यस्तीत्यसताभेदः २२
कुटस्थनित्यत्वं वाभ्युपगम्यते। अत एवात्र सोयमिति निरवधारणमुक्तं। तत्र तु तदेवेदमिति सावधारणमिति।

विरुद्धधर्माधिकरणत्वमात्रस्य भेदहेतुत्वमंगीकृत्य प्रत्यभिज्ञाभ्रांतित्वांगीकारेतिप्रसंग इति। एवं देशादिभीवि
कावैशेषिकादीनां। तैः स्थायिनः पदार्थस्यांगीकृतत्वात्। यस्तु बौद्धः सर्वस्य क्षणिकत्वमंगीकृत्य प्रत्यभिज्ञामा
त्रस्य भ्रांतित्वमंगीकरोति तस्य तु तथांगीकारेपि न कश्चिद् इति प्रसंग इत्यत आह। सर्वे ति। दिक्शब्देनात्र काशो ग
ह्यते। अयथाकृताकाशस्यैव दिक्त्वज्ञापनार्थं। आदिग्रहणेन सोपायविनाशद्वयस्य ग्रहणं। कुत इत्यत आह। पंचेति
रूपसंज्ञावेदनासंस्कारविज्ञानलक्षणाः पंचस्कंधा एवार्थक्रियाकारित्वरूपसत्त्वयोगात् क्षणिकाः। तत्र रूप
रसगंधस्पर्शशब्दात्मका परमाणवो रूपस्कंधः। सविकल्पकं ज्ञानं संज्ञास्कंधः। सुखदुःखे वेदनास्कंधः। समनं
तरप्रत्ययः संस्कारस्कंधः। निर्विकल्पकं ज्ञानं विज्ञानस्कंधः। आकाशस्य प्रतिसंख्याप्रतिसंख्यानिरोधाख्ययोर्द्व
योर्विनाशयोश्च पंचस्कंधेभ्योन्यत्वान्नित्यत्वमिति बौद्धसिद्धांतः। यथोक्तं। आकाशो द्वौ विनाशौ चानित्यं त्रयमसंस्कृ
तमिति। विनाशद्वयस्वरूपं च। बुद्धिपूर्वो विनाशो हि प्रतिसंख्यानिरोधधीः। अबुद्धिपूर्वकस्तेषां निरोधो प्रतिसं
ये ख्यैति। तस्मादाकाशादीनां नित्यत्वात् तद्विषयप्रत्यभिज्ञाया भ्रांतित्वं बौद्धेनापि न वाच्यं। आस्ति चाकाशादीनां याद
शानां दशाविरुद्धधर्माधिकरणत्वं। तेन तन्मात्रस्य भेदहेतुत्वांगीकृता चाकाशादीनामपि भेदप्रसंगेन तत्प्रत्यभि
ज्ञाया अपि भ्रांतित्वं स्यादिति स्वभवस्येव बौद्धस्य प्रसतिप्रसंगाभिधानमिति भावः। यद्यप्यत्र सर्वक्षणिकत्वनिराकरणे

१५०८।०

स्त

२६ नाप्यनरस्याप्येतवकुं। तथाप्यतिप्रसंगकथनप्रस्तावे तदुक्तसाधनस्यैवौचितत्वान्न तदत्रोक्तं। एतच्चान्यत्र सर्वक्ष
णिकत्वनिरासः। पंचस्कंधेष्वपि इति विशेषणविशेष्येणानेन विशेषणसमासोऽयं। ननु न हि नार्थे स्वादिना समा
हारद्विगुः। अतः पंचस्कंध्यां इति नोक्तं। अत्र बौद्धैकदेशिनो विज्ञानशून्यवादिना वा हेतुः। स्यादयं प्रसंगः सौत्रांति
कादीनां। यैर्दिशो नित्यत्वमंगीकृतं। नास्माकं। विज्ञानातिरिक्तं शून्यातिरिक्तं वा सर्वं भ्रांतिकल्पितमित्यंगीकारात्।
तत्र दिगेव भ्रांतिकल्पिता। कुतस्त्या नित्यत्वं कुतस्तरां तत्प्रत्यभिज्ञायां अभ्रांतत्वं। येनातिप्रसंगः स्यादित्यत आह।
न वर्ण्या एवेति। दिगिति प्रकृते दिक्शब्द इति वचनं दिशो बहुत्वमपि सत्यमिति ज्ञापनार्थं। तेनैकैव दिगुपचारेण द
शव्यवहारभागिति वदंतो वैशेषिकादयो निरस्ता भवंति। श्रुतिस्मृतिलोकव्यवहारव्यवस्थिता इत्येतावता अत्र सत्ज्ञा धोपन्नातर इत्युक्तं
पित्रादिस्वरूपं तच्छब्दवाच्यत्वं वा वास्तवं संभवतीति। ननु यदि दिशां भ्रांतिविषयत्वमंगीकृतं तदा मिथ्यात्वं सिद्ध
मेव शुक्तिरजतादिवदिति चेत्। किमारोप्यतया भ्रांतिविषयत्वं मिथ्यात्वे हेतुत्वेन विवक्षितमुताधिष्ठानतया अथ सा
धारण्येन। आद्ये सिद्धसाधनं। आरोप्याया दिशो मिथ्यात्वेनांगीकारात्। आरोप्यस्य मिथ्यात्वेपि प्रधानस्य सत्त्वोपप
त्तेः। द्वितीयतृतीयौ निराकरोति। साध्येति। साध्यांतिश्च सत्यत्वेनांगीकृतयोर्विज्ञानशून्ययोरधिष्ठानयोर्विषये भवती २६
ति। तेषां विज्ञानवादिनवादिनां शून्यवादिनां च संमतेः। कथमित्यत आह। वादीति। अस्ति खलु वादिनां विज्ञानविषये शून्यवि
षये च विप्रतिपत्तिः। नोक्तरूपविज्ञानं शून्यं वा न तत्त्वमिति वैशेषिकादिभिरभ्युपेतत्वात्। सा च तेषां प्रतिपत्तिर्भ्रांतिरिति परेणावश्य

सिद्धस्य दशत्वस्य निष्कारणमुपचरितत्वं ग्रहणानुपपत्तेः। कुतो नेति चेत्। किं दिशां भ्रांतिकल्पितत्वं केनचि
त्प्रमाणेनोच्यते एवमेव वा। नाद्यः। प्रपंचमिथ्यात्वं प्रमाणानामन्यत्र दूषितत्वात्। असाधारणप्रमाण
स्यानुपलंभात्। न द्वितीयः। अतिप्रसंगादित्याह। विज्ञानेति। प्रमाणेन विनैव भ्रांतिकल्पितत्वकल्पनस्य
सत्यत्वेनाभ्युपगतयोर्विज्ञानशून्ययोर्विषयेपि कर्तुं शक्यत्वात्तयोरपि भ्रांतिकल्पितत्वमापद्येतान
नु यस्य स्वरूपमेव परोपाधिनिबंधनं तन्मिथ्या यथांगुल्यवष्टंभनयनोपाधिनिमित्तोपरश्चंद्रमाः। परो
पाधिकं च दिक्स्वरूपं। आदित्योदयादिनैव दिक्कल्पनात्। तत्कथं दिशो भ्रांतिकल्पितत्वे प्रमाणाभाव
इत्यत आह। न चादित्येति। कुतो नेति चेत्। किं दिक्सामान्यस्वरूपमादित्योदयादिकल्प्यं। उत तद्विशेष
स्वरूपं। नाद्य इत्याह। अंधकारेपीति। पराभिमतोपाध्यभावोपलक्षणमंधकारग्रहणं। यदि दि
क्स्वरूपमौपाधिकं स्यात्तदुपाधिं विना नोपलभ्येत। न हि नयनस्यांगुल्यवष्टंभनं विना परश्चंद्रमा
उपलभ्यते। उपलभ्यते चोपाधित्वाभिमतादित्योदयाद्यभावेपि दिक्स्वरूपं। न कथं तदुपाधिकं स्यात्।
अवकाशमात्रं हि दिगिति स्फुट्यते। तच्च परनिरपेक्षेणैव साक्षिणा सर्वावस्थासु भासमानमात्रस्य सिद्धं।

२८ कथमन्यथांधकारे करप्रसारणमपि कुर्युः। द्वितीयेपि दिग्विशेषस्वरूपमात्रमादित्योदयादिना कल्प्यमुन्नतदीयश्च
श्यादित्ववा। तत्राघस्येन दवोन्तरं। अंधकारेपीति। अंधकारे भागाएव हि दिग्विशेषाः तेषामादित्योदयादिनिरपेक्षे
णसाक्षित्वेव प्रतीयते। कथमन्यथा तदभावेपि मूर्त्तेनिरावच्छेदावकाशभागपरित्यागेन भागांतरे करप्रसार
णादिकं क्रियते। नच भागानामौपाधिकत्वं। स्वतोनिर्भागस्योपाधिनापि संबंधाभावात्। प्राच्यादित्वमपि
यदि तत्स्वलक्षणात देतदेवोत्तरं। अंधकारेपीति। अथ प्राच्यादिशब्दवाच्यत्वं। तदपि शब्दार्थसंबंधस्यौ
त्पत्तिकत्वेन न काल्पनिकं। एवं तर्हि दिक्प्रतीत्यर्थिनः किमित्यादित्योदयादिकं प्रतीक्षंत इत्यत आह। कादाचि
त्केति। दिक्स्वरूपतद्विशेषयोः सिद्धत्वेपि दिगंतरे दिगंतरभ्रांतिं निवर्त्तयितुमेव तत्प्रतीक्षणं। भ्रांतिरपि न स
र्वदा तत तस्तत्प्रतीक्षणमपि न सर्वदेति सूचयितुं कादाचित्केत्युक्तं। तेन हि दिक्प्रतीतावादित्योदयाद्यपेक्षा
भावः स्पष्टीकृतो भवति। अनेन प्राच्यादिशब्दव्युत्पत्तावादित्योदयादिनामुपलक्षणत्वेनोपात्तत्वान्नदर्थमप्यु
पयोगइति सूचितं। दिगंतरे दिगंतरभ्रमस्य तद्विषयत्वात्। ननु दिशो वास्तवत्वे स्तंभादिवघवच्छिन्नत्वं स्यात्। २८
स्तंभो हि सर्वान्प्रति स्तंभ एव। न चैवं दिक्। अस्माकं प्राच्या अन्येषां प्रतीचीत्वात्। मैवं। दिक्स्वरूपमधि
कृत्यैतदुच्यते उत प्राच्यादिशब्दवाच्यत्वं। नाद्यः। स्वरूपस्य व्यवस्थितत्वात्। न द्वितीयः। संबंधिशब्दत्वात्। न हि पिता
पुत्रादिशब्दाश्च

मंगीकार्यं। तथा चोक्तविधया भ्रान्तिविषयत्वमनैकान्तिकमिति प्रकृतमुपसंहरति। अतो दिग्नाग इति। अतो बाधकप्रमाणाभावा
त्साधकस्य साक्षिणो भावाच्च विज्ञानं ज्ञानान्यद्बहिराः सत्या एवेति बहिरेवोपसंहर्तव्यं। नत्वयं द्वितीयः स्कन्धे यो पसंहारः। न
त्रातइति प्रत्यभिज्ञानादित्यर्थः। केश्चिद्विज्ञानवादिभिर्विज्ञानस्य स्कन्धे यन्नांगीकृतमिति ज्ञान्यवदेवेत्युक्तं। अनेन प्रागु
क्तस्यातिप्रसंगस्य विपर्यये पर्यवसानं चोक्तं भवति। अस्तु दिग्नाग स्कन्धे यो किं ततः प्रकृत इत्यत आह। अतस्तदिति।
अत इति परामृष्टं दर्शयति। तदेवेदमिति। वेदस्यानित्या स्यामिति वेदवर्णा एवोच्यन्ते तेषामेव प्रकृतत्वात्। तात्पर्यं तु प्रा
गेवोक्तं। अथ वा वर्णस्कन्धे यो वर्णनं कुत्रोपयुक्तमित्याशंक्य वेदस्यापीत्युक्तं। वर्णानां वेदस्यापीति योजना। वेदापौ
रुषेयत्वस्य बाधकत्वेन वर्णानामुत्पत्तिविनाशित्वे परेणोपन्यस्तत्वात्तस्य परिहृतत्वान्निराबाधं वेदस्कन्धे यं मपौ
रुषेयत्वं सिध्यतीति। न केवलं बाधकाभावान्नाप्यनुमानमात्रात्किं तर्हीत्यत आह। तदेवेदमिति। यद्वर्णक्रमा
द्रूपेण पूर्वमध्यायि श्रुतं तदेव तद्वर्णक्रमाद्रूपेण मेवेदं श्रूयमाणं वाक्यमिति प्रत्यभिज्ञानाद्दर्वाचीनपुरुषस्वातंत्र्याभाव
स्तावत्प्रतीयते। एवं पूर्वतरपूर्वतममपि व्यत्यासाभावस्तावत्सिद्धः। आदिसृष्टौ तु वक्ष्याम इति भावः। किं च। सामान्यसि
द्धिपरिशेषाभ्यामपि वेदस्यापौरुषेयत्वं सिध्यति। तथाहि। अस्ति तावद्धर्माधर्मस्वर्गनरकादिसुखदुःखादिना प्रतिपत्ति
र्यस्तु नान्तागीकरोति सोऽपि पूर्वोक्तप्रकारेण बोधनीयः। ते च प्रमाणोपेताः वस्तुत्वात् घटवत्। न च प्रामाणिकार्थस

१०८१०

२५ तेषां संप्रतिपत्तिः संभवति। अतिप्रसंगात्। एवं सर्ववादिनां सर्वप्रतिपत्तिमूलत्वे धर्मादिविषये प्रमाणे सामान्यतः सिद्धे तस्य
परिशेषेणापौरुषेयत्वे साधयितुं प्रसक्तप्रतिषेधं तावत्करोति। न चानुमानादीनामिति। आगमं विनेत्यपौरुषेयवाक्यव्य
तिरिक्तानामित्यर्थः। न तत्रानुमानं प्रत्यक्षं पौरुषेयवाक्यानामित्युक्तं भवति। प्रत्यक्षस्य धर्मादिविषयत्वं प्रसंभावितं। त
थापौरुषेयागमस्य पूर्वोक्तन्यायात्। किंतु प्रमाणत्वमात्रेण तयोः प्रसक्तिः। अनुमाने संभावितमिति तद्दादित्वेन ग्रहणं।
कुतो [illegible] ने सत आह। तदिति। धर्मादीनामनुमानाद्यगोचरत्वात्। ननु अनुमानादीनि धर्मादिषु प्रमाणानि न भवंति।
धर्मादीनां ~~प्रत्यक्षानुमे~~ तदगोचरत्वादिति व्यधिकरणत्वं। मैवं। यो यदगोचरो न भवति तत्र न तत्प्रमाणमिति व्याप्तिसं
भवेनादूषणत्वात्। अथवानुमानादीनि धर्मादौ प्रमाणानि न भवंति। अतद्गोचरत्वात्। धर्मादीनि वान्यानुमाना
दिभिर्न प्रतीयंते तदगोचरत्वादिति प्रयोगद्वयमत्राभिप्रेतं। एवमपि साध्याविशिष्टतेति चेत्। नाफलाभावस्य सा २५
ध्यत्वात्। सामर्थ्याभावस्य साधनत्वात्। तथाहि। प्रत्यक्षं न तावद्ग्राहं। तस्य रूपादिमति द्रव्ये तदीयेषु गुणक
र्मसामान्येष्वेव सामर्थ्यात्। नापि मानसं। सुखादिवद्धर्मादावनुभवानुव्यवसायाभावात्। अन्यथा सुखमनु
भवामीतिवद्धर्ममनुभवामीति स्यात्। स्वर्गादीनां तु विप्रकृष्टत्वान्न प्रत्यक्षगोचरता। न च योगादिसिद्धानां
प्रत्यक्षमस्मदतींद्रियार्थविषयार्थविषयमिति वाच्यं। तस्याप्यपौरुषेयवाक्यं विना सिद्धेः। तदिदमुक्तमागमे

विनेति। किंच। तेषां तेन धर्मादिसिद्धावप्यस्माकं तन्निश्चयोपायो नास्ति। न ह्यस्मदीयेन प्रत्यक्षेणान्यस्य निश्चयोनु
ष्ठानं वा संभवति। नाप्यनुमानेन। तत्र तद्व्याप्तिलिंगाभावात्। सामान्यतो दृष्टेन कथंचित्स्वरूपमात्रसिद्धावपि न
साधनफलसंबंधरूपस्तद्विशेषो नुमातुं शक्यः। न यत तदनिश्चये नुष्ठानं संभवति। न येन धर्ममीमांसानुपप
त्तिः। अपौरुषेयवाक्येन धर्मादिप्रतिपत्तौ तदितिकर्तव्यतात्वेन मीमांसाया उपयोगांगीकारात्। एतदप्युक्तं
आगमं विनेति। न ह्यपौरुषेयं वाक्यं पुरुषाणामज्ञानादिसंभवेन धर्माद्युपदेष्टृत्वविश्वासानुपपत्तेः। न त्वम
न्वादिष्वाश्वासो दर्शयन इति वाच्यं। अपौरुषेयवाक्यमूलत्वनिश्चयेनैव तत्राप्याश्वासात्। एतदप्युक्तं आग
मं विनेति। एवं प्रसक्तप्रतिषेधं विधायेदानीं परिशेषसिद्धमर्थमाह। अ[illegible]ति। अत्रानुमानादिभिर्हि धर्मादिसिद्धेरिति
वक्तव्ये ऽपौरुषेयवाक्येनैव धर्मादिसिद्धेरिति वचनमपौरुषेयवाक्यांगीकारेण कार्यविदनुपपत्तेरिति सूचयि
तुं तद्वाक्यं वेद एव परिशेषात्। तदतिरिक्तानि हि कर्तृअस्तित्वमन्ति। न च धर्मादिव्यवस्थापराणि न वेदवेदइति
भावः। नन्वेवं सति वेदेनैव सर्वेषां धर्मादिप्रतिपत्तिरित्यापतितः तर्हि वादिविप्रतिपत्तिर्न स्यात् सत्यमेवमेतत्। किं
तु धर्मादिस्वरूपं वेदेन प्रतीतं तद्विशेषेषु तमतिक्रम्य स्वमतिदोषाद्वादिनां विप्रतिपत्तयः प्रतीयंते। अन्यथा

११०८१०

२६ धर्मादिबुद्धावारोहस्यैवासंभवादिति। ननु वाक्यस्य यथार्थज्ञानसाधनत्वलक्षणं प्रामाण्यमाप्तोक्तत्वलक्षणगु
णाधीनं सर्वत्रोपलब्धं। अत एव वाक्यजन्यज्ञानस्यापि याथार्थ्यरूपप्रामाण्यं वाक्यगताप्तोक्तत्वगुणजन्यं।
तथा च वेदस्यापौरुषेयतया गुणाभावात् प्रामाण्यं न स्यात्। नहि बीजस्य कुलमत्वाभावे कुलमांकुरं प्रति कारण
त्वसंभवति। अत एव कारणाभावात् ज्ञानस्यापि प्रामाण्यं न भवेदित्यत आह। न प्रामाण्यं चेति। न स्य वेदस्य यथा
र्थज्ञानजनकत्वलक्षणं प्रामाण्यमाप्तोक्तत्वगुणनिरपेक्षेण स्वरूपेणैव सिद्धं। तथा ज्ञानस्यापि याथार्थ्यरू
पप्रामाण्यं गुणानपेक्षेण वाक्येनैवोत्पद्यत इति सिद्धं। तथा ज्ञानस्यापि याथार्थ्यरूपप्रामाण्यं गुणानपेक्षेण
वाक्येनैवोत्पद्यत इत्यि। अयमाशयः। वेदस्यापौरुषेयत्वं तावदुक्तवक्ष्यमाणानेकप्रमाणसिद्धं। गुणास्त्वपौ
रुषेयेषु वाक्येषु संनिधिर्दृश्यते तत्र किं दर्शनाश्रयेण प्रामाण्यं प्रति गुणस्य कारणत्वमभ्युपगम्य वेदापौरु
षेयत्वं त्याज्यं। उत प्रमाणानुसारेण वेदापौरुषेयत्वमंगीकृत्य सत्स्वपि गुणसंनिधे यादृच्छिकत्वं गृहीत्वा गुणा २६
नां प्रामाण्यकारणत्वं त्याज्यमिति संशये द्वितीयपक्ष एवाश्रयितुमुचितः। सा च कारणे नैकेनानवकाशानां
बहूनां बाधस्यायुक्तत्वात्। वैपरीत्यस्यैव चोपपन्नत्वात्। दृश्यते च यादृच्छिकसंवादिनोनाप्तवाक्यस्य गुणा

भावेपि यथार्थज्ञानजनकत्वं। न च तत्र वाक्यस्याकारणत्वं। कारणान्तरानिरूपणेनाकारणकार्योत्पत्तिप्रसंगा
दिति। एतेन प्रमाज्ञानहेत्वतिरिक्तहेत्वधीनाकार्यत्वे सति तद्विशेषत्वात्। अप्रमावदित्यपि बाधितविषयत्वे
न परास्तं। ननु यदि वाक्यमात्रस्य यथार्थज्ञानजनकत्वं तदा कोहादिवाक्यस्यापि न स्यात्। ततश्च तज्जन्यं ज्ञानं
यथार्थमापद्येतेति चेन्न। मैवं। तस्याज्ञानविप्रलंभादिदोषमूलत्वेनायथार्थज्ञानजनकत्वात्। वाक्यगता हि दो
षास्तस्य यथार्थज्ञानजननशक्तिं प्रतिबध्य विपरीतज्ञानजननशक्तिमाविर्भावयंति। औत्सर्गिकत्वात्स्वतः
प्रामाण्यस्यापवादेनाप्रामाण्यं भवतीति किमनुपपन्नं। वाक्यगतस्याप्रामाण्यदोषाधीनत्वं कुत इत्यत्र तत्स्वादि
पक्षे बाधकेनोपपादयति। अप्रामाण्यस्येति। वाक्यगतस्यायथार्थज्ञानजनकत्वलक्षणस्याप्रामा
ण्यस्य परतस्त्वानंगीकारे पुरुषदोषनिबंधनत्वानंगीकारे काचादिव्यभिचारादिदुष्टयोरिंद्रियलिंगयोर
प्यप्रामाण्यहेतुत्वं ज्ञानगतायाथार्थ्यहेतुत्वं न स्यात्। पुरुषदोषाणां वाक्याप्रामाण्यनिमित्तत्वाभावे हि द्वैधा
भवति। तस्याप्रामाण्याभावेन। अप्रामाण्यस्य स्वतस्त्वेन वा। आद्ये दुष्टेंद्रियादेरप्यप्रामाण्यं न स्यात्। द्वितीये
काचादीनामपींद्रियाद्यप्रामाण्यनिमित्तत्वं न स्यात्। अस्ति च दुष्टेंद्रियादेरप्यप्रामाण्यं काचादेस्तन्निमित्त

२९ त्वमिति। उभयस्याप्यनंगीकारे किं बाधकमित्यत आह। तदनंगीकारे चेति। यदि दुष्टेन्द्रियादेरप्रामाण्यं नां
गीक्रियेत तदा पिद्धयी गतिः। ज्ञानकारणत्वाभावो वा याथार्थ्यं वा। आद्ये ज्ञानस्येन्द्रियाद्यन्वयव्यतिरेकानुवि
धानानुभवविरोधः। ज्ञानस्यैवानंगीकारे साक्ष्यनुभवविरोधः। द्वितीये बाधकानुभवविरोधः। तृतीये त्वप्रा
माण्यस्य काचाद्यन्वयव्यतिरेकानुविधानानुभवविरोध एव। ननु यादृच्छिकसंवादिषु सत्यपि दोषे
ऽप्रामाण्याभावात् कथमप्रामाण्यस्य दोषान्वयव्यतिरेकानुविधानमिति चेत्। न। तस्य सद्भाव एव
तादोनासद्भावे ऽसन्न्वयव्यतिरेकयोः कार्यकारणभावहेतुत्वात्। कारणे सत्यपि कार्यानुत्पादस्य
सामग्र्यभावेन प्रतिरोधेन वोपपत्तिरिति। अत एव दोषाभावो पि न प्रामाण्यकारणं। यादृच्छि
कसंवादिषु सत्यपि दोषेऽप्रमाणज्ञानोदयादित्याशयवानुपसंहरति। अत इति। एवमनुमाना
दिना समर्थितं वेदापौरुषेयत्वं श्रुतिपुराणवाक्यैरपि साधयति। वाचेति। तस्मै नूनमभिद्य
वे वाचा विरूपनित्यया। वृष्णे चोदस्व सुष्टुतिमिति मंत्रस्यायमर्थः। अभितो द्यौः प्रकाशो यस्यासा २९
वभिद्युस्तस्मै ऽभिद्यवे वृष्णो वर्षित्रे नूनं निश्चितं हविरूपनित्यया वाचा वेदलक्षणया सुष्टुतिं श्लो

मनास्क्रतिं चोदस्य प्रेरयत्कुर्वितिविरूपमृषिं प्रस्तुत्य नन्दति श्रुतिरिति शेषः। वाक्छन्दो वागिंद्रिये प्रवर्त्त
नइति स्पष्टं वेदविषयां श्रुतिं पठन्ति। नित्ययेति। परमं पदं परमं प्राप्यामिति मंत्रमुदाहृत्य वाचानृणीनित्या
नित्यत्वादविषयं निर्दिशन्ति। श्रुतिरिति। श्रुतिद्वयेनानित्यत्वमेव प्रतीतं न त्वपौरुषेयत्वमित्यतो वाक्य
द्वयमुदाहरतिविज्ञेयमिति। परमविज्ञेयं मुमुक्षुणा प्रधानं प्रमेयं परमात्मापि का प्रधानं प्रमाणं। अ
नादीति तदुभयोपपादनं। विनेति परमज्ञापकत्वं युक्तं नरं। स ब्रह्मशब्दोक्तः परमात्मा। यस्य सहस्र
मपरिमिता महिमानः प्रत्येकमपि सहस्रधा अपरिमितविधास्तद्ब्रह्म यावद्देशकालव्यापि तावद्वि
तं विशेषेणास्थितं। वाग्वेदवागपि तावती तावद्देशकालव्यापिनी। प्राज्ञेनकेनचित्स्वरूपेण वेदस्य
कृतत्वात्कथमेतदित्यत उक्तं। कश्छन्दसामिति। छन्दसां वेदानां योगमर्थैः सह वाच्यवाचकभाव
संबंधं को धीरो धीमान्वेद स्पष्टं वेद न कोपि। धिष्ण्यां बुद्धिपूर्वां वाचं वेदवाचकः प्रतिपादपरा
त्रति प्रतिपादितवान्न कोपि। वेदार्थस्य ज्ञाता ज्ञात्वा व्याख्यातापि दुर्लभः किमुत कर्त्तेति। इति श्रुतिरि
ति शेषः। प्रत्येकमभिप्रेतमर्थमाह सहस्रधा हारः। ननु विधिर्नियोगः प्रेरणेत्यनर्थांतरं। स च प्रेरकपु

२८ रूपधर्मः। अतो वैदिकानां विध्यर्थवादानां लौकिकवत् स्वतंत्रवक्तृकत्वमेवोचितं। तथार्थवादानामपि हानो
पादानाभिप्रायेण प्रवृत्तत्वात्। अभिप्रायस्य च स्वतंत्रवक्तृधर्मत्वात्। किंच। वेदे हमादिपदानि श्रूयंते
तानि च स्वतंत्रवक्तृकाणि लोकवत्। तस्माद्वेदादीनां पौरुषेयत्वमेव स्यात् तौ वेदानित्यत्व इत्युक्तौ समम
स्ताश्च स्यात्। कथमिति चेत्। नहि वयं वेदे रूपाभिप्रायप्रवेश एव नास्तीति वदामः। तथात्वे सक
लप्रार्थनादिवाक्यानामनर्थकत्वप्रसंगादिति भावः। कथं तर्ह्यपौरुषेयत्वमित्यत आह। आश्च
ताशति। आश्चर्यदेकप्रकाराः। पूर्वस्थितान्येव वेदवाक्यानि कानिचित्केचित्पुरुषैः स्वाभिप्रायप्रवे
शेन प्रयुज्यंते न तु पूर्वाणि क्रियंत इत्याशयः। एतेनैतदपि निरस्तं। वर्णास्तावन्नित्यत्वात्सर्वगतत्वा
च्च स्वतः क्रमशून्याः। न च क्रमेण विना पदवाक्यभावः। नापि तमंतरेण प्रामाण्यं। अतः क्रमः पौरुषे
य एवास्थेयः। तत्कथं वेदस्यापौरुषेयत्वमिति। नहि वयं वेदस्य कूटस्थतां ब्रूमः। किंतु शाब्देनोर्थत
श्च सर्वदैकप्रकारतामेव। ततश्च क्रमस्य कृतकत्वेपि पुरुषाभिप्रायप्रवेशेपि स्वतंत्रस्य वक्तुरभा २८
वादपौरुषेयत्वमुपपद्यते। ननु प्रलये विच्छेदात्कथं आश्चर्यतेत्यत आह। विष्णुर्बुद्धिगा इति। अपौ

रुषेयत्वे युक्तिकथनमेतत् । तथा च व्याकरिष्यत्याचार्यः । तथापि लोके पुनः प्रवृत्तिः कथमित्यत आह । स
गद्विति । सतिसप्तमीयं वीप्सायां द्विर्वचनं । उदीर्यन्त उच्चार्यन्ते प्रलापादीश्चाप्युपदिश्यन्ते । नहि तेषां नियामका
भावादन्यथाप्युपदेशः संभाव्यते ॥ तदेतदुक्तं । एत एवेति पूर्वकल्पे प्रवर्तमाना एव । किं शब्दमात्रसाम्येना
र्थमात्रसाम्येन वेत एवेत्युच्यते नेत्याह । किंतु सर्वप्रकारेणेत्याह । तथैव चेति । तद्विद ज्ञातिन क्रमेणै
वेति । एवं तैरेव पदार्थैर्वाक्यार्थैश्चोपेताः पि द्रष्टव्याः । इत्थंभूतलक्षणे तृतीया । अनेनैतदपि निरस्तं । नाव्या
ख्याता हि वेदात्कश्चिदर्थमधिगच्छति । न चाधिगतिमंतरेणानुष्ठानं संभवति । न चार्वाक्तनपुरुषव्याख्या
ने विश्वासो युज्यते । अनादौ तात्रीकृत्वात् । अतः स्वतंत्रवक्तृव्याख्यानमंगीकरणीयमिति । वेदानामकर्त्री
पि सर्वज्ञेनेश्वरेण व्याख्यानोपपत्तेः । अपौरुषेयत्वे युक्त्यंतरमाह । अत इति । श्रुतित्वमिति प्रसंगात्
स्त्रीलिंगनिर्देशः । एतासां श्रुतीनां श्रुतित्वं श्रुतिशब्दवाच्यत्वमतोऽपौरुषेयत्वादेवोपपद्यते नान्यथे
त्यर्थः । तत्कथमित्यत आह । श्रुता एवेति । श्रुतत्वाद्धि श्रुतयः । श्रुतत्वं च शब्दमात्रसाधारणं तत
श्चासाधारण्येन व्यपदेशा भवंतीति न्यायेन भक्षो वायुभक्ष इतिवत् सावधारणं व्याख्येयं । तथा चाखि
लैः श्रुता एव न तु केनापि कृता इति श्रुतिशब्दवाच्यत्वेन लभ्यत इत्यर्थः । ननु मुनयो न धीता अपि पठंति

२७ तत्कथमखिलैः श्रुतारवेद्यत्वमित्यत आह । जन्मान्तरइति । तुशब्दोवधारणे । ननु जन्मान्तरानुभूतं क
थं प्रतिभायात् । अस्मात्स्वदर्शनादित्यत उक्तं । वासुदेवेति । तथैवमुनेर्वाजीर्यतइति कथमुक्तमित्यत उक्तं ।
भागेनैवेति । तथापि श्रुतार्थे वाखिलैरित्ययुक्तं । परमेश्वरे योपाध्यायादनर्थीनत्वादित्यतः सोपपत्तिकं
मुक्तस्यापवादमाह । यतइति । कृतकत्वं व्याप्तत्वनिरेवावधारणप्रयोजनमिति भावः । हरिशब्दवाच्य
त्वमप्यपौरुषेयत्वे युक्तिरित्ययनेन सूचितं । तच्च विचार्यते । एतेनेतदपि प्रयुक्तं । काठककाला
पकमित्यादयः समाख्याविशेषाः । शाखाविशेषाणामर्यंतु । नचते ध्ययनमात्रनिबंधनाः । अध्ये
तॄणां प्रवक्तॄणां वानंतत्वात् । अतस्तत्कृतत्वनिबंधनाएवेति । तज्जन्मन्यश्रुतानां सुप्तप्रतिबु
द्धैरिवकृतादिभिर्दृष्टत्वस्य तन्निबंधनत्वोपपत्तेः । किंचः सामानिजज्ञिरेइत्याद्युत्पत्तिश्रवणा
त्कथं वेदानामपौरुषेयत्वमुच्यत इत्यत आह । तदुत्पत्तिरिति । व्यक्तिमपेक्ष्यैवेतिसंबंधः । तुश
ब्दो विशेषार्थः । आदिकालीनोव्यक्तिमिति । तेन प्रत्यहमप्युपाध्यायैर्व्यज्यमानत्वादुत्पत्तिव्यवहार २७
प्रसंगइतिनिरस्तं । उपचारप्रयोगे किं प्रयोजनमित्यतस्तदोपचारो यमित्याह । वेतनस्येति । व्य
क्तिमपेक्ष्येत्यनुवर्तते । विष्णुबुद्धिगतत्वयुक्त्या यदि वेदानां नित्यत्वमुच्यते तर्हि पुराणादीनाम

पित साम्यान्नित्यत्वं स्यादत आह । ननु श्रुतिवीवनियतस्वरादिविभागेनोपपद्यत इत्यत आह । पुराणा
नीति । पौरुषेयत्वनिमित्त एवानित्यत्वव्यपदेशो न तु विनाशनिमित्त इत्यर्थः । अत एव च नित्यानी
ति संबंधः । अन्यथा क्रियत इत्यनेन अर्थव्यत्यासः प्राप्त इत्यत आह । तदर्था इति । ननु भूपदादिक्रम
व्यत्यास एव वेदस्योक्तं भवति । एतद्वेदानुसारिणामेव । अन्येषां त्वर्थव्यत्यासस्यापि सत्त्वादाह ।
उत्प्रेक्षादिमत्त्वो हि तदर्थ इति भावेनोक्तं । तदर्थानीति । स वेदार्थ एवार्थो विषयः प्रयोजनं येषां व
नानि तथोक्तानि । एतेन हरिश्चन्द्रजन्मजेयादिनित्यत्वं धात्वर्थवेदानामनादिनित्यत्वमित्य
पि निरस्तं । हरिश्चन्द्रादीनामपि प्रवाहेणानादिनित्यत्वात् । ऋचः सामानीत्यादिवाक्यव्याख्यान
परब्रह्माण्डपुराणान्तर्गतमेव प्रदर्श्य तदस्य वाक्यान्तरमपि पठति । वेदनामिति । देवानां शरीरज
न्मापेक्षयेत्यर्थः । शरीरजन्म मुख्याभिमानिदेवतायाः स्त्रियानां सीत्यत उक्तं । अवान्तरेति । अवा
न्तरोऽमुख्योऽभिमानः स्वामित्वं परमेश्वराधीनं येषां ते तथोक्ताः । स्थिरात्मना मनादिनित्यत्वेन
प्रमितानामित्यर्थः । पूर्वोक्तानुवादेन गत्यन्तरप्रदर्शनार्थं निरन्तरमेवैतद्वाक्यमिति केचित् । अतः श्रुति
त्वमेनासामितिय दुक्तं तदुपलक्षणपरमित्यभिप्रायेण व्याचष्टे । न चानित्यत्वमिति । अनित्यत्वे वेदानां

३० आदिग्रहणेनाम्नायशब्दो गृह्यते। विशेष्यत इति विशेषोऽसाधारणः। अवर्णकर्मत्वादौ साधारणोऽपि यु
देषामेव श्रुतिवेदाम्नायशब्दानां वाच्यत्वं न नित्यत्वं विनानुपपद्यमानं तज्ज्ञमयति। तथाहि। श्रुतिशब्द
तावदुक्तं। वेदशब्दश्च सत्तार्थाद्विदेः पचाद्यचि कृते कर्त्तरि निष्पन्नः। सत्ता च सर्वार्थसाधारणी।
असाधारण्येन च व्यपदेशो भवति अतो नित्यविद्यमान इति लभ्यते। तथाम्नायशब्द आङ्पूर्वान्म्नाअ
भ्यास इत्यस्मात्कर्मणि घञि कृते सिद्धः। अभ्यासश्चैकप्रकारासकृदुक्तिः। तत्कर्मत्वं च शब्दान्तर
साधारणं। ततो भूतभवद्भविष्यद्भिरखिलैरप्येकप्रकारेणैव पठ्यत इति लभ्यते। एतदेवअ
नादिनित्यत्वमिति। स्यादेतदेवं। यदि श्रुत्यादिशब्दानामेतदेव निर्वचनं स्यात्। सत्यपि तस्मिन्निदमेव
वासाधारण्यनिमित्तं स्यात्। संभवति वान्यदपीति चेत्। सत्यं तथापि पौराणिकैरिदमेवादरणीय
मिति भावेन तत्पुराणवाक्यं पठति। वेदास्तु इति। इतीति प्रसिद्धाः नित्यविन्नत्वान्नित्यविद्यमानत्वात्। ३०
अकर्मकत्वात्कर्त्तरि क्तः। गत्यर्थाकर्मकेति स्मरणात्। विद्यते विन्ना इष्यत इति च। अनन्यथापाठा
दित्याशयः। अखिलैरिति वर्त्तते। आम्नाय इत्येकवचनं वेदवचनार्थे। सुपां सुलुगिति वचनात्। प्रलय
विनाशात्कथं नित्यविन्नत्वादिकमित्यत उक्तं ईशानीति। यतस्तेह रिणा दृष्टा इत्यनेन सृष्टावितां युक्तिं विवृणोति।

नचानित्यत्वे विनेति। अस्ति तावदीश्वरादयो वेदस्य द्रष्टार इत्यादिव्यवहारः। स इमं मंत्रमपश्यदित्यादिश्रुतेः।
दर्शनं च पूर्वसिद्धस्य भवति। नहि यो यत्करोति स पश्यतीत्युच्यते। अतस्तदन्यथानुपपत्त्यापि नित्यत्वसि
द्धमिति। अस्त्वनित्यत्वं विनत्वादिकं तदप्याप्रलयमेव। तावताप्यसाधारणोक्त्यादिसंभवात्। ततो वक्तः प्रल
ये विनष्टं पुनः सर्गे पुनरन्यज्जन्यं तदंगीकारे न कोपि विरोध इत्यत आह। नचेति। वर्णानां पदादीनां
च आदिपदेन वाक्यानां ग्रहणं। वर्णादीनामित्येव सिद्धे यत्पदादिग्रहणं तद्वर्णानां कौटस्थ्याभावेनापि
सत्त्वे पदादीनां तु क्रमादिव्यत्यय इति सूचयितुं। अनित्यत्वे प्रलय इति शेषः। तथा सर्गजन्मापि ग्राह्यं। ए
तेन नित्या वेदा इत्युक्त्वा यत्पुनः समस्ताश्च शाश्वता इत्युक्तं तत्सकारान्तरेण व्याख्यातं भवति। न केवलं व
र्णमात्रं नापि पदादिमात्रं किंतु समस्ताश्च यथायोगं शाश्वताः। सर्गेपि नोपजायंते प्रलयेन व्यथंति
वेति। कुतो नयुक्तमित्यत आह। सर्वज्ञत्वादिति। तद्बुद्धौ तन्मननसि। एतच्चोत्तरग्रंथे स्पष्टं भविष्यति।
नन्वीश्वरबुद्धौ सदा प्रतीयमानत्वं नाम ईश्वरेण सर्वदा वेदानां मानं तयानुभूयमानत्वं विवक्षितं। तस्यैवोक्तार्थ
साधकत्वात्। तच्चासिद्धं। तथाहि। विष्णुबुद्धिगा दीर्घबुद्धिस्थिता नाः सदेति पुराणवाक्यादासांतसिद्धिः। सर्व
ज्ञत्वयुक्त्या वा। नो दोषः। तस्यान्यथासिद्धेः। वेदानुभवजनितसंस्कारस्य बुद्धिगतत्वमात्रेण बुद्धिगा इत्युक्ति

सम्भवात्। न चैवं लक्षणाप्रसंगो दोषः। वेदपदस्य तदनुभवार्थत्वांगीकारेपि न साम्यात्। वेदानामेव साक्षा
न्मनोगतत्वासंभवात्। एवमंगीकारे जन्मवाक्यान्यप्यनुगृहीतानि भवंति। अत एव बुद्धिगा इत्यस्य स्वज्ञा
नविषया इति व्याख्यानमप्ययुक्तं। न च लाक्षणिकप्रयोगे प्रयोजनं वाच्यं। न ह्येपि घटादौ घटो देवदत्तस्य
बुद्धौ वर्त्तत इत्यादिप्रयोगदर्शनेन तल्लक्षणात्वात्। न द्वितीयः। घटादीनामपि तथात्वप्राप्तेः। विषमा
नार्थनिनु भवेहि सर्वेसत्वहानिः स्यात्। अत्राधितावदंगीकुर्मः। ननु कं पुराणवाक्यं अन्यथासिद्धमिति।
तत्राह। न च घटादिवदिति। घटादेरिव वेदानामपि संस्कारस्य बुद्धिगतत्वमात्रे पुराणवाक्यार्थत्वेनव
क्तुं न युक्तं। किंतु ईश्वरेण सर्वदा वर्त्तमानतयानुभूयमानत्वमेव। कुत इत्यत आह। प्रत्यभिज्ञेति। यदि वे
दाः प्रलये विनष्टाः। तत्संस्कारमात्रं विष्णुबुद्धौ वर्त्तत इति विष्णुबुद्धिगा इत्यस्यार्थः स्यात्। तर्हि न
र वाक्येयं पूर्वकल्पस्थिताः एत एव सर्गे सर्गे मिन्नाडीयंत इत्युक्तप्रत्यभिज्ञाविरोधः स्यादित्यर्थः। उ
क्तत्वादुक्तप्रायत्वात्। न च सादृश्यादेतत् एवेत्युक्तमिति वाच्यं तथा सत्यपौरुषेयत्वसिद्धेर्दुर्वारत्वात् उपल ३१
क्षणं चैतत्। जन्मवाक्यगतिकथनविरोधाद्यपि द्रष्टव्यं। एवं तर्हि सर्वज्ञत्वमुक्तमुपन्यासः किमर्थ इति चेत्।
पुराणकृता विष्णुबुद्धिगा इतीश्वरेण सर्वदा वर्त्तमानतयानुभूयमानत्वमुक्तं। तत्र प्रमाणाकांक्षायां तदभि

प्रेतायुक्तिरियमुपवर्णितेत्यदोषः। न चादि। क्रमविशिष्टा वर्णा एव वेदो न तु घटादिवदर्थान्तरं। क्रमश्च बुद्धिनिमि
त्त एव न तु स्वतोऽस्ति। न तस्य सर्वेषां सर्वेषां वर्णविषयविवक्षितक्रमोपाधिभूतबुद्ध्युपरम एव तावद्वेदवि
नाशो वक्तव्यः। ननु घटादीनामिवापरः। न चेश्वरस्य तथाविधबुद्ध्युपरमो युज्यते। स हि देवदत्तस्येव वि
षयान्तरसंचारनिमित्तो वा स्यान्निद्रास्मरणनिमित्तो वा। नोभयथापि संभवति। तस्य सर्वदा सर्वज्ञत्वात्। अ
तो वेदाः सर्वदेश्वरेण वर्तमानतयानुभूयन्त इति सिध्यतीति। इयं युक्तिः पुराणादौ नोक्तेति। कुतो वाग
म्यत इति चेत्। पुराणानि तदर्थानीत्युक्ते तत्र वाक्ये पुराणानामपि नित्यत्वमाशंक्य परिहारात्। एतदुक्तं
भिप्रायाभावे तर्ह्युक्ताबीजाभावादित्या न्यायवानुत्तरवाक्यार्थमनुवदति। पुराणानामपीति। नन्वेवं वेदपु
राणयोर्नित्यत्वे पुराणानां पुनारचने न वेदस्येत्येतत् कुत इति चेत्। प्रमाणप्रश्नश्चेदुक्तादेव पुराणवा
क्यादेरिति क्रमः। प्रयोजनप्रश्नस्त्वयुक्तः। ईश्वरप्रवृत्तेः सर्वत्र स्वप्रयोजनहीनत्वात्। परप्रयोजनानिस
क्ष्माणिडुत्ते सिलुवयनप्रभ वा भः। भगवानाचार्योपीदानीं प्रयोजनाभावान्नोवादीदिति। एवमुपपा
दितमर्थं अन्यान्तराणि परिहरन्नुपसंहरति। अत इति। प्रसभं शास्त्रलोकोद्दर्णा दर्यानित्या इति सिद्धं। आदिशब्देन
वर्णधर्मा गृह्यन्ते येनोपाधिकाः। अप्रमितकर्तृकत्वादिवल्लोकवदश्नि निसए वेति सिद्धं नित्यत्वस्य पृथग्विधे

त्वात्प्रत्ययमुपसंहारः। ननु नित्यत्वे वर्णानां कथं कदाचिदेवोपलब्धिः। न चेन्द्रियसंनिकर्षस्य कादाचित्क-
त्वादिति वाच्यं। तावतीनामिति व्यापकत्वस्याभ्युपगतत्वेन सर्वदा श्रोत्रसंनिकृष्टत्वात्। अत्रैके ब्रुव-
ते। स्तिमितेन वायुना वष्टब्धं श्रोत्रं संनिकृष्टमपि शब्देनोपलम्भयति। वक्तुः कोष्ठ्यो वायुः। प्रयत्नवदात्म-
संयोगेन प्रेरितः प्रतिष्ठमानन्तरः प्रभृतीन्यष्टौ स्थानान्यभिहत्य श्रोतुः कर्णशष्कुलीं प्रविष्टः स्तिमितं
वायुमपनयति। ततो वर्णोपलब्धिरिति। अपरे तु कोष्ठ्यवायुसंयोग एव श्रोत्रस्य संस्कारो नाप-
र इति। तदुभयमप्यसत्। वायुसंयोगानन्तरं सर्वदा सर्ववर्णोपलब्धिप्रसंगात्। उत्तरक्षण एव वायु-
विभागेन संयोगनाशान्नेति चेन्न। अप्रामाणिककल्पनाप्रसंगात्। सर्वोपलब्धेरनिवारणाच्च।
अन्ये तु वायुगुणः शब्दो ध्वनिलक्षणो वायुना सह श्रोत्रं प्रविष्टो वर्णस्य व्यंजकः। तेन च क्वचिदेवोप-
लभ्यत इति। एतदप्यसत्। वायुगुणत्वे शब्दस्य श्रोत्रेण ग्राह्यत्वप्रसंगेन बधिराणामपि तदुपलब्धिप्र- ३२
सक्तेः। श्रोत्राग्राह्यस्य तद्ग्राह्यवर्णव्यंजकत्वानुपपत्तेश्च। व्यंग्यव्यंजकयोरेकेन्द्रियग्राह्यत्वस्य
घटप्रदीपादौ दर्शनात्। एकस्मिंश्च व्यंजके तत्रस्थाः सर्वेऽपि वर्णा व्यक्ता इति सर्वोपलब्धेरपरिहा-
राच्च। किं च यो वर्णो देवदत्तश्रोत्रे व्यक्तः स एव यज्ञदत्तश्रोत्रसंनिकृष्ट इति दूरस्थेनापि तेनोपलभ्येत

तस्यैतदुक्तं। आकाशगुणो व्यज्यमाना इति। इदमुक्तं भवति। वक्तृप्रयत्नप्रेरितो वायुरुरःप्रभृतिभिः
स्थानैः संयुक्तस्तत्स्थानसंयुक्ताकाशे ध्वनिलक्षणशब्दमुत्पादयति। स च देशांतरे प्रतिद्वंद्वयस्कक
र्णशष्कुल्यवच्छिन्नाकाशप्रदेशे समुत्पन्नस्तद्गुणो ध्वनिस्तस्मिन्व्यज्यमानो वर्णः श्रोत्रेण गृह्यते। ध्वनेश्चा
शुतरविनाशित्वेन व्यंजकाभावान्न सर्वदोपलब्धिः। ते च ध्वनयः प्रतिनियता एव वर्णानां व्यंजका इति
न सर्वोपलब्धिप्रसंगः। अतो नाकाशमेव श्रोत्रं। न कुतः एव ध्वनिः। नन्वेवं स्वतः सावयवं। अतः प्रदेशावर्त्ती ध्वनि
स्तदवच्छिन्नमेव वर्णं व्यंजयतीति न सर्वेषामुपलब्धिः। समानेंद्रियग्राह्याणां समानदेशकालधर्मापि
नानां प्रतिनियतव्यंजकत्वं व्यंग्यत्वं क्वापि नोपपलब्धमिति चेत्। न। गोत्वाश्वत्वादीनां प्रतिनियतव्यक्तिव्यं
ग्यत्वस्य परैरंगीकृतत्वात्। गोत्वादीनां व्यक्तिसर्वगतत्वेन समानदेशत्वं नास्तीति चेत्। न। प्रत्यासत्तेरव
र्जनीयत्वात्। समवायाभावस्य वृषेष्वपि समत्वात्। किंच आत्मत्वद्रव्यत्वादीनां प्रतिनियतव्यंजकव्यं
ग्यत्वमंगीकृतमेव। रूपेण समानदेशस्यापि परिमाणस्य चक्षुष्ट्वसंनिकर्षोपाधिको व्यंजकत्वं स्वीक्रियते।
तथा क्षीरादिपृथक्त्वादिः समानाभिहाराभावादिः। न च वर्णव्यतिरिक्तो ध्वनिर्नास्ति दूराद्वर्णाग्रहणेऽपि ध्व
निग्रहणात्। न चैतत्सर्वमप्रामाणिकं। प्रत्यभिज्ञाप्रामाण्यस्योपपादितत्वेन तद्बलेनैव लब्धत्वात्। आगमा

व्यंजकस्य विद्यमानत्वाद्वर्णग्रहणमनुपपन्नमिति शंका सति कृष्टध्वनेरभावादिति किंचित्समाधेयं।

अत्र साक्षिणः संतीति। ननु वर्णव्यतिरिक्तो वेद एव नास्ति। स्फोटस्यानंगीकृतत्वात्। तत्कथं वेदश्रुतिपथ
गुणं जनयति इत्यत उक्तं। तत्क्रमात्मक इति विशिष्टक्रमवद्वर्णात्मकः। अवस्थाभेदात्पृथगुक्तिरित्याशयः। अत्र
प्राभाकराः प्राहुः। स्यादेवोक्तं वेदस्य प्रामाण्यादिकं समस्तं। किं तर्हि यदुक्तं सदागमैकविज्ञेयमिति वेदानां
विष्णुप्रतिपादकत्वं। तन्नोपपद्यते। तथाहि। वाच्यवाचकसंबंधज्ञानलक्षणव्युत्पत्त्यपेक्षो हि शब्दोर्थं बोधय
तिनान्यथा। अन्वयव्यतिरेकाभ्यां तथावगमात्। व्युत्पत्तिश्च वृद्धव्यवहारदर्शनादेव भवति। वृद्धव्यवहार
श्च कार्यप्रतिपत्तिनिबंधन इति। कार्यप्रतिपादकत्वेन शब्दस्य युक्ता। तथाहि। चैत्र जलमाहरेति प्रयोज
कवृद्धवाक्यश्रवणानंतरं प्रयोज्यवृद्धस्य जलाहरणविषयां प्रवृत्तिं दृष्ट्वा पार्श्वस्थो बाल एवमाकल
यति। अस्य यत्प्रवृत्तिर्बुद्धिपूर्विका स्वतंत्रप्रवृत्तित्वान्मदीयस्तनपानादिप्रवृत्तिवदिति। पुनश्चास्य प्र
वृत्तिहेतुर्बुद्धिः किंविषयेति जिज्ञासायामेवं निश्चिनोति। वृद्धस्य प्रवृत्तिहेतुभूता बुद्धिर्मम प्रवृत्तिहे
तुभूता बुद्धिर्यद्विषया तद्विषयैव भवितुमर्हति। प्रवृत्तिहेतुबुद्धित्वान्मदीयप्रवृत्तिहेतुबुद्धिवदिति। ३३
पुनरेवमवधारयति। यद्विषयासौ बुद्धिः प्रवृत्तिहेतुभूता तन्नूनमनेन शब्देन बोधितं। तद्भावभावित्वात्। मम
तु प्रमाणांतरेणासावयोविशेषस्तन्नयद्बोधान्मम प्रवृत्तिस्तदनेन शब्देन बोध्यत इति शब्दस्य प्रवृत्तिहेतुभूता

र्थबोधकत्वेति । पुनश्च कोसौ प्रवृत्तिहेतुभूतः शब्दबोध्योऽर्थ इत्यवधारयितुं स्वात्मनि प्रतिपन्नप्रवृत्तिहेतुभू
तमर्थमनुसंधत्ते । तत्र न तावदिह क्रियामात्रं फलमात्रं क्रियाफलसंबंधमात्रं वानुध्यातप्रवृत्तेः । किंतु कार्य
मेव । ममेदं कार्यमिति प्रतीत्य हि स्नानपानादावहं प्रवृत्त इति स्वप्रवृत्तेः कार्यबोधपूर्वकतां निश्चित्यायमपि
कार्यबोधादेव प्रवृत्त इत्यनुमाय वाक्यस्य तावत्सामान्यतः कार्यपरतामवधारयति । ततो लिङ्घटितावाप
कार्यविगमदर्शनात्तदुच्चारणादर्शनानन्तरं च कार्यविगमनं कुर्वन्ति । शब्दान्तराणि चावहन्तीति तत्स्वांस्वां
नर्थाविगमयन्तीत्यावापोद्धाराभ्यामधिगच्छति । एवं लोके कार्य एव गृहीतशब्दसंगतिर्वेदेऽपि तदेव शा
ब्दात्प्रत्येतुमर्हति । तत्र लिङादिप्रत्ययः कार्यशरीरमेवाभिदधाति । प्रकृतिस्तद्विषयं पदान्तराणि च
प्रकृत्यर्थविशेषणं कारकं तद्विशेषणं नामधेयं नियोज्यं वाभिदधाति । कार्यप्रतीतौ व्याप्रियन्ते । संनिपत्यो
पकारकाङ्गवाक्यानि यद्यपि कार्यान्तरस्थान्यानि तथापि प्रधानकार्यान्वितस्वार्थाभिधायकतया कार्य
प्रतिपत्तावेव व्याप्रियन्ते । मन्त्रा अपि कार्याङ्गभूतार्थस्मारकतया तत्रैव विनियुक्ताः कार्य एव व्यापार
वन्तः । अर्थवादा अपि तत्रैव रुचिमुत्पादयन्तोऽपयुज्यन्त इति कृत्स्न एव वेदः कार्ये प्रमाणं । कार्यं च कृति
साध्यत्वे सति कृत्युद्देश्यं । कृतिश्च प्रयत्नः । तच्च लोके भावार्थो वेदे च पूर्वं । अत एव वेदानानामपि कर्तृस्वरूप

१०८।

३४ प्रतिपादकत्वेनदेवताप्रतिपादकत्वेनवाकार्यपरत्वैवं'प्रकरणभेदान्नदर्शनांगीकारेप्यात्मलाभ्यानत्वद्दसपुनरावृत्त
येसमाम्नातेनविधिनैकवाक्यतामाश्रित्यकार्यपरत्वमेववर्णनीयं। तदेवंकार्यान्वितएवार्थेसर्वशब्दानां
व्युत्पत्तिदर्शनान्नकेवलसिद्धार्थेतदभावान्नसिद्धस्वरूपेविष्णौवेदस्यप्रतिपादकत्वंसंभवतीति। तदेतत्प्रति
षेधति।नचकेवलसिद्धेर्थेव्युत्पत्त्यभावादप्रामाण्यं। केवलेकार्यान्वयरहितेस्वप्रधानेसिद्धेकार्याति
रिक्तेर्थेशब्दानांव्युत्पत्त्यभावात्तथाविधेविष्णौवेदस्याप्रामाण्यमप्रतिपादकत्वमितिवचनेस्यार्थः। नच
कार्यान्विततयैवतत्रप्रामाण्यंभविष्यतितत्किमनेनेतिवाच्यं'स्वप्रधानेविष्णौसर्ववेदप्रामाण्यस्या
भिलषितत्वात्।'अतएवसदागमैरेकएवप्रधानंविज्ञेयमितिव्याख्यायते'कुतोनेत्यतआह'सिद्धान्वितए
वव्युत्पत्तिगृहीतेः'अन्वितग्रहणेनयत्नाभावकरैः कार्यान्वितार्थताव्युत्पादनायशब्दानामन्विताभिधा
नसामर्थ्यंसमर्थितं। तदभ्युपगम्यतुएवास्माभिरितिसूचयति'एवेतिकार्यान्वयनियमनिराकरणं।
गृहीतेर्दर्शनात्'कार्यान्वयनियमंविनायोग्येतरान्वितस्वार्थेव्युत्पत्तिदर्शनादित्यर्थः। अथवेष्टसा ३४
धनतातिरिक्तोयाःस्वरूपदेवतायानिरूपयितुमशक्यत्वेनेष्टसाधनत्वेवलिङ्गोद्यर्थइत्यन्यत्रोप
पादितत्वात्तदभिमतस्यकार्यस्यैवाभावंसूचयितुंसिद्धान्वितएवेत्युक्तं। तत्प्रपंचयति। इयमानात्र

यपितेयादौ अंगुलिप्रसारणादिपूर्वनिर्देशेनैव हि न ज्ञानाति। इत्यादौ वाक्ये व्यक्तसादृकेन प्रसक्ते सति। अंगु
लिप्रसारणमादिर्यस्य स्कू विक्षेपादेर्व्यापारस्य स तथोक्तः। अंगुलिप्रसारणादिपूर्वो यस्य निर्देशः स्य त
थोक्तः। एवं शब्देन च हव्यवहारदर्शनं व्याकर्तृयति। न मात्रादिकं मात्रादिशब्दवाच्यं न याज्ञानातिहि वा
लः मातुः पितुर्वा चक्रे स्थितं बालमन्यमनस्कं सतमंगुलिप्रसारणादिना स्ववचनश्रवणाभिमुखं मात्रा
द्यभिमुखं विधाय यदा व्यक्तसादयितावाक्यं प्रयुंक्ते। बालक त्वमेयं माता त्वयायं पिता यं ते भ्राता कदली
फलमभ्यवहरतीत्यादि तदा च हव्यवहारदर्शनं विना तेन निर्देशेनैव तस्य शब्दसमुदायस्य कार्यान्वि
यरहितस्यैव तास्मिन्नर्थे समुदायेविषयविषयिभावं नावदवगच्छति बालः। इदमनेनायं बोधयतीति।
पुनरियं तेस्वसायंते सख्वाफ परवादयनीत्यादिवाक्यात्तेषु शब्दार्थयोरावापोद्वाराभ्यां शब्दविभागादि
कमवगत्य मात्रादिपदानां योग्यतरान्वितेऽजनन्यादौ वा सकलमाकलयतीति किमनुपपन्नं। लघी
यांश्चायमुपायो व्यक्तस्तथो व्यवहारदर्शनात्। शब्दादिस्मरणशीलो बालः शब्दमनुसंधायवृद्ध
स्यागामिप्रत्यागमनं स्वानपेक्षितमेव प्रतीक्षतइति गुरुतरेयं कल्पना। पुरोवस्थितेष्टिस्साधनतयापेक्षि
तेषु श्रूयमाणस्यैव शब्दस्य वाचकत्वं कलयतीति लघुतरमेतत्कल्पनं। वर्त्तमानापदे दोषु व्यक्तसन्नो

३५ ज्ञानजिज्ञासोपक्रम्याद्यव्यवहारदर्शनेनान्यत्रापि व्युत्पत्तिग्रहसंभवः एतेनैतदपि निरस्तं यावन्ती सिद्धार्थपरा
दपि वाक्याद्व्युत्पत्तिः [illegible] तासर्वाप्रथमभावि कार्यान्वयभावित्वात् कार्य एव व्युत्पत्तिरेवेति प्रथम
व्युत्पत्तेरेव सिद्धार्थे समर्थितत्वात् एवं कार्यान्वयं विनापि व्युत्पत्तिदर्शनाद्योग्येतरान्विते व्युत्पत्ति
रिति सामान्यमुखी गीर्या कार्यान्विते एवेति विशेषनिर्बन्धस्त्याज्य इत्यर्थः इतश्चैवमेवमाह । कार्यान्वि
ते व्युत्पत्तिरिति वदतो कार्यस्य कार्यान्वयाभावात् कल्पनागौरवं कार्यान्विते स्वार्थे शब्दस्य व्युत्पत्ति
रिति वदतः प्राभाकरस्य कल्पनागौरवं स्यात् कथं सर्वेषामपि शब्दानां कार्यान्विते स्वार्थे व्युत्पत्ति
रित्येकमेव प्रयोजकं गौरवं गीकुर्वेन्नाश्रा कल्पते लिङादीनां हि कार्यमेव स्वार्थः । ननु तस्य कार्यस्य कार्या
न्तरेणान्वयोऽस्ति गुणप्रधानभावेन खलु पदार्थानामन्वयो भवति कार्यं च प्रधानं तत्प्राधान्येन बोध्य
ते । तथा च कथं कार्यद्वयस्य युगपद्गुणप्रधानभावः संभवति अतः कार्यस्य कार्यान्वयाभावाल्लि ३५
ङादीनां कार्यमात्रसिद्धान्विते वा कार्ये व्युत्पत्तिरङ्गीकार्या गवादिपदानां तु कार्यान्विते स्वार्थ इति ।।
तथा च प्रयोजकद्वैविध्याङ्गीकारे कथं न कल्पनागौरवं योग्येतरान्विते स्वार्थे व्युत्पत्तिरङ्गीकारे त्वेक

प्रयोजकत्वाभावात्पूर्वमित्ययमेव पक्षः समाश्रयणीयः। ननु कार्यान्वयिनि स्वार्थे व्युत्पत्तिरिति स्वीकारान्न
कल्पनागौरवं। कार्येण सह योऽन्वयस्तद्दर्शं कार्यस्यासिद्धस्य वास्तीसेकप्रयोजकत्वाभावादिति चेत्। मैवं। का
र्येण सहासिद्धस्य योऽन्वयः स गुणभाव एव न च कार्यं प्रति गुणभावः कार्यस्यास्ति। न च गुणप्रधानभावा
नुगतमन्वयमात्रं शब्देन बोध्यते। अतः शब्दमात्रमेवैकं नार्थ इति यत्किंचिदेतत्। एतेन कार्यान्वयाच्च
यिनि व्युत्पत्तिरित्यत्र प्रयोजकवर्णनमपि परास्तं। कार्यपरपदार्थान्विते व्युत्पत्तिरिति चेत्। अत्राप्येकप्र
योजकासिद्धेः। कार्यपरं यत्पदं तस्य योऽर्थस्तेनान्वित इति तदर्थः। तत्र लिङादीनां कार्यपरत्वं नाम का
र्यवाचित्वं। गवादिपदानां तु तदुद्देशित्वमात्रमिति द्वैविध्यमेवेति। ननु तथापि न केवलसिद्धार्थवाक्यस्य
प्रामाण्यं युज्यते। कार्यबोधमन्तरेण नैराकांक्ष्यलक्षणस्य पर्यवसानस्याभावात्। न हि गौरश्वः पुरुषो हस्ती
ति वा देवदत्तः पचतीति वा परं ज्ञाते पर्यवसानमनुभूयते। किंतु तृप्तिकाम ओदनं पचतीति पर्यवसानहीन
स्य च न्यूनतया वाक्याभासत्वं स्यात्। अतः कार्यपरत्वं सर्वथांगीकार्यमित्यत आह। इष्यमाना अपि तासु
रूपोसीत्यादौ सिद्धमात्रज्ञापनेनैव पर्यवसितत्वाद्वाक्यस्य। इत्यादौ प्रयोगे। केवलसिद्धार्थेन प्रामाण्य
मिति वर्तते। यो बाल्य एव कुतश्चित्कारणान्मातापितृभ्यां विमुक्तो मातापितृमनोज्ञानवलोकस्यास्तनापि

तथाभावमनुमाय कामे माता कोऽस्मे पिता कीदृशो कुत्र वर्तते। इत्युत्कण्ठते। अथ तं कश्चिद्ब्रवीति। अयं ते पिता यः पाटलि
पुत्रे राजास्ति भद्रसेनः। इयं तव माता या भद्रसेनस्य महिषी लीलावतीति। तदाकार्यापि देशमनन्तरेण सिद्धस्य
वस्तुज्ञापनेन तत्कार्यं पर्यवसितं भवति। श्रोतुर्निराकांक्षत्वात्। तदनंतरं स यदि कथं तोपद्येयमिति जिज्ञास
ते। तदा तं दर्शनकामं सन्तमेव मनेन यथा पाटलिपुत्रं याहीति कार्यं बोधयति। यथा यः स्वमुखमपश्यन्नन्या
न्सुरूपान्विरूपांश्चावलोक्य स्वात्मनि संदिग्धे किमहं सुरूपो विरूपो वेति। तदा तं प्रति कश्चिदाचष्टे सुरू
पोऽसीति तदापि वाक्यस्य सिद्धमात्रज्ञापनेन पर्यवस्यति। ततः परमाकांक्षाविच्छेदात्। तस्मादिष्टसाधनं
ज्ञानमेव वाक्यपर्यवसानहेतुर्न कार्यबोधनमेवेति नियमः। कार्यबोधने पर्यवसानस्यापीदमेव नि
मित्तं यदिष्टसाधनतावबोधनमिति। अनेनैतौ वेदवाक्यानां योजनां स्वयमतौ। यो हि सात्त्विकप्रकृति
लौकिकप्रवादात्कार्यत्वादिलिंगानुसंधानाद्वा स्वतनुभववनादेः कर्तारं सामान्यतो जानंस्तस्य माहात्म्यज्ञाना
भ्यां तद्विशेषज्ञानार्थमुत्कण्ठितमनाः स्वसंस्कारवशाज्ज्ञान्यदगण्यन्वर्तते। तं प्रत्याप्तो वेदः धुरि वार्यं वेदस्त ३६
त्स्वरूपस्वप्रधानमेव प्रतिपादयति। विज्ञानमानंदं ब्रह्मेत्यादि। ततो वाक्यार्थज्ञानादाप्तपरमानंदस्तत्सा
क्षात्कारं कामयते। तं प्रति तदुपासना विधीयते। सा च प्रक्षीणांतःकरणमलस्यैव संभवतीति। तदर्थं कर्म

विषयः प्रवर्त्तत इत्येवं समस्तो वेदः परमेश्वरस्वरूपज्ञापन एव पर्यवसितः। अथवा शारीरेन्द्रियान्तःकरणादिसं
निधाने स्वात्मनो विविधदुःखप्रपञ्चनिष्पूटकं च सुखमलभमानो सशोचते। किं मम दुःखादिकं शारीरादिसं
बन्धनिमित्तमथवा स्वाभाविकमिति। तत्र निर्वेदः प्रवर्त्तते। तत्त्वमसीत्यादि। परमात्मैव निर्दुःखपरमानन्दस्व
भावस्त्वं तत्त्वमसि। किं त्वीश्वराधीनाविद्याद्युपस्थापितशारीरादिनिमित्तेनान्यथाकारेणोपगत इति। ततः
पुनरसौ जिज्ञासते। केनोपायेनाहमिदमस्वाभाविकं रूपं हित्वा स्वरूपेणावस्थितः स्यामिति। तत्प्रति
परमेश्वर एव प्रसन्नस्तदुपाय इति तत्स्वरूपं निरूप्यते। ततः कथमसौ प्रसीदतीत्यपेक्षायां तत्साक्षात्का
रः। तत्र च श्रवणादिकं तदङ्गतया कर्माणि विधीयन्त इत्येवं समस्तस्यापि वेदस्य परमेश्वरस्वरूप एव
पर्यवसानमिति। एतेन च न्यायार्थस्तु जैमिनिरित्यादिना सूत्रेणैवोक्तः। ननु केवलसिद्धबोधकत्वे वाक्य
स्यानुवादकत्वेनाप्रामाण्यं स्यात्। ततः सर्वथा कार्यपरता स्वीकार्या। कार्यस्य च प्रमाणान्तरागोचरत्वेनना
नुवादकत्वप्रसङ्ग इत्यत आह। तस्य तत्र प्रामाण्यानुभवाच्च। पूर्वोक्तेनात्राप्यनुवृत्तिः। तत्त्वमस्यादिवा
क्यस्य तत्र केवलसिद्धार्थे प्रामाण्यं नाम यथावस्थितार्थबोधकत्वं नान्यत्। तच्च केवलसिद्धार्थे प्रत्यक्षादेरि
व वाक्यस्याप्यनुभूयते। अस्ति चासावर्थः सिद्धोऽपि प्रमाणान्तरेणाविदितपूर्वः। ततः सिद्धार्थत्वेऽयमा

३७ नैरादिवाक्यस्य नानुवादकत्वमप्यनुभूयत एव। अतः केवलसिद्धेर्थे वाक्यस्य नाप्रामाण्यमिति किं कापि परत्वा
यहेतु। स्यादेतत्। यद्यपि बोधकत्वे नैव प्रमाणानां प्रामाण्यं तथापि वाक्यप्रयोगस्य परार्थत्वात् सप्रयोज
नात्मकमेव वाक्यप्रामाण्यमपेक्षते। यथाग्निहोत्रं जुहुयात् स्वर्गकाम इत्यादि। नान्यत्। यथाष्टौ काकस्य
दन्ता इति। परप्रयोजनाभावे न दैवयत्नोपि परं। ननु कथं केवलसिद्धेर्थे प्रामाण्यमित्यत आह। ननु कु
त्रचित्सिद्धज्ञापनादन्यद्वाक्यस्य प्रयोजनं दृष्टं। सिद्धेति प्रकृतलोकैर्वोक्तं। ननु तच्छैव व्याख्येयं। वाक्यं हि
प्रमाणं। तच्च प्रमासाधनं। प्रमा च यथार्थज्ञानं। अतस्तस्य परं ज्ञापनमेव प्रयोजनं। छिदासाधनस्य
परशोः छिदेव। नहि तत्साधनस्य तनोन्यत्प्रयोजनं दृष्टं। तच्च प्रयोजनं सिद्धविषयस्यास्तीति कथमप्रा
माण्यानुपपत्तिरिति। अथवा कार्यमपि सिद्धविशेषएवेष्टसाधनलक्षणमिति भावेन सिद्धे स्फुटं। यथावस्
स्थितपर्यायो वा सिद्धशब्दः। सत्यमेतत्। ज्ञापनमेव साक्षाद्वाक्यस्य प्रयोजनं। तथापि। स एवार्थो ज्ञापनी
योयज्ज्ञानं परस्य केवित्प्रवृत्तिं कुतश्चिन्निवृत्तिं वा कुर्यात्। परप्रवृत्तिनिवृत्त्यभिप्रायेणैव वाक्यप्रयोगात्। ३७
प्रवृत्त्यादिकारणं च कार्यज्ञानमेव। न केवलसिद्धज्ञानं। नचैवात्मरुद्धस्तन्यापारो वा प्रवर्तक इति तथास
ति तद्भाविणां सर्वेषामपि प्रवृत्तिप्रसंगात्। बालेस्य स्तनपानादिप्रवृत्तादौ ज्ञानाद्यभावात्तु। पापीयु
ज्ञारवादिज्ञादृष्टश्रवणसमनन्तरप्रवृत्तिनिवृत्तिर्वा सापि पुरुषाभिप्रायानुमानादेव। न साक्षात्। रागद्वेषयो

यद्यपि प्रवर्त्तकत्वमस्ति । तथापि सत्तयैव न तु ज्ञाततया । ज्ञानं त्वनुभूतिर्न ग्राह्यतयावर्जनीयसन्निधिः । अ
तो वाक्यबोध्यं प्रवृत्त्यादिकारणं कार्यमेवेति । नन्वेवं सर्वत्र वाक्यार्थतयाङ्गीकार्यः । अत एव लिङादिशरि
तवाक्येकार्यध्याहारोत्सर्गार्दर्शयनीया । तत्केवलसिद्धमात्रपरत्वं वाक्यस्येति । उच्यते । नायमस्ति नि
यमो यत्सर्वत्र साध्यार्थ एव वाक्यप्रयोग इति । यत्र वाक्यार्थज्ञानमात्रेण सुखदुःखावाप्तिहानी भवत
स्तत्र प्रवृत्त्याद्यभावात् । यत्रापि प्रवृत्तिनिवृत्तिनिमित्तायेण वाक्यप्रयोगस्तत्रापि सिद्धपरत्वमुक्त
मेवेति वक्तुमाह । ज्ञात्वैवेष्टसाधनतां प्रवर्त्तते निवर्त्तते च विपर्ययेण । एवं शब्दो भिन्नक्रमः । इष्ट
साधनतामेवेति । ततः किमित्यत आह । अतः सिद्ध एव सर्ववाक्यानां प्रामाण्यं सिद्धं । यद्यपि सिद्धमात्र
ज्ञानं न प्रवृत्त्यादिहेतुस्तथापि सिद्धविशेषेष्टानिष्टसाधनत्वज्ञानं तु भवत्येव । यतो बालोपि स्तनपा
नादेरिष्टसाधनतामेव ज्ञात्वा प्रवर्त्तते तथा दंशमशकदंशनादेरनिष्टसाधनतामेव ज्ञात्वा नि
वर्त्तते । तस्यापि कार्यताज्ञानादेव प्रवृत्तिः । इष्टसाधनत्वं तु कार्यताज्ञानस्य कारणमिति चेन्न ।
इष्टसाधनतातिरिक्तायाः कार्यतायां प्रमाणाभावात् । चन्द्रमण्डलादाविष्टसाधनताबुद्धिर्न कार्यताबुद्धि
रिति चेत् । सत्यं । कृतिसाध्येष्टसाधनतायाः कार्यतापर्यायतयाङ्गीकारात् । अत एव न भक्तादौ प्रवृत्ति

३९ प्रसंगः॥ एतेन वृद्धव्यवहारदर्शनेन बालकव्युत्पत्तिः साऽपि सिद्धविषयैवेति सिद्धं। बालकेन हि स्वप्रवृत्तौ यस्य वर्गे कर्त्तव्य
नागतं। तदेव वृद्धप्रवृत्तावपि कल्पयितुमुचितं। स्वप्रवृत्तौ चेष्टसाधनताज्ञानमेव प्रवर्त्तकतयावधारितमि
त्युक्तं। यत एवं सिद्धज्ञानस्यैव सर्वत्र प्रवर्त्तकत्वं अतः सर्वत्र सिद्धविषयैव। अतो न केवलं प्रियमाणेत्यादीनां
किंतु सर्ववाक्यानां लिङादियुक्तानामपि सिद्ध एव प्रामाण्यं सिद्धं। अत्र सर्ववादिसिद्धं दृष्टांतमाह। प्रसिद्धं व
याकरणनिरुक्तादीनां सिद्धमात्रे प्रामाण्यं सर्ववादीनां। आदिपदेन निघंटुप्रभृतीनां ग्रहणं। सिद्धमात्रे श
ब्दादिस्वरूपे। अत्राप्युक्तं: शब्दः सम्यग्ज्ञातः सुप्रयुक्तः शास्त्रान्वितः स्वर्गेलोके कामधुग्भवतीत्यर्थवाद
बलाद्विधिः कल्प्यत इति चेन्न। इष्टसाधनताज्ञानादेव प्रवृत्त्युपपत्तौ तत्कल्पकाभावात्। अपर आह। व्या
करणादेः प्रामाण्यमेव नास्ति। निर्मूलत्वात्। प्रयोजनाभावाच्च। शब्दज्ञानस्य लोकप्रयोगादेव तत्सिद्धेः। वेद
रक्षादेश्च ऊहसंप्रदायेनैवोपपत्तेः। तत्कथं। तदुदाहृयत इति तन्नाह। तदनंगीकारे सर्वशाब्दव्यवहारा
सिद्धेः। व्याकरणादिप्रामाण्यानंगीकारे अपभ्रंशादिसंकीर्णैः शब्दैः यो निर्वृत्तो व्यवहारः। लोके हि गोणी ३९
त्यवत माव्यादयोऽपि सास्नादिमति पिंडे प्रयुज्यंते। तन्नस्तेषामपि तद्वलयोगप्रयोगे दृष्यंति शापश्शब्दैरिति
वचनोत्थसवायः स्यात्। अतश्च शब्दापभ्रंशविभागो नास्तीत्यपि निरस्तं। तदभावे फलभेदकथनानुपप
त्तेः। न च शब्दापशब्दविभागो विना व्याकरणादिकं ज्ञातुं अतस्तत्प्रामाण्यानंगीकारे शाब्दव्यवहारए
व सर्वाबाधो व्यवहारः ३

बोधितेन। अत एवाष्टकादिस्मृतिवन्मूलमपि तस्य कल्पनीयं। प्रमादपरिहारार्थत्वेन वेदरक्षादिकमपि
सिद्धमिति। अस्तु वा कासिद्ध्यर्थं प्रामाण्यं तथापि समतीतक्षराक्षरत्वादिलक्षणेन नारायणेन सकलसदाग
मानां प्रामाण्यं कुतः सिध्येत्। न हि निश्चायकप्रमाणेन विना संभावनामात्रेणार्थसिद्धिर्भवति। संभा
वनाकारणमेव च प्रागुक्तं समस्तं। ज्ञेय एतैरिति वाक्यमपि न विशिष्टभगवत्स्वरूपप्रतिपादकत्वं सर्वे
षां सदागमानामाचष्टे। वक्ष्यमाणशंकां न परिहरतीत्यत आह। उक्तं च नारदीये। सर्वज्ञं सर्वकर्त्ता
रं नारायणमनामयं। सर्वोत्तमं ज्ञापयन्ति महान्तः सर्व्व एव हि। सर्वेषामपि वेदानामितिहाससपुराणयोः।
प्रमाणानां च सर्वेषां तदर्थं चान्यदुच्यत इति च। न केवलं सम्भावितमिति चार्थः। अत्राद्येन विशेषणद्वये
न ज्ञेयसद्गुणत्वं लक्ष्यते। तृतीयेन निर्दोषत्वं। चतुर्थेन समतीतक्षराक्षरत्वं। सर्वस्मादुत्तम इति वि
ग्रहे पञ्चमीति योगविभागात्समासः। ज्ञापयन्तीत्यत्र सर्वेषामपि वेदानामित्यादिकं सिंहावलोकनन्या
येनानुवर्तते। अर्थविज्ञानादिभक्तिविपरिणामः। ननु धर्मादिकमपि वेदादिप्रतिपाद्यं। अन्यथा तदसिद्धिप्रस
ङ्गात्। अतः कथमेवमुच्यत इत्यत उक्तं। महान्तः सर्व इति। अत्रोक्तलक्षणेनारायणप्रमाणानां च स
र्वेषां पञ्चरात्रादीनां अन्यत्तु धर्मादिकं तदर्थं भगवत्प्रतिपत्त्यर्थमेवाख्यातं वेदादिभिः। न तत्सकारस्य प्रागेव

३७ सङ्क्षेपेणोक्तइति। अत्राद्वैतवादिनो वदंति। यत्तावत्तुल्यलक्षणत्वाद्वेदस्य विधिनिषेधरूपत्वात्‌ कर्मपरत्वाद्वि
धावद्विषयो न तत्त्वावेदक एव। वेदांतानां तु तत्त्वावेदकत्वेपि जीवेश्वराभेद एव तात्पर्यं। तत्रोक्तोपासनानां
कर्मसमभिव्याहृतानामपि विनश्वरफलसाम्येन बुद्धिशुद्ध्यर्थत्वाज्ज्ञानमविरुद्धं। प्राणाद्युपासनानामपि
प्राणादीनां ब्रह्मप्रतीकत्वेनाद्वैतज्ञानोपयोगित्वात्क्रममुक्तिफलत्वाच्च पाठो न विरुद्धः। एतेन सगुण
ब्रह्मविद्या अपि व्याख्याताः। अद्वारकक्रियाकारकफलरूपभेदप्रपञ्चप्रतिपादकः सर्वोपि वेदो जीवब्रह्म
णोर्निरूपयितुं प्रतिपादनपूर्वकमभेदप्रतिपादनायानुवादपर एवेति सर्वस्याप्यागमस्य जीवेश्वरा
भेद एव तात्पर्यं। कथं सर्वोत्तमत्वादिलक्षणविष्णोस्तात्पर्यमुच्यते। सर्वोत्तमत्वादेर्भेदसापेक्षत्वेनाभेद
विरोधादिति। नहि तेन तन्निषिध्यते। न च जीवेश्वराभेद एव तात्पर्यमागमस्येति। अत्रेश्वरशब्देन ब्रह्मो
च्यते। तस्यैव स्वाधीनमायाशबलस्येश्वरत्वेन परैरंगीकृतत्वात्‌। ऐश्वर्यविशिष्टेन जीवस्याभेदा
नुपपत्तेः। कुतो नेत्यत आह। तत्र प्रमाणाभावादिति। सति हि जीवेश्वराभेदप्रतिपादकप्रधानवाक्ये ३७
तरेषां वाक्यानां कथंचिन्नेदकवाक्यतान्वयसाधनस्य सर्वस्याप्यागमस्य तत्र तात्पर्यं व्याख्यातुं शक्यते। न च
जीवेश्वराभेदे प्रमाणप्रधानवाक्यमस्ति। न तत्कथं तत्रागमस्य तात्पर्यकल्पनं। ननु कथं नास्ति तत्त्व

मसीत्यादीनां जीवेश्वराभेदे प्रामाण्याभावादिति भावः। ननु प्रबलभेदप्रतिपादकानां वाक्यानां विद्य
मानत्वादिति चेन्न। तेषां द्वे ब्रह्मणी वेदितव्ये द्वा सुपर्णेत्यादिभेदवाक्यविरुद्धत्वेनाभेदे प्रामाण्याभावा
दिति भावः। ननु प्रबलविरोधि बाधकं भवति। समबलं च प्रतिरोधकं। उभयथापि कालातीतस्य प्रति
पक्षहेतोरिव विरुद्धस्याप्रामाण्यमुचितं। न चाभेदवाक्यापेक्षया भेदवाक्यानां प्राबल्यं समबलत्वं
वास्ति। जीवेश्वरभेदस्य प्रत्यक्षानुमानसिद्धत्वेन तदनुवादकानां तेषां दुर्बलत्वात्। न चाभेदः प्र
माणान्तरसिद्धो येन तद्वाक्यानामनुवादकत्वं स्यात्। अतो भेदवाक्यविरोधेन अभेदवाक्यानां अप्रामा
ण्यं कथनमयुक्तं। प्रत्युत विपर्यय एवोचित इत्यत आह। न च जीवेश्वरभेदः सिद्ध इत्यनुवादकत्वं भेदवा
क्यानां। सिद्धः प्रत्यक्षानुमानाभ्यां। इतिशब्दो हेतौ। तथा च दौर्बल्यमिति शेषः। कुत इत्यत आह।
आगमं विनेश्वरस्यैवासिद्धेरिति। भेदस्तावद्धर्मिप्रतियोगिप्रतीतिसापेक्षप्रतीतिकः। तत्रेश्वरध
र्मिको जीवप्रतियोगिकभेदः प्रमाणान्तरसिद्ध इति वा वक्तव्यं। ईश्वरप्रतियोगिको जीवधर्मिक इति
वा। पक्षद्वयेपि जीवेश्वरप्रतीत्यावश्यं भावितव्यं। तत्र यद्यपि जीवः साक्षिप्रत्यक्षवेद्यः। तथापीश्वरसिद्धिः।
किमागमेनोत प्रमाणान्तरेणेति वाच्यं। आद्ये वक्ष्यामः। द्वितीये लिङ्गमुपतिष्ठते। तथा च धर्मिप्रतियोगि

४० प्रतीत्यभावात्कथं तदधीनात्प्रत्यक्षादिना जीवेश्वरभेदसिद्धिः स्यात्। कथं च तद्वाक्यानामनुवादकत्वं
दुर्बलत्वं वा भवेदित्येवार्थः। नन्वीश्वरस्य स्वभावविप्रकृष्टत्वात् प्रत्यक्षतोऽसिद्धावप्यनुमानतो सिद्धिर्भवि
ष्यति। तथा च प्रमाणान्तरेण भेदसिद्ध्युपपत्तेस्तद्वाक्यानामनुवादकत्वमेवेति चेत्। किं प्रत्यक्षागम
साहाय्यवतानुमानेनेश्वरसिद्धिरुच्यते उत तद्रहितेन। आद्ये वक्ष्यामः। द्वितीयं प्रतिषेधति। न चा
नुमानान्न सिद्धिः। अत्र हेतुमाह। विपर्ययेणाप्यनुमातुं शक्यत्वादिति। इत्थंभूतलक्षणे तृतीया। प्र
त्यक्षागमसाहाय्यरहितस्यानुमानस्य सर्वथा विपरीतानुमानेन प्रतिरुद्धत्वात्। तथा चोक्तं। उपा
धिप्रतिरोधौ अनुक्तनामातीव दुर्बलाविति। प्रत्यक्षादिसाहाय्ये तु प्रतिपक्षस्य तद्बाधेनोपाधेश्च पक्ष
एव साध्यव्यापकत्वभंगेन निराकरणं क्रियते। तदभावे तु प्रतिपक्षादिकं दुष्परिहरमेव। इतः पर
प्रत्यक्षानुमानसिद्धत्वेऽत्यतः पूर्ववाक्यद्वयमूलकोशेष्वदर्शनात्प्रक्षिप्तमित्याहुः। तथापि गंगाजला
नुप्रविष्टक्षुद्रनदीजलस्येव तस्याप्युपादेयत्वाद्व्याख्यानं क्रियते। केवलानुमानस्य प्रत्यनुमान ४०
विरोधादिस्फुटं प्रपंचयति। विमतं सकर्तृकं कार्यत्वाद्घटवदित्यस्य विमतं विकर्तृकमस्मत्समतक
र्तृरहितत्वादात्मवदित्यनुमानविरोधादिति। सर्वं सकर्तृकमित्यस्य गगनादौ बाधो घटादौ सि

त्वे

द्धसाधनत्वं च स्यात् । तन्निरासार्थं विमतमित्युक्तं । तेन विकर्तृकत्वेन सकर्तृकत्वेन वा यत्र वादिप्रतिवा
दिनोः संमतिर्गगनादौ घटादौ च ततोऽन्यदंकुरादीत्यर्थः । सकर्तृकमुपादानादिविषयबुद्धिमत्सर्वकं त
था च जीवानामेवादृष्टद्वारांकुरादिकर्तृत्वोपपत्तेः सिद्धसाधनत्वमर्थान्तरतां चेति निरस्तं । कार्यत्वा
द्भूत्वाभावित्वात् । तत्र तस्यैवेति लक्षणस्य प्रायिकत्वेनाभियुक्तैर्व्याख्यातत्वाद्दृष्टवदिति युज्यते ।
इत्युक्तेनुमिते सतीश्वर इति शेषः । नहीश्वरादृतेंऽकुरादीनां कर्तोपपद्यते । एवमेव विमतं विकर्तृकं
मित्येतदपि व्याख्येयं । नन्वस्मत्संमतकर्तृरहितत्वादित्यत्रास्मत्संमतत्वं कर्तृरहितत्वस्य वा विशेषणं
कर्तुर्वा । नाद्यः । व्यर्थत्वात् । तत्त्यागे साध्याविशिष्टत्वात् । न परिहारार्थमेव विशेषणमिति चेत् । न ।
सर्वज्ञसाध्याविशिष्टत्वे तत्संभवात् । द्वितीये किं कुलालादिकर्तृविशेषणेनोच्यते । शरीरादिमान्वा
आद्येनेकार्यं । कुलालादिकर्तृरहितस्यापि पटादेः कुविन्दादिकर्तृमत्त्वात् । द्वितीयेपि किं शरीरादिरहितः
कर्त्रङ्गीक्रियते न वा । आद्ये तत्कर्तृव्यभिचारः । द्वितीये पुनर्वैयर्थ्यं साध्याविशिष्टता च । न च सामा
न्यविशेषभावेन भेदः । शरीरादिरहितस्य कर्तुरनङ्गीकारे सामान्यस्यानुपपत्तेः । सामान्याभावस्य विशे
षाभावेन साधनायोगाच्च । उच्यते । कर्तृमत्त्वेनास्माकमसंमतत्वादिसाध्यमर्थोत्राभिमतः । नन्वेवं वैय्य

४१ ध्यादिरूपेणास्ति। धूमानुमानादावप्येवं सप्रतिपक्षताप्रसंग इति चेत्। न। अनुकूलप्रमाणविरोधेन बाधितत्वात्।
अथवा कर्तृत्वं स्वेतरत्वादिद्यनेनाजन्यत्वादित्यस्य ते। अस्मत्समवेतयत्नेन व्यभिचारी क्ष्यादिकं। शरीरं स्वप्रयोजना
ज्ञानसंशयविपर्ययानित्यज्ञानानित्येच्छानित्यप्रयत्नस्मृतिसंस्कारद्वेषसुखदुःखधर्माधर्मवद्
जन्यत्वादिति अनेकप्रतिपक्षसंग्रहायास्मत्समवेतस्य के। एवमपि विशेषणवैयर्थ्यमिति चेत्। न॥
पक्षधर्मतासिद्ध्यर्थत्वात्। परैरपि चक्षुस्तेजसं रूपादिषु पंचसु मध्ये रूपस्यैव ग्राहकत्वात्। प्रामा व
ण्यं परतो ज्ञायतेऽनभ्यासदशायां सांशयिकत्वादित्यादौ पक्षधर्मतासिद्ध्यर्थत्वेन विशेषणस्य प्र
युक्तत्वात्। नन्वेवं व्याप्यभावेनोपेक्षितविशेषणप्रक्षेपेण पक्षधर्मताप्रसाध्यं साधने प्रयोजनाधीन साध्य
प्रमाणेन प्रमाणाधीनप्रयोजनमित्यापन्नं। तथा चातिप्रसंग इति चेत्। सत्यं। वक्ष्यामोऽत्र समाधा
न। अनुमानविरोधादिसत्त्वे न चानुमानात्तत्सिद्धिरित्यनेन न संबंधः। प्रतिपक्षानुमानस्य सोपा ४१
धिकत्वमाशंक्येश्वरानुमानस्यापि तत्साम्यमित्याह। अकार्यत्वमुपाधिरित्यत्र केचित् शरीरिजन्या
त्वमितरत्राप्युपाधिरित्यतरमिति। यद्विकर्तृकं तदकार्यमिति साध्यव्यापकत्वात्। साधनवतः पक्षा
ध्यावृत्तत्वेन साधनाव्यापकत्वात्। उपाधिः प्रतिपक्षानुमानस्य निरोधः। इत्यस्मत्केवलानुमानेनेश्वर

साधयतायत्र सकर्तृकत्वं तत्र शरीरिजन्यत्वमिति साध्यव्यापकत्वात्कार्यत्ववतो यकुरादेर्व्यावृत्तत्वे
न साधनाव्यापकत्वाच्च भवति शरीरिजन्यत्वमुपाधिः। इतरथेश्वरानुमाने इत्यत्रेतरमनीश्वरवादि
नावक्तुं शक्यत इति दोषः। शरीरिविशेषणं व्यर्थमिति चेत्। अकार्यत्वमपि कार्यत्वादन्यत्वे का
र्यत्वरहितत्वं वा वक्तव्यं। तत्राप्यन्यत्वादेरेव साध्यव्यापकत्वसंभवात्समव्याप्तेश्चानपेक्षितत्वा
द्विशेषणवैयर्थ्यमेव। तत्र पक्षव्यावृत्त्यर्थं विशेषणमिति चेत्। तुल्यमितरत्रापि। ननु किं व्यभिचारनि
वारणलक्षणप्रयोजनाभावो वैयर्थ्यं प्रयोजनमात्राभावो वा नाद्यः। व्याप्यगतविशेषणस्येव तथात्वेन
व्यापकगतस्य तथात्वनियमाभावात्। न द्वितीयः। असिद्धेरिति चेत्। एतदपि समानं। अत एव प्रतिपक्षानु
मानेपि विशेषणवैयर्थ्यपरिहतं। विशिष्टस्योपाधेर्हि साध्यव्यापकत्वमस्त्येव। व्यापकनिवृत्तिनिश्च व्याप्यनि
वर्त्तयत्येव। उपाध्यभावश्चात्र प्रतिपक्षत्वेनोक्तः। उपाध्यनुन्नीत एवानुमाने व्यभिचारावारकविशेषणवत्त्वेन दो
षेणोपाध्युन्नीत इति व्यवस्थाश्रयणे दोषाभावात्। अनुकूलतर्केणोपाधिप्रतिपक्षनिरास इति चेत्। न।
तदभावात्। कर्त्रभावे कार्यं न स्यादिति चेत्। न। कारणाभावप्रयुक्तत्वात्कार्याभावस्य कार्यसामान्ये हि
कारणसामान्यायत्तं। अन्यथा कर्मादिकारकविशेषाभावेनासनशयनादिकार्याभावप्रसंगः। कर्मादिकेन

४२ सार्वत्रिकः। कर्त्ता तु सार्वत्रिक इति चेत्। न। तत्सिद्ध्यर्थत्वादेवास्य परकीयप्रयासस्य। यद्यपि प्रतिपक्षेणोपाध्यु
द्भावनमुचितं। उपाधेः प्रतिपक्षोन्नायकत्वे नैवेयर्थ्यात्। तथाप्यभ्युपगमवादोऽयमित्यदोषः। ननु शरी
रप्रेरणायाः सकर्तृकत्वेऽपि शरीरजन्यत्वं नास्ति। कर्मभिन्नस्य शरीरस्य कर्तृप्रेरणानुपपत्तेः। ततः
साध्याव्यापकत्वमिति। उच्यते। शरीरप्रेरणा हि शरीरक्रियानुगुणप्रयत्नवत्त्वं तच्चाशरीरस्य प्रयत्नोऽस
न्निरस्तीति। किं चागमानपेक्षानुमानपक्षेऽनुपलब्धप्राक्कोटिषु पर्वतादिषु कार्यत्वं कुतः सिद्धं। सावय
वत्वादिति चेत्। किमिदं सावयवत्वं। अवयवसंबंधित्वं चेत्। पटावयवतन्तुसंयुक्ताकाशे व्यभिचारात्।
अवयवसमवेतत्वं चेत् जात्यादावनैकान्त्यं। स्वावयवसमवेतत्वं चेत् स्व समवायिकारणसमवेत
मिति फलितं स्यात्। तथा च कार्यत्वमनभ्युपगच्छतस्तदप्यसिद्धं। द्रव्यारब्धद्रव्यत्वमिति चेत्। न। वा
रि निहिते पार्थिवपरमाणौ व्यभिचारात्। द्रव्यसमवेतद्रव्यत्वमिति चेत्। तथापि द्व्यणुकसमवेते ४२
परमाणौ व्यभिचार एव। द्व्यणुके परमाणुसमवेतं न परमाणुः द्व्यणुके समवेत इति चेत्। न। सम
वायस्यातिरिक्तस्य समवेतत्वस्याभावात्। तस्योभयत्रसाम्यात्। समवायपरत्वाद्द्रव्यारब्धद्रव्यत्व
मिति चेत्। न। ऊर्ध्वाधरीभावादर्शनेन समवायातिरिक्ताश्रयाश्रयिभावानिरूपणात्। एव

हारमात्रेणानव्यवस्थितेः पटे तंतुवदित्यादेरपि दर्शनात् । अथ मम परिमाणत्वं सावयवत्वमिति चेत् । न । तस्या
कार्यत्वेप्यनुपपत्त्यभावेनाप्रयोजकत्वादिति । नैवमीश्वरस्यैवासिद्धेः स्तद्भेदस्य प्रत्यक्षानुमानाभ्यां
सुतरामसिद्धिरिति न भेदवाक्यानामनुवादकत्वमित्यत आह । अधुनायमर्थः आयं भेदवाक्यानामनुवादक
त्वव्युत्पादनप्रयासः परस्य सांख्यस्य नानाह । प्रत्यक्षानुमानसिद्धत्वेन भेदस्य तद्विरोधादेवाप्रामाण्य
मभेदागमस्य । येन भेदवाक्यानामनुवादकत्वमुच्यते तेनावश्यं भेदस्य प्रत्यक्षानुमानसिद्धत्वं वाच्यं ।
असिद्धस्यानुवदितुमशक्यत्वात् । तथा च तन्निष्ठेनु तावद्भेदवाक्यानि । भेदग्राहकप्रत्यक्षविरोधादेवाप्रा
माण्यमभेदागमस्यापरिहार्यं । तथा चाभेदागमप्रामाण्यपरिरक्षणार्थं भेदागमानामनुवादकत्व
व्युत्पादनं क्रियमाणं तदप्रामाण्यमेव दृढयतीति व्यर्थमेव । नन्वपौरुषेयत्वेनानाशङ्कितदोषत्वादा
गमः प्रबलः । प्रत्यक्षानुमाने तु दोषशङ्काकलङ्कितत्वाद्दुर्बले । तत्कथं दुर्बलभेदग्राहकप्रत्यक्षादि
विरोधेन प्रबलस्याभेदागमस्याप्रामाण्यप्राप्तिरित्यत आह । तेनाभेदवाक्यस्याप्रामाण्याभावे च
नानुवादकत्वं भेदवाक्यानामिति । तेन प्रत्यक्षादिविरोधेन नानुवादकत्वमित्यत्रापि नेनेति वर्तते । भे
दस्य प्रत्यक्षादिसिद्धत्वेनेति । कुतो नेति चेत्सराकांक्षायामेवेत्याह । नहि बलवत्तोनुवादकत्वमिति । य

४३ धागमस्यप्रबलत्वाद्दुर्बलप्रत्यक्षादिविरोधेनापि नाप्रामाण्यमित्युच्यते नहि भेदवाक्यानामपि वेदत्वेन प्रबल
त्वाद्दुर्बलप्रत्यक्षादि प्रतिपन्नभेदप्रतिपादकत्वेपि नानुवादकत्वे बलवतो कुतो नानुवादकत्वमित्यत आह।
दार्ढ्यहेतुत्वादिति। अयमाशयः। न तावत्पूर्वप्रवृत्तप्रमाणावच्छिन्नविषयत्वमनुवादकत्वं भेदवा
क्यानामस्ति। तथानुपलम्भात्। तथात्वे ह्यर्थसंस्पर्शितया दौर्बल्यं स्यात्। नतः प्रतिपन्नार्थप्रतिपाद
कत्वमात्रमनुवादकत्वमिति वक्तव्यं। तस्यापि परानपेक्षस्वकारणायात्तस्य वैयर्थ्यमेवानुवादकत्वे
बीजमंगीकार्यं। न च तत्सकृतेस्ति। दुर्बलाभ्यां प्रत्यक्षानुमानाभ्यां प्रतिपन्नेपि भेदे साशंके सति तत्र वृ
त्तानां प्रबलानां भेदवाक्यानां निःशंकभेदप्रतिपत्तिहेतुत्वेन सार्थकत्वात्। तथा चानुवादकत्वनिरो
धेनाभेदागमस्याप्रामाण्यं तदवस्थमिति। एवं भेदवाक्येषामनुवादकत्वे सिद्धे यत्परैरंगीकृतं ताभ्यां
भेदप्रतिपादकाभ्यां प्रत्यक्षानुमानाभ्यां वा प्रतिरुद्धत्वान्नाभेदवाक्यानामप्रामाण्यमित्युक्तं। इदानींन
केवलं समबलप्रमाणप्रतिरुद्धत्वादप्रामाण्यं। किंतु प्रबलप्रमाणबाधितत्वाच्चेति वक्तुं सामान्यन्यायं ४३
तावदुत्पादयति॥ प्रत्यक्षादेरागमस्य प्राबल्येपि नोपजीव्यप्रमाणविरोधे प्रामाण्यमिति। यद्यपि प्रत्यक्षा
नुमानाभ्यामागमस्य प्राबल्यमित्युत्सर्गः। तथापि यत्र प्रत्यक्षानुमानयोरागमं प्रत्युपजीव्यत्वं तत्र तयो

रेवततो बलवत्त्वं। ततश्च तद्विरोधेन तस्य न प्रामाण्यमिति तावदंगीकार्यं किंतु नरात्रि चेत्। उच्यते। उपजीव्योपजी
व्योपजीवकयोर्विरोधेन तावदुभयं प्रमाणं वस्तुनो द्वैरूप्यापातात्। नाप्युभयमप्रमाणं। वस्तुनो निःस्व
भावत्वापत्तेः। ततोऽन्यतरस्यैवाप्रामाण्येऽवश्यमंगीकार्ये न तावदुपजीवकविरोधेनोपजीव्यस्याप्रामा
ण्यमंगीकर्तुमुचितं। कुत इत्यत आह। विषयाभावे त्वस्यैवाप्रामाण्यप्राप्तेरिति। येन हि यस्य विषयः
सिध्यति तत्तस्योपजीव्यं। यथा पर्वतग्राहकं धूमानुमानस्य तथा चोपजीवकविरोधेनोपजीव्यस्याप्रा
माण्ये सदुपजीवकस्य विषयो न प्रसिध्येत्। विषयाभावे चोदयाभावेनाबोधकत्वलक्षणमप्रामाण्यं
प्राप्नोति यत्स्वयं नोदेतुमलं नापि बोधयितुं। कथं तदुपजीव्यमप्रमाणी कुर्यात्। अतः परिशेषादनपेक्षत
याप्रबलस्योपजीव्यस्य विरोधेन सापेक्षतया दुर्बलमुपजीवकमेवाप्रमाणं भवतीति सिध्यति। यद्यपि येन
यस्योत्थानं भवति तत्तस्योपजीव्यं न धर्मिग्राहकमात्रं। तथापि प्रकृतापेक्षयैतदुक्तमिति मन्तव्यं। अस्त्वेव
मुपजीव्यविरुद्धस्योपजीवकस्याप्रामाण्यं प्रकृते तु किमायातमित्यत आह॥ तेनैव ह्यनुमानादिनाऽगमस्य
विषयः सिध्यतीति न तत्क्षेपीति। भेदवाक्यानामनुवादकत्वसिध्यर्थं परोपन्यस्तेनैव। अनेन नास्माभिर्बलाद
दमुच्यते किंतु परेणापि तदंगीकृतमिति सूचयति। न केवलं भेदागमस्य किंतु तत्पक्षेप्यागमस्य भेदागमवदभेदा

४८ गमस्यापीति यावत्। जीवं विषयीकृत्य तस्येश्वरेणाभेदो बोधनीयः तत्त्वमसीति। ईश्वरं विषयीकृत्य वा तस्य जी
वाभेदः। क्षेत्रज्ञं चापि मां विद्धीति। उभावपि विषयीकृत्याभेदमात्रं वा नेह नानास्तीति। सर्वथा जीवेश्वरसिद्ध्याभ
वितव्यं। तत्रेश्वरः कार्यत्वाद्यनुमानसिद्धः। जीवश्च प्रत्यक्षसिद्धः। इति प्रत्यक्षानुमाने तत्त्वमस्याद्यागमस्यो
पजीव्ये। एतदेव विवृणोति। अनुमानेनेत्यनुवादित्वपक्षे ईश्वरो बोद्धव्य इति। कुत इत्यत उक्तं अनुवादित्वप
क्ष इति। भेदवाक्यानामनुवादित्वसिद्ध्यर्थं परोक्षानुमानस्येश्वरसाधनायोपन्यस्तत्वात्॥ प्रत्यक्षेणावा
गमः। आगच्छत्येवं गच्छतीत्यागमो जीवः। यद्वा जीवस्य प्रत्यक्षसिद्धत्वं प्रसिद्धमिति तदनुक्त्वा स्वरूपग्राह
कत्वात् उपजीव्यत्वं भवतीति ज्ञापयितुं प्रत्यक्षेण वा गम इत्युक्तं। अथवा चन्नादेन जीवं समुद्दिनोति। तत्रा
पि किं प्रकृत इत्यत आह। अतस्तयोर्विरोधे प्रामाण्यं न स्यादिति। यत उपजीव्यमुपजीवकात्सबलं। उपजीव्य
वाभेदागमस्य प्रत्यक्षानुमाने। अतस्तयोः प्रत्यक्षानुमानयोर्विरोधे सत्यभेदागमस्य प्रामाण्यं न स्यात्। ४८
भवतु प्रत्यक्षादिकमभेदागमस्योपजीव्यं किन्तु तद्विरोधस्त्वत्र नास्ति। नहि प्रत्यक्षं जीवमीश्वराद्भिन्नत्वेन गृ
ह्णाति। नाप्यनुमानमीश्वरं जीवात्। येन तद्विरोधः स्यात्। किन्नाम तत्स्वरूपमात्रं। तथापि तत एवात्रोपजी
व्ये। तत्कथमभेदागमस्य प्रामाण्यं न स्यादित्यत आह। अनुमानसिद्धेश्वरात् अभेदानुभवत एव सिद्धो जी
वस्येति। तत्कथमित्यत आह। अत एव कर्तृत्वेनानुभवादिति। यद्यप्यन्योन्यानपेक्षे प्रत्यक्षानुमाने। न जीवेश्वर

भेदगोचरयत्नस्तथापि कार्यत्वाद्यनुमानेन सर्वकर्तृत्वादिलक्षणामीश्वरज्ञानवतः साक्षिणाच नदिरूहस्वभा
वमात्मानमनुभवतस्ततो भेदज्ञानमवर्जनीयमेवेति। आगमस्येश्वरंगत्वानुपजीव्यत्वानानुमानमिति चे
न्न। नानस्यापि यः सर्वज्ञः सर्वविदित्यादेरनुमानतुल्यत्वात्। आगमग्राहकप्रत्यक्षस्योपजीव्यत्वोक्तेरयमुप
योगः। नेह नानास्तीत्येकत्वागमेन हि स्वप्रपञ्चे तेभेदप्रपञ्चस्य मिथ्यात्वमुच्यते न तत्वागमादिग्राहकं प्रत्य
क्षादिकमुपजीव्यमिति तद्विरोधेन तस्याप्रामाण्यमिति। ननु भेदागमस्याप्रामाण्यमित्याह। न चानुभ
वविरोधे आगमस्याप्रामाण्यमिति। पूर्वमुपजीव्यत्वेन प्राबल्यमाश्रित्यैक्यागमस्य साक्ष्यनुभववि
रोधेनाप्रामाण्यमुक्तं। इदानीमनुपजीव्यत्वानपेक्ष्य प्राबल्यमाश्रित्योच्यते। विरोधप्रकारस्तु प्राग्युक्ता
दित एव। साक्ष्यनुभवविरोधेनैक्यागमस्याप्रामाण्यं। कुत इति चेत्। न। तावदिह तयोरुभयोः प्रामाण्य
मप्रामाण्यं वोपपद्यते इत्युक्तं। ततोऽन्यतरस्यैव प्रामाण्यं वक्तव्यमङ्गीकरणीयं न तावदैक्यागमविरोधेन सा
क्ष्यनुभवस्याप्रामाण्यमङ्गीकर्तुमुचितं। कुत इत्यत आह। आगमप्रामाण्यानुभवस्याप्यप्रामाण्यप्राप्तेरिति।
साक्ष्यनुभवः खलु सर्वप्रमाणप्रामाण्यनिश्चायकः। तथा च तस्य जीवेश्वरभेदविषयेऽप्रामाण्ये सर्वभेदागमप्रा
माण्यविषयेऽपि प्रामाण्यमविश्वसनीयं स्यात्। ततश्चैक्यागमप्रामाण्यं न सिध्येत्। न चास्तिह प्रामाण्यमन्यत्र

४५ प्रमाणीकर्तुं प्रभवतीत्यतः परिशेषात् साक्ष्यनुभवविरोधिनो भेदागमस्यैवाप्रामाण्यं वाच्यमिति। आगमप्रामाण्या
नुभवस्यापीति विषयभेदेन भेदोपचारः। आगमप्रामाण्यविषयेपीति यावत्। अनेनाव्यभिचारितत्वनियमः
साक्ष्यनुभवस्य प्राबल्ये हेतुरित्युक्तं भवति। एवमुपजीव्यत्वानिरवकाशत्वलक्षणस्वभावबलवत्प्रमाण
बाधितत्वादेवागमस्याप्रामाण्यमित्युक्तं। नकेवलमेतावता किंतु बहुत्वलक्षणबलवद्भिरितरैरेव प्रमा
णैर्बाधितत्वाच्च। ननु बहूनि प्रमाणान्येकविषयाणि वा भिन्नविषयाणि वा। आद्ये धिगतमेवार्थमधिगम
यतां द्वितीयादीनां वैयर्थ्ये लक्षणेनानुवादकत्वेन नप्रामाण्यं। द्वितीये स्वस्वविषये तेषामेकैकत्वा
न्न बहुत्वेन तत्कथं बहुप्रमाणबाधितत्वं। बहुत्वे प्रामाण्याभावात्। प्रामाण्ये बहुत्वाभावादित्यत आह। ब
हुप्रमाणसंवादश्च प्राबल्ये हेतुरेवेति। अत्र संवादग्रहणेनैकविषयतापक्षमंगीकरोति। प्राबल्ये हेतुरेवे
ति प्रयोजनवत्त्वाभिधानेनानुवादकत्वं निरस्यति। यद्यपि भेदविषयाणि प्रमाणानि सर्वाण्यप्यका
कारानियतानि। तथापि प्रथमप्रमाणेन भेदे परिच्छिन्नेपि विप्रतिपन्नादिनाकारणांतरेण पुनः शंकायां ४५
तत्रैव प्रवर्तनेन प्रमाणांतरेण निःशंका प्रतीतिर्भवतीति। ननु द्वितीयादिप्रमाणान्यपि प्रथमप्रमाणतु
ल्यानि तत्कथं प्रथमप्रवर्तनावपि शंकाद्वितीयादिप्रवर्तनेनानु निःशंकतेति चेत्। न। सहकारित्वेन सामर्थ्या

त्तिज्ञायस्यानुभवसिद्धत्वादित्याह । बहूनां वचने तस्यैव वस्तुनि वदार्ढ्यं स्यैव वह्नेरिति । पर्वतोग्निमानित्येक
स्य वचने श्रुते तस्मिन्न ज्ञानादिनीकयाथविश्वासाभावद्वितीयस्यापि वचनं शृणोति तत्रापि कारणानां
रोपनिपातेन शंकानुवर्त्तते तृतीयस्यापि । एवं बहूनां वचने श्रुते पर्वतप्रत्यासीदतस्तस्यैवाग्नेः प्रत्यक्षेणाद
र्शने सति विश्वास एव दृढरूपेण । ननु द्वितीयादिष्वप्रामाण्यबुद्धिरिति । अनेन परोक्षत्वापरोक्षत्वरूपं विशे
षमभिदधता अपौरुषेयत्वादिरूपो परो विशेषः सूचितः । अत एव वचनमादावुक्त्वा दर्शनं पश्चादुक्तं ।
यद्येवं द्वितीयादिप्रमाणस्य दार्ढ्यहेतुत्वासंयोजनवत्त्वेनानुवादकत्वं । नहि कुत्रापि तन्न स्यात् । स
र्वत्र सर्वस्य दार्ढ्यस्य वक्तुं शक्यत्वात् । तथा च सिद्धसाधनादेरदूषणत्वं स्यात् । तस्यानुवादकत्वे प्रकृ
ते किं न स्यादित्यत आह । सर्वाविवादस्थल एव कथं चिदनुवादकत्वमिति । अविवादपदेन शंकाका
रणाभावं लक्षयति । कथं चिदित्यनेनेदमावष्टे निःशंके प्रमिते थे पुनः प्रयुज्यमानस्य परार्थानुमान
स्य वाक्यस्य वा वैयर्थ्यं दोषो न स्वार्थानुमानस्य प्रत्यक्षस्य वा तयोः पुरुषाधीनत्वादिति । अत ए
व पर्वं वह्निमानिति दर्शनरीति वो क्तौ । ततः किं प्रकृते इत्यत आह । तथात्र सर्वाविवाद इति । अत्र जीवे
श्वरभेदे येन द्वितीयादिप्रमाणानां वैयर्थ्यं स्यादिति शेषः । कुतो नेत्यत आह । एके त्वाविदिनाम

४६ बहिर्वा रजतं नास्तीति। एवशब्देन विवादस्य सुप्रसिद्धतां द्योतयति। एकत्वावस्तु नाम नादित्वात्। तदनेन
बहुत्वे प्रमाणत्वयोः समावेशः समर्थितः। तथापि बहुप्रमाणविरोधेनैकस्यागमस्याप्रामाण्यं कुतः
प्राबल्यानिश्चयेन वैपरीत्यस्यापि संभवादित्यत आह। बहुप्रमाणविरोधे एकस्याप्रामाण्यं दृष्टं शु
क्तिरजतादाविति। शुक्तिकारजतत्वेन दूरात्प्रतीयमानं रजतं किंतु शुक्तिकैवेयमाप्तवाक्यं
शृणोति। ततः समीपं गतः। प्रत्यक्षेणापि शुक्तिरेवेति पश्यति। पाटनदहनादिलिंगेन तथैवानु
मिनोति। ततो बहुप्रमाणविरोधेनैकस्य रजतज्ञानस्याप्रामाण्यमेव निश्चिनोतीति प्रसिद्ध
मेव। नैनैकस्यानेकस्माद्दुर्बलत्वं सिद्धमिति। एतदुक्तं भवति। एकवाक्यमप्रमाणं बहुप्रमाणवि
रुद्धत्वाच्छुक्तिरजतज्ञानवदिति। ननु शुक्तिरजतज्ञानस्य दुर्बलत्वमप्रामाण्यं च दोषजन्य
त्वप्रयुक्तमेव न बहुप्रमाणविरुद्धत्वप्रयुक्तं। यदप्रमाणं तद्दोषजन्यमिति साध्यव्यापकत्वात्। ४६
साधनवत्यपि पक्षेऽपौरुषेयतया दोषशंकाभावेन साधनाव्यापकत्वाच्चेत्यत आह। न च दोषजन्य
त्वादेव दुर्बलत्वमिति विरोध इति। विरोधः सोपाधिकत्वरूपोऽनुमानस्य कुतो नेत्यतः साधनव्या

पुरुषत्वादित्याह। बहुप्रमाणाविरुद्धानां दोषजन्यत्वनियमादिति। बहुवचनेनानियममेव प्रकटयति। अ
थैकवाक्यजनितज्ञानं हि पक्षः। तस्य पूर्वापरपरामर्शशून्यतादिदोषजन्यत्वं संभवत्येव। अ
वश्यं चैतत्साधनव्यापकत्वं परेणाप्यंगीकार्यमित्याशंक्य यथा नाह। दोषजन्यत्वं च बहुप्रमाण
विरोधादेव ज्ञायत इति। शुक्तिरजतादिज्ञानानां हि दोषजन्यत्वमुपाधेः साध्यव्यापकत्वासिध्य
र्थमवश्यं परेणाप्यंगीकार्यं तत्कुतो ज्ञायत इति विकल्प्य। न तावत्प्रत्यक्षेण। जन्यजनकभाव
स्य सर्वत्रातींद्रियत्वात्। नाप्यन्वयव्यतिरेकानुमेयं। इंद्रियाणामतींद्रियत्वेन तद्दोषाणामप
पि तथात्वात्। नाप्यप्रमाणत्वेन तज्ज्ञानेष्वनुपायाभावात्। न चात्रागमोस्ति। अतो बलवत्प्रमाण
विरुद्धत्वादेव दोषजन्यत्वं तत्रानुमेयं। ततो यद्बलवत्प्रमाणविरुद्धं तद्दोषजन्यमिति व्याप्तिरंगी
कार्या बलवत्त्वं च बाधकप्रमाणस्योपजीव्यत्वनिरवकाशत्वाभ्यामिव बहुत्वेनाप्यंगीकरणीयं
सर्वत्रोपजीव्यत्वादेरभावात्। तथा च बहुप्रमाणविरुद्धत्वस्य दोषजन्यत्वेन व्याप्तिः सर्वथांगी
ति कार्य [illegible] साधनव्यापकत्वान्न तस्योपाधित्वमिति। एवमनेन प्रबंधेनोक्तं प्रमेयजातमुपपत्ति
सिद्धम [illegible] पि न्यायशास्त्रसंमतमादर्शयितुं [illegible] तद्व्याख्यानिपठति। अदुष्टमित्यादि। एतेषां

४१ वाक्यानां मुक्तोपयोगः तत्र तत्रैव दर्शयिष्यामः। प्रमाणानि निरूपणार्थं एतानि वाक्यानि प्रवृत्तानि। स्व
रूपं ज्ञानमेव तदन्यधर्मज्ञानं। स्वरूपज्ञानं स्वलक्षणाधीनं। तत्र यद्यपि सामान्यलक्षणपूर्वकं विशे
षलक्षणाभिधानं शास्त्रप्रतिपत्तिसौकर्याय। तथापि सामान्यस्य व्यवहारेष्वनुपयोगाद् विशेषाणा
मेव तदुपयोगाद् विशेषलक्षणान्येवानुदिष्टानि। येनोपहतमिंद्रियादिकं ज्ञानं न जनयति विप
रीतज्ञानं वोत्पादयति। तदिह तदुष्टं। इंद्रियमिति ज्ञानेंद्रियमेव विवक्षितं। प्रमाणप्रकरणात्। तुश
ब्दो विशेषार्थः। सन्निकर्षस्य नोकरणं। करणविशेषश्चात्र प्रत्यक्षादिकमपि कृतं। तत्र करणस्य
मितिः प्राधान्यात् प्रत्यक्षधर्मीक्षमेवात्र निरूपितं। न त्वनुमानमिदं स्येति कर्तव्यतानामक प्रत्यक्षं। तत्र
तत्रैव वक्ष्यामः इति। इंद्रियस्यादुष्टत्वं काचादिराहित्यं। आप्तीगीकारे निष्ठ व्यापकप्रसंजनेन
कः। तथाशब्देनाप्रसंगात् लक्ष्यसमुच्छिनोति। तथा वक्ष्यमाणविरोधादिदोषरहितमुपपत्तियु
क्त्यादिशब्दादिवाच्यं लिंगमनुमा। साधनकं साधनभेदाद् द्विविधे स्फुटं भवति। तर्कः प्रमाणमे ४१
व न भवतीति नैयायिकादयः। पृथक् प्रमाणमिति जैनाः। तन्निरासायैव मुक्तं। अथवा तत्कृतेनु

मीयते नेनेति तर्के शब्देन समस्तोपपत्तिरुच्यते। तथा च शब्द उपमायां। इन्द्रियमितिव्याप्यमप्यदुष्ट इति। वाक्य
दोषनिरूपणं प्रागेव कृतं। शब्दोऽवधारणे। वाक्यमेव तु न चेष्टापीति। तेन चेष्टास्तु ग्रहार्थं समय
बलेन सम्यक्परोक्षानुभवसाधनमागम इति भासर्वज्ञोक्तं निरस्तं भवति। आगमशब्दस्य वाक्य
एव रूढत्वात्। लोकरूढत्वात्। लोकरूढस्यैव परीक्षकैरन्वाख्येयत्वात्। अन्यथातिप्रसंगा
त्। चेष्टायाश्चानुमानेऽन्तर्भावात्। आत्मस्वरूपभूतं ज्ञानं स्वदृक्। तदिदानीमनुभव इति विवक्षि
तं। शब्दोऽवधारणे। स्वदृगेव न त्वनिर्देष्टिहमाव वर्तनीयं। सर्वज्ञीवानां स्वरूपज्ञानस्यानिर्देष्ट्वनि
यमादिति। अत्र स्वरूपनिरूपणमेव क्रियते। प्रक्रियात्तु प्रमाणलक्षणादि यथातन्त्रानुसारेणाद्र
ष्टव्या। ज्ञानमात्मस्वरूपं न भवतीत्येके। तन्निरासार्थं स्मृत इत्युक्तं विज्ञानघन एवेत्यादिश्रुतिस्मृ
तिसिद्धः। प्रत्यक्षानुमानागमानुभवविरुद्धमेकं वाक्यमित्युक्तं। तत्प्रत्यक्षाद्यज्ञाने दृष्टांतं। अतस्तत्स्व
रूपनिरूपणेन तु ज्ञानकृतं। नन्विन्द्रियादीनामदुष्टत्वं दोषज्ञानाधीनज्ञानदोषास्तु केन ज्ञानव्याद
त्यत आह। वल्कवदिति। वशब्दः स्मरणार्थः। यद्यपि केचित्स्वरूपासिद्ध्यादयोऽनुमानदोषाः प्रत्यक्षादि

४८ सिद्धास्तथापीन्द्रियदोषास्त्वबलत्वप्रमाणाविरोधेनैवज्ञेया नैवान्यथा। यथान्यथानज्ञेयास्तथोक्तं पुर
स्तात्। एतेन दोषजन्यत्वं चेत्युक्तं दृढीकृतं भवति। नचाएके नाभेरेफा छन्दांसि वियति न दृश्यामि
तिव बनान्यानेषु दोषभंगः ज्ञेकनीयः। ननु प्रामाण्यातिरिक्तं किं बलवत्त्वमित्यत स्तान्द्विभज्य द
र्शयति। द्विविधमिति। नहि द्विविधनांत्वभावबलवत अविरोधे कथं निर्णयस्त्वत आह। नयोरिति।
तत्रोपपत्तिं स्त्रवयितुं स्वभावं निरूपयति। उपजीव्यति। आदिपदेनानिरवकाशत्वादिग्रहणं। अतए
वोपजीव्यनिरवकाशप्रमाणाविरोधं प्रथममुक्त्वा बलप्रमाणाविरोधः पश्चादुक्तः। नन्वेतेषु
व परस्परविलक्षणेष्वपि प्रत्यक्षादिषु कस्य प्रमाणेन बाधकस्य प्रवृत्तिः कथमित्यत आह। सामान्यलक्षणयो
गादिति भावेन न दोषः। याथार्थ्यमेवाह। यथावस्थितज्ञेयविषयीकारित्वं याथार्थ्यं। तत्प्रामाण्यं
प्रमाणशब्दप्रवृत्तिनिमित्तं। एवञ्चोदनानधिगतार्थगन्तृत्वादिकं परेषां प्रमाणलक्षणं परास्त
म्। एतेन बहुप्रमाणसंवादस्थले स्वतःप्रमाणस्य पूर्वोक्तं दृढीकृतं भवति। ननु ज्ञेयविषयीकारित्वं ४८
ज्ञानधर्मः। तत्कथमिन्द्रियादीनां प्रामाण्यमुक्तमिति चेत् सत्यं। द्विविधं प्रमाणं। ज्ञानं तत्करणं च।
तत्र ज्ञाने मुख्यमिदं लक्षणं तस्य साक्षात् ज्ञेयविषयकारित्वात्। इन्द्रियलिङ्गशब्देषु तु ज्ञानद्वारा ज्ञे

यद्विषयीकारित्वादमुख्यमित्यतो न कश्चिद्दोष इति भावेनाह। नचेति। करणोपधीन्द्रियलिंगापेक्षया श
ब्दविशेषस्य वेदस्य याथार्थ्यमुख्यं। इन्द्रियलिंगयोरिव तस्य सर्वथा याथार्थ्याभावादिति प्रसंगात्सर्व
पितुशब्दग्रहणं कृतं। ननु ज्ञानं समकक्ष्यतयेति ज्ञानं चेत् ज्ञाने याथार्थ्यमुख्यमिस्तं किं। नतदपि नस
वत्रैकप्रकारमिति वक्तुं द्वैविध्यमाह। ज्ञानं चेति। कथमित्यत आह। बाह्यमिति। आत्मस्वरूपाति
रिक्तं। यदर्थं द्वैविध्यमुक्तं तदाह। बाह्यं चेति। अनुभव एव स्मृत्यनुभवः। कुत इत्यत आह। निर्दोषं चेति।
बाह्यमिति प्रकृतं स्वज्ञादिकमितिवर्तनं तत्त्वरूपनिरूपणार्थं। इन्द्रियलिंगशब्दजन्यं यन्मनोज्ञ नि
रूपनज्ञाद्यं। तन्निर्दोषकरणजन्यमेव प्रमाणमन्यदप्रमाणमिति। द्वैविध्यसंभवेन कदाचित्स
ज्ञायास्पदत्वादमुख्यं। अनुभवस्तु निर्दोष एवेति प्रागेवोक्तमिति भावः। एतेन नवानुभवविरो
धइत्युक्तेर्दृढीकृतं भवति। यदुक्तं ज्ञाने याथार्थ्यमुख्यं करणेष्वमुख्यमिति। तदुपपादयति। अनु
प्रमाणतामिति। ततः प्रामाण्यस्यामुख्यत्वादेव चक्षुरादित्रयमनुप्रमाणशब्दवाच्यतां याति। तथा प्रा
माण्यस्य मुख्यत्वादेव ज्ञानं केवलप्रमाणशब्दवाच्यतां याति प्रामाणिकप्रयोगेषु। अन्यथा तत्
न स्यादित्यर्थः। न मुख्यं ज्ञानं शब्दयोरित्युक्तं तत्र ज्ञानसमकक्ष्यताप्रतीतिं निवारयंस्तस्यापवादमाह।

प्राबल्यमिति। नेत्र चक्षुरित्यक्षादिषु करणेषु मध्ये प्रमाणागमस्य वेदस्य प्राबल्यमुक्तं। न ज्ञातृत्वेव स्मृतौ उत्सर्गेणोक्तस्य
निबंधं न तु नियतं। ज्ञाते तूत्सर्गविषयत्वात् ज्योतिष्टोमहेतोर्नोत्सर्गो लक्ष्यते। कुत इत्यत आह। उपजीव्येति। निखिला
शाब्दरूपलक्षणमेतत्। अमुख्यवेदस्यापि अनेन प्रत्यक्षादेरागमस्य सकलं दृष्टीकृतं भवति। एवं प्रत्यक्षा
दीनां लक्षणानि निरूपितं। विभागस्तु निरूपणीयः। तत्रानुमानविभागस्य बहुत्वात्तदेवादौ करोति। द्विविध
मनुमानं। स्वार्थपरार्थभेदात्। तत्र यत्परोपदेशमनपेक्ष्य स्वयमेव व्याप्तिं ज्ञात्वा व्याप्त्यनुसारेण विवक्षितस्थ
ले व्याप्यं च प्रतीत्य व्याप्तिं स्मृत्वा व्याप्यमनुसंधत्ते। तत्स्वार्थानुमानं। तेनास्य विवक्षितस्थले व्यापकप्रमि
तिरुत्पद्यते। इदंगेव व्याप्यादिज्ञानं परोपदेशमपेक्ष्योत्पद्यते येन तदा परार्थानुमानमित्युच्यते। तत्स
बंधासत्परोपदेशोपि तथोपपद्यते। परोपदेशो वादिनो विप्रतिपद्यते। प्रतिज्ञाहेतूदाहरणेरुदाहरणोप
नयनिगमनैर्वा त्रिभिरेवावयवाख्यैरवांतरवाक्यैरूपेतं महावाक्यं परोपदेशः इत्येके। प्रतिज्ञादयः पंचा
प्यवयवाः सर्वथापेक्षिता इत्यपरे। उदाहरणोपनयौ द्वावेवावयवावित्यन्ये। तानेतान्नियममपश्यन्ननु ४७
घद्दर्शयति। यामिति। अनुमा अनुमानोपयुक्तं परोपदेशवाक्यं। त्रियावयवात्मिकां नियमेनेति शेषः।
साध्येर्थे सावयवनियमानिःप्रयोजन इति यावत्। त्रियैव केयज्ञामहे भवादयोधात इत्यादि प्रयोगस्ति ध्यर्थपि
प्रागमपिकेश्चिद्व्याख्यातः। तनंत्रियादीरूपपन्नं तद्प्रमाणाकांक्षाजननार्थमादौ तावत्साध्यनिर्देशरूपा प्रति

ज्ञा सर्वथाप्यपेक्षिता। ततस्तत्रप्रमाणाकांक्षायांसाधनत्वस्थापकंलिंगवचनंहेतुसंज्ञमवश्यंवक्तव्यं। त
दनंतरंतस्यसाध्यजिज्ञासायांव्याप्तेःप्राथमिकत्वात्तांदर्शयितुंव्याप्तिग्रहणस्थलस्यदृष्टांतस्यस
म्यग्व्याप्तिनिर्देशपूर्वकंवचनमुदाहरणाख्यमावश्यकं। ततःपक्षधर्मताज्ञापनायदृष्टांतेप्रसिद्ध
ह्याविनाभावस्यसाधनस्यपक्षेव्याप्तिख्यापकंवाक्यमुपनयाख्यंवाच्यमेव। ततएतेषामेकार्थप्र
तिपत्तयेनिगमनाख्यमुपसंहारवाक्यमपिसर्वथाभाव्यं। अथवाहेतुनैवार्थात्पक्षधर्मतायालब्ध
त्वाद्विप्रकृष्टेनोपसंहारस्यानपेक्षितत्वात्तदापास्त्रयद्वावयवाःसर्वथाभाव्याः। यद्वापोद्घाततल
क्षणायासंगत्याव्याप्तिपक्षधर्मतयोरभिहितयोस्तदाधारतयालिंगलाभान्निगमनेनसाध्यप्रतीतेरु
त्तरत्रयोवश्यंवाच्याः। यदिवाविवादेनैवसाध्यप्रतीतौव्याप्तिपक्षधर्मतावचनेनैवसाधनधर्मिला
भात्सर्ववन्निगमनस्यव्यर्थत्वादुदाहरणोपनययोर्द्वावेवावयवौवक्तव्यौ। तत्कथमवयवनियमस्यैवेष्य
थामितिचेत्तत्राह। नोपपद्यतेति। व्याख्यादिमल्लिंगमुपपत्तिः। तत्स्मृतिजिज्ञासोपलक्षणमेतत्। दिशादे
हेतौ। सापिनियतावयवत्वेनांगीकृतवाक्यं। प्रमाणानामुपयुक्तता। इदमुक्तंभवतिपरोपदेशोहिगृहीतव्या
प्त्यादिकंप्रतितत्स्मारकत्वेनेतरंप्रतितद्विषयजिज्ञासाजनकत्वेनैवोपयुज्यते। नचागमतयाप्रमितिज

५० न न्यायप्रयुज्यते। प्रतिवादिन्यनाश्वासात्। आश्वासे वा प्रतिज्ञामात्रेणैव परेणेरितरवैयर्थ्यादिति। ततः किमित्य
त आह। अत इति। यत एव व्याप्यादिमल्लिंगस्मारकत्वादिना विनोपयुक्ते नेनया यत्सैवोपयुक्तिरेवोक्ता व्याप्यादिम
ल्लिंगस्मृत्यादिकं यावत्ता भवति। तावदेवानुमानत्वं प्रमाणीपुरोपदेशरूपं वाक्यं। सत्यमेव मतं तु। व्याप्यादिम
ल्लिंगस्मरणादिकमेतेरवयवैर्विना न भवतीत्यतस्तदर्थमेवावयवनियमकुपास्यत इति भावेन। अन्यथा
पि संभवादित्याह। युक्तिरिति। व्याप्यादिमल्लिंगं प्रतिज्ञारूपं निरूपकं स्मृत्यादिजननी यस्याः सा तथोक्ता।
पे एवं हेतुरूपिका दृष्टांतरूपिकोपनयरूपिणी तु यथास्वयं। दृष्टांतशब्देन तद्वचनमुपलक्ष्यते। उदाहर
णैकदेशग्रहणार्थं दृष्टांत इत्युक्तं। निगमनात्मिके त्वपचारितोऽभेदव्यपदेशः। एवं परेत्यापि। कदाचिन्नि
न गमनमेवानुमानस्मृत्यादिकारणं भवतीत्यर्थः। यत तथा शब्दाः समुच्चये अथवा रूपात्मकं शब्दो स्वरू
पस्यैव वाचकः। युक्तिरितित्स्मरणादिकारणोपलक्षणं तं पिंडीकृत्याह। पर्यागिति प्रतिज्ञादिकं पृ
थक् पृथक् पृथगेव युक्तितया युक्तिस्मरणादिहेतुतया प्रमाणत्वमुपयुक्तत्वं याति। तुशब्दो ५०
हेतुगर्भत्वादिवक्ष्यमाणविशेषद्योतनार्थः। यदीदमागमतयानुमानस्य बाधकं स्यात्तत्स्यात्तदाव
यवनियमस्योक्तमध्याहृतं तु स्मरणादिकारणत्वेनोपयुज्यते। स्मरणानुपदेकदेशादिनापि दृष्टं। कि

मुक्तप्रतिज्ञादिभिः। अतो व्यर्थोयं नियम इति समुदायार्थः। ननु प्रतिज्ञायां लिंगं वा न हेतुधर्मयोर्व्याप्तिप
क्षधर्मतयोरन्यतरस्थानस्फुरति। तत्कथमनुमानस्येत्यादि हेतुत्वं तस्य कथं तत्राह। प्रतिज्ञेति। हेतुग
र्भा हेत्वर्थगर्भा हेत्वर्थविशेषणकधर्मिके त्यर्थः। ननु कुतो हि प्रतिज्ञेत्यवार्थः। पृथगवयवान्तरानपेक्ष
या। प्रामाण्यमनुमानस्येत्यादि हेतुत्वं। धूमवानयं तेनाग्निमानित्यत्र केवलार्थिमज्ञो जायते। मया
प्रमाणे दृष्टे तेनेदमुदितं। तत्र पर्वतोग्निमानिति एतावत् [illegible] विषयवचनं। यतोयं धूमवानिति प्रमाणो
क्तिर्भवितुमर्हति। न चेदं प्रत्यक्षमागमो वा अतो लिंगमेवेदमिति निश्चीयते तदीयं व्याप्तिपक्षधर्मते
तु स्मृष्येतेनुसंधत्ते जिज्ञासतेवेति किमनुपपन्नं। अधिकं न्यूनं वैतदिति किमिति नाशंकते। युक्तमे
वायं वेवीतीति वादिनि प्रतिवादिनः प्रत्ययाभावादिति चेन्न। एवंविधानां वाक्यानां लोके शा
स्त्रे सांव्यावहारिकत्वेन तदतिक्रमेण शंकानुदयात्। अन्यथा अग्निशब्दस्यौषधविशेषार्थत्वाशंकया संगति
मप्याशंकेत। तथात्वे चच्छलेन निग्रहीतेति चेत्। तदेव कुतः। प्रकरणाद्यनुसंधानादिति चेत्। समं प्रकृतेपीति।
ननु हेतुमात्रं कथमनुमानस्येत्यादि हेतुर्भवेत्। साध्यधर्मप्रतीत्या व्याप्तेर्धर्म्यप्रतीत्या पक्षधर्मताया
श्च स्मरणाद्यनुदयादित्यत आह। सिद्धत्वेनेति। प्रतिज्ञायाः प्रतिज्ञार्थस्य साध्यधर्मविशिष्टस्य धर्मिणो वि

५१ वादतः पर्वतस्याग्निमत्त्वं कुत इत्यादिप्रश्नवाक्येन वा सिद्धत्वेन बुद्धिस्थत्वेन कारणेन । मानमनुमानस्मरणा
दिस्तु । ननु दृष्टान्तवचनमात्रस्य कथमनुमानस्मरणादिकारणत्वं । लिङ्गधर्म्याद्यन्यतमस्यापि तन्तोऽस्फु
रणादित्यत आह । प्रतिज्ञेति । प्रतिज्ञावयवसहकारिणी यस्यासौ तथोक्तः । तस्य भावस्तत्त्वं । तस्मादिति । न च
विवादादिनोक्त्यावानक्षिद्धिरोधः । कुत्र इत्यश्रुतार्थे । तेन हेतुगमत्वसमुद्भिनोति । अन्यथा लिङ्गधर्मि
णोऽप्रतीतौ प्रतिज्ञापि व्यर्था स्यात् । लिङ्गधर्मिणः पक्षधर्मतायाश्च प्रतीतावपि साध्यधर्मस्याप्रतीत्या
व्याप्तिस्मरणाधियोगात्कथमुपनयमात्रस्योपयुक्तत्वमित्यत आह । उपनयेति । व्याप्तिं व्याप्तिवचनं । केव
लमिति क्रियाविशेषणं । दृष्टान्तोक्तिमप्यनपेक्ष्येति । मानतयातीतिवनेति । दृष्टान्तानुक्तौ तथैव सत्या
र्थेनि प्रतीयत इति चेत् । न । यो धूमवान् सोऽग्निमान् । धूमवांश्च पर्वत इत्येतावता पक्षीत्वात् । व्याप्तिमा
क्षिप्येत्यपि पश्चात्तरप्रदर्शनं । अन्यथासिद्धत्वेन प्रतिज्ञाया इत्युक्तेरीत्येवोपपत्तेः । प्रागनुक्तमपि प्रका ५१
रान्तरमाह । व्याप्तिस्थितिं । प्रतिज्ञार्थसिद्धिसमुच्चयार्थत्वाच्च । अन्यथा पक्षधर्मताप्रतीतेः । कुतः पर्वतो
ग्निमानिति प्रश्नवाक्येन सह व्याप्त्युक्तिमात्रस्यान्वयानास्येवेत्यत उक्तं । नियमाच्चेत्यादिति । यो धूम
वान् सोऽग्निमानिति नियमादित्यादौ उक्ते राश्रयणादित्यर्थः । निगमनस्यानुस्मारकत्वं स्फुटमेवेत्याह । तथेति ।

संपूर्णप्रयोग इवेत्यर्थः। उपसंहारे कृत्स्नरूपं न इति सर्वार्थकं ग्राह कृत्स्नादित्यर्थः। अग्निना व्याप्तस्य धूमस्य पर्वते
विद्यमानत्वात् पर्वतोऽग्निमानित्यादिरूपं वाक्यमत्र विवक्षितं। ननु प्रतिज्ञादिमात्रस्य स्मरणादिहेतुत्वे
कुतः प्रमाणादिति चेन्नापि लाघवं पञ्चावयवस्य महावाक्यस्यापि कुतः। स्मरणादेस्तद्भावभावित्वानुभवादिति चेत्स
मानमेतदन्यापीत्याह। अनुभव इति। प्रतिज्ञादीनामुपपत्तिं विना न स्मारकत्वादिकं। एतेनापोऽनुमेयत्वादित्या
द्यः प्रयोगाः समाहिता भवंति। एवं निर्दोषोपपत्तिरूपेऽनुमाने निरूपिते निर्दोषतया दोषज्ञानाधीनज्ञा
नत्वात्केनत्रोपपत्तिदोषाः इत्यपेक्षायामाह। विरोध इति। योग्यताविरहो विरोधः। असंगतत्वं न्यूनत्वमाधिक्
त्वमाधिक्यं विवक्षितानुपपत्तिर्न्यूनता। आकांक्षाविरहोऽसंगतिः। अनाविरोधोऽसंगतिश्च वाक्यार्थदोषौ।
न्यूनताधिक्यस्यापि। न्यूनताधिक्ये च न दोषौ। न द्वारार्थस्यापि अनेन वाक्यार्थज्ञानद्वारकत्वेनानुमानविभा
गकथनप्रस्तावे तथाविभक्ते न दोषकथनं नासंगतं। ननु कालात्ययापदिष्टत्वादयोऽनुमानदोषाः
परैः परिगणिताः। तत्कथमेतदित्यत आह। ते च भावे संभवयितुं विरोधविभागमाह। विरोधश्चेति।
इति द्विविध इति शेषः। स्वेन इति स्ववचनेन स्वक्रियया स्वन्यायेन स्वाभ्युपगमेन चेत्यर्थः। अन्यतः प्रमाणान्त
रेण। एवमन्यापि विभाग ऊहनीयः। एवं विभागस्तत्किं लक्ष्यमित्यतोऽदिक्यदर्शनायजातेरेतभाविः सिंह

इति सूत्रयितुं तत्त्वरूपं निरूपयति। जनकस्येति। स्वस्य वा जनकस्यान्यस्य वा जनकस्येति सामानाधिकरण्यं। अ
५२ न्यो ऽतिक्रमो विरोधः। किं जनकमित्यत आह। जनकमिति। स्वस्यार्थस्य प्रकाशनात् स्वविषयप्रतिपादनात्। प्र
माणमिति ज्ञापकत्वमात्रेणोपचारः। स्वव्याहतस्य प्रामाण्यायोगात्। अन्ये त्वपि दृश्यतइति दर्शिग्रहणानि नि
रूपपदात्प्रादुर्भावार्थाज्जनेरपादाने ण्यन्ताद्वा कर्तरि डप्रत्यये कृते जमिति ज्ञापकं वाक्यमुच्यते। उपस
र्गाश्च क्रियासंनिधाने सति तद्विशेषका भवंति। असंनिधाने तु ससाधनां क्रियामाहुः। यथा प्राचार्याः प्रांत
वासीति। ततोऽतिरस्य यस्य वाचकः। तथा च जन्यस्य स्वस्य स्वस्यान्यस्य वा जनकस्य ज्ञापकस्यातिरस्य यो जाति
रिक्तो भवति। अत्र स्वाश्च स्वक्रियावास्वन्यायो वा। अन्यथा कालात्ययीतादेरपि जातित्वप्रसंगात्। एवं स्वव्या
हतिर्जातिः। सा त्रिविधा स्ववचनविरोधः। स्वक्रियाविरोधः। स्वन्यायविरोधश्चेति लभ्यते। तथा च स्वतो
विरोधे जातेरंतर्भावः स्पष्टो भवति। एवमन्येषामंतर्भावो द्रष्टव्यः। न केवलमनुमानदोषाणां विरोधा
दिभिः संग्रहः। किंतु परनिरूपितानां सर्वनिग्रहस्थानानामपीत्याह। नियह इति निग्रहस्थानानि। एतेनैव ५२
विरोधादयः। प्रतिज्ञाहान्यादीनां वक्तृदोषाणां कथमर्थवचनदोषेषु विरोधादिष्वंतर्भाव इत्यत आह।
संवादेति। विप्रतिपन्नप्रमेयाभ्युपगमः संवादः। तेषां भावोऽनुक्तिः। एताभ्यां संयुता विरोधादयः। एतेन प्रस

भिज्ञाविरोधादिना व्याप्तिसत्त्वाद्यनुमानदूषणमुपपादितं भवति । नन्वर्थापत्त्यादीन्यपि प्रमाणानि । तानि कि-
मिति न नन्वक्तसाधनतद्व्यतिरिक्तानामेषामेवं न भवितादिति वक्तुमज्ञानस्वरूपस्यानभिवोदुर्ज्ञानिश्चिति न स्वरू-
पं ज्ञापयन्नर्थापत्तिं तावद्दूषयति । अर्थेति इतिनेदमनुमानविभागप्रसंगे प्रमाणांतर्भावकथनमसंगतं ।
अस्याप्यनुमानप्रभेदकथनप्रस्तावात् । यद्वक्ष्यति अनुमाभेद एवेति । अर्थतोनुपपद्यमानस्यार्थस्य
दर्शनात्प्राप्तिस्तदुपपादकार्थान्तरप्राप्ति निरर्थापत्तिरभिधीयते प्रामाणिकैः । यद्यन्यथा काचित्स्यात्तदा न
भाविकथने संकटं भवेत् । यदा त्वेषैव तदा किमत्रोक्तमिति सूचयितुमेव शब्दः । अथवा प्रमाणद्वयवि-
रोधार्थापत्तिरिति स्यात् । आपाततोव्याघातात् । अन्यथोक्तलक्षणाद्बहिर्भावादित्यर्थः । यथा जीव-
तो देवदत्तस्य गृहेऽभावदर्शनेन बहिर्भावविज्ञानं । उपमानस्वरूपमाह । दृष्टेति नगरे गां दृष्टवतः पुरुष-
स्य वने तत्सदृशमन्यं गवयं दृष्ट्वा पूर्वदृष्टस्मर्यमाणे वस्मिन्नगरस्थे गवि यदेतद्गवयसदृशताज्ज्ञानं
जायते । तदेवोपमानं प्रकीर्तितं न च हेतुः । पूर्ववदत्र भावि सौकर्यं स्वचनमेव शाब्दार्थः । यच्छब्दस्सूत्रादिव्यापारा-
नन्तरं सदृशाविति तत्सदृशोऽयमिति वा सादृश्यज्ञानमुत्पद्यते यथा गोसदृशो गवय इति वाक्यश्रवणान-
न्तरमुभयथाप्यस्यार्थो विवादः । तस्य स्फुटप्रत्यक्षादित्वेन पृथक्त्वशंकानास्पदत्वात् । अभावप्रमि-

तिसाधनमभावाख्यं प्रमाणं। तदत्र भविकथनसौकर्याय विभागेन निरूपयति। अभावस्येति। द्विविधद्विविधसा
धनजन्य। द्वैविध्यं विवृणोति। एकमिति। अनुभवनो जायते तु पश्चारेण मम मुक्तिः। उपलब्धियोग्यस्यानुप
लब्ध्या कारणेन द्वितीयं जायत इति विज्ञेयं। द्वयोरुदाहरणमाह। सुखाद्येवेति। सुखाद्ये साक्षिवेद्ये व
स्तुनि प्रतियोगिनि सति यथा इदानीं मम सुखमित्याद्यभावज्ञानमुत्पद्यते तत्साक्षिजन्यं। यत्तु घटादि
के चक्षुरादिवेद्ये वस्तुनि प्रतियोगिनि सति नास्त्यत्र घट इत्याद्यभावज्ञानं जायते। तद्योग्यानुपलब्धि
जन्यं। आनुमानिकागमिकार्थप्रतियोगिकाभावज्ञानस्यानुमानागमजन्यतया मविवादात्तन्नोपन्य
स्तं। एवं निरूपितानामिदानीं अन्तर्भावो वाच्यः। तत्र लोकायतिकं मतमतिक्रम्यान्तरीक्षस्याभावप्रमाण
स्यांतर्भावमाह। एकमिति। सुखाद्यभावज्ञानं साक्षिणः प्रत्यक्षान्तर्भावात्। द्वितीयघटाद्यभावज्ञानं। यो
ग्यानुपलब्धेर्लिंगत्वात्। घटो चेदानीं नास्ति योग्यत्वे सत्यनुपलभ्यमानत्वात्। गजवदित्यादि प्रयोग
संभवात्। उक्तस्यापवादमाह। क्वचिदिति। न केवलं सुखाद्यभावस्य परः। अत्रायं विवेकः। पदार्थका ५६
रे किमत्रास्ति घटो न वेति विमर्शपहस्त प्रसारणादौ क्रियमाणेपि घटमनुपलभ्यमानास्यत्र घट इति
जानाति। तत्र योग्यानुपलब्धिर्लिंगकमनुमानं। यदा चराजगृहादि मात्रमनुभूय गजस्मरणा

३ भावेन गजाभावमननुभूयान्यत्र गतः। पुनर्जिज्ञासायां सत्यामिन्द्रियव्यापाराभावेऽपि नाभूदत्र गज इति
जानात्येवं श्रान्तरत्र गजो नाभूदिति वा भावज्ञानं। अत्र स्मरणायोग्यस्यास्मरणं लिंगं। यथानुस्मृतालोके
घटस्मृतिमतः पुरोवर्त्तिनि भूतले विनाविमर्शेन चक्षुर्व्यापारानन्तरमेव नास्त्यत्र घट इति ज्ञानमुत्प
द्यते। तत्प्रत्यक्षजन्यमिति अस्य साक्षात्प्रतियोगिकाभावज्ञानस्य सर्वस्यापि लिंगोद्भवत्वेति सौगताः। तं
निराकरोति। इन्द्रियेवेति। पश्चाद्दर्शनेन लिंगज्ञानव्याप्तिस्मरणलिंगानुसंधानरूपाविलंबेन विनाघ
टाभावस्यपिरितो परोक्षतया च ज्ञानेन सर्वस्याभावज्ञानस्यालिंगोद्भवतामतानुभवानुसारि
णी। अभ्यासपाटवाच्च व्यवधानेनानुपलब्धिः। अपरोक्षाधिकरणानुभवसंनिधानाच्चापरोक्षता
भिमान इति चेत्। न। धूमानुमानेऽपि तत्प्रसंगात्। बाधकाभावाच्च। अभावस्य तु दूरत्वेन साक्षा
त्कारविषयत्वानुपपत्तिर्बाधकमिति चेत्। तथा सति शशविषाणवदनुमितिविषयत्वस्याप्य
भावापातात्। विमर्शानन्तरं जायमानमप्यभावज्ञानं प्रत्यक्षफलमिति नैयायिकादयः। तद
प्यसत्। परोक्षतयानुभवात्। तदपलापे वाग्निज्ञानस्यापि परोक्षता न स्यात्। सर्वत्राभावज्ञा
नस्यानुपलब्धिरेव करणं। सा च स्वरूपेणैव न तु लिंगतयेति चेत्। न। अपरोक्षप्रतिपत्तेरनुभ
वसिद्धत्वात्। व्याप्त्याद्यनुसंधानस्यापि तथात्वात्। अधिकरणग्रहणप्रतियोगिस्मरणयोग्यानु

५४ पलब्धिश्चेत्येतावतानुद्भवयवादिसिद्धं। तन्मात्रेणैवाभावज्ञानोत्पत्ताविन्द्रियादिव्यापारकल्पना
या गौरवप्रसंग इति चेत्। न। कल्पकस्याक्लृप्तत्वात्। अभावेनेन्द्रियस्य संनिकर्षो नास्तीति चेत्। न।
घटेऽस्तीत्यपि कुतः। अपरोक्षप्रतीतिबलात्तत्कार्यं कल्प्यत इति चेत्। तदपरोक्षत्वमपि कुतः। प्रती
तिग्राहकप्रमाणादिति चेत्। सममेतत्सर्वं प्रकृतेऽपि। कोऽसौ संनिकर्ष इति चेत्। संयोग एवेति ब्रूमः।
वैशेषिकादिप्रक्रियाया अप्रामाणिकत्वात्। किं च यथा कार्यदर्शनेन संयोगातिरिक्तः सम
वायोऽङ्गीक्रियते तथेन्द्रियाभावयोरप्यपरः कल्प्यताम्। अनुपलब्धेर्लिङ्गत्वे तज्ज्ञानावश्यंभावित्वा
दभावस्यापि विशेषणानुपलब्ध्यपेक्षायामनवस्थापात इति चेत्। न। अनुपलब्धेः साक्षिवेद्यता
याऽनुक्तत्वादिति। अर्थापत्त्युपमानयोरन्तर्भावमाह। अर्थापत्तिश्चेति। अनुमानसामग्रीसद्भा
वस्य स्फुटत्वादिति हेत्वर्थः। एवञ्चावदपृथक्प्रमाणत्वव्याख्यानं व्यर्थः। तुशब्दोऽभावाद्यवच्छिनत्ति।
तस्याप्यत्रान्तर्भावात्। एतयोस्त्वनुमान एवेति। ननु देवदत्तस्य बहिर्भावे न तावज्जीवनमेव ५४
लिङ्गं। गृहे सति व्यभिचारात्। नापि गृहेऽसत्त्वमात्रं। मृतादौ व्यभिचारात्। न च विशिष्टं। येन हि
जीवनं गृहेऽसत्त्वं निश्चितं। तस्य परस्परविरोधेन विशेषणविशेष्यभावानुपपत्तेरिति चेत्। न।
विप्रतिपन्नोऽसंशयस्यैवावश्यकत्वेनार्थापत्तेरप्यनुदयप्रसङ्गात्। अतो जीवनप्रमितौ न सामा

न्यतो जीवने प्रमिते गृहाभावप्रमाणेन च प्रसक्तप्रतिषेधे सति परिशिष्यमाणो बहिर्भावे बुद्धिरनुमान
जन्यैव। अन्यथा परिशेषस्यापि पृथक्प्रामाण्यं स्यात्। एतेन गृहाभावप्रमाणेन संदिग्धे जीवनविशेष
णे भवतीति चेत्। न। भिन्नविषयत्वेन संशयाजननात्। गृहाद्बहिर्भावस्यानेनानवगतत्वात्। कथम
नुमानमिति चेत्। न। केवलव्यतिरेकित्वोपपत्तेः। यो जीवन् यत्र नास्ति स ततोऽन्यत्रास्तीति सामान्य
व्याप्तेश्च। तर्हि मुक्तमनुमानभेद एवेति स्यादेतत्। पक्षान्तरासंभवादुपमाने गां पक्षीकृत्य तद्ग
तसादृश्यमनुमेयं। गवयगतत्वसादृश्यलिंगमिति वाच्यं। तथा च व्यधिकरणत्वान्नानुमानमिति।
मैवं। यो यत्सदृशः स तत्सदृशो यथा यमो यमीतरेणेति व्याप्तिसंभवेन नैव व्यधिकरणस्यादोषत्वात्।
गवयगतसादृश्यप्रतियोगित्वस्य लिंगत्वेनांगीकाराद्वा। सदृशावेदयेन प्राङ्नोपलब्धो तस्य कथ
मिति चेत्। न। केवलव्यतिरेकित्वोपपत्तेः। अत एवोक्तं। अनुमाभेद एवेति। किं च स्वकरतलदृष्टयोः स
वैरपि व्याप्तिर्गृहीतैवेति यत्किंचिदेतत्। नैयायिकोदीरितोपमानस्य त्वनुमानेंतर्भावः स्फुट एवे
ति नेदं पुनः शंकितं। अनेन प्रत्यक्षादिविरोधवदर्थापत्त्यादिविरोधोऽप्युक्तः। आगमस्य कुतो नोक्तं इत्यादि
परिहृतं भवति। अनुमानानन्तरमागमस्य विभागमाह। आगम इति। अपौरुषेयः पौरुषेयश्चेत्यर्थः।

55 तथैवेत्यनेनयथाप्रत्यक्षमनुमानंवाप्रमाणंअन्यज्ञानंतर्भितं।तथागमोपीत्याचष्टे।नचाहि।नतावदा
गमोनबोधकः।अनुभवविरोधात्।व्यवहारविलोपप्रसंगाच्च।नापिविपरीतबोधकः।बाधकाभावात्।
अन्यज्ञानंतर्भावोपिकिंकर्तुंशक्यतेइत्येनवाकुतेच्चः।उतएषबाधकसद्भावात्।अथवासाधका
भावात्।[redacted]नाद्यः।प्रत्यक्षस्याप्यनुमानेंतर्भावयितुंशक्यत्वात्।फलत्वेनोपाद्यादेरवान्तरभेद
त्वोपपत्तेः।नद्वितीयः।तद्दर्शनात्।कल्पनागौरवंबाधकमितिचेत्।न।प्रत्यक्षेपिसमानत्वात्।
सामग्रीभेदादेरत्रापिविद्यमानत्वात्।अतएवनतृतीयः।किंच।अनर्भावोपिवक्तृज्ञानानुमापक
त्वेनवक्तव्यः।नचापौरुषेयस्यमूलेभूतंज्ञानमस्तिसमर्थितंचापौरुषेयत्वंवेदस्य।अपौरुषे
यत्वस्यपृथक्क्रियमाणत्वोपिपौरुषेयस्यानुमानत्वमेवेतिप्राभाकराः।तन्निरासार्थमप्युक्तंतथे
वेति।यथानित्यस्तथानित्योपीत्यर्थः।नचाहि।पौरुषेयवाक्यस्थानिपदान्यन्विताभिधानशक्तिम
न्तिनुवेतिवाच्यं।आद्येकथंनागमनंतरत्वं।द्वितीयेवेदस्यापिकथमागमत्वं।पदानामभेदात्।अ 55
थोच्यतयद्यपिपुरुषप्रयुक्तानांपदानामन्विताभिधानसामर्थ्यमस्ति।तथापिप्रायेणपुरुष
स्यसामन्नेभ्रान्तिप्रत्वेनान्विताथेशंकया।अन्वयोननिश्चीयतइति।एवंतर्हिशब्दोप्यापितस्या

प्यर्थस्यव्याप्तिवारेणवेदेपिशंकासंभवयेवेसन्देयोननिश्चीयेत। तथापितुपौरुषेयतयाशंकानिवृत्तिर्वक्तुराप्ता
प्तोक्तत्वादिनाशंकानिरस्तिभवति ध्वनि। तथाचशब्दोदृष्टान्तं नदुपपन्नं भवति। अथ परिशेषमाः प्रत्यक्ष
प्रत्यक्षस्यविभागमाह प्रत्यक्षमिति। ऐश्वरमिति विद्योऽस्मि। दैवान्वयनिश्चयः अशाभाष्यशंकानिवृत्तिमा
त्रमुपायान्तरेणोतिलोकवेदयोः समानमेवति। एतेनयदृगाधाइत्युक्तं तदुपपन्नं भवति। अथ परिशेषतः
प्राप्तस्यप्रत्यक्षस्यविभागमाह। प्रत्यक्षमिति। ऐश्वरमिति विद्योऽस्मिय ब्रप्रत्यक्षमेकीकृत्योक्तं। समा
धिपरिपाकवंतोयोगिनः तदीयं प्रत्यक्षं योगिकं अस्मदादीनां प्रत्यक्षमयोगिकं। ईश्वरस्यशरीरेंद्रियर
हितत्वान्नतत्प्रत्यक्षत्वोक्तिरौपचारिकीतिशंकानिरासार्थमाह। तथा सर्वमिति यथायोगिकं तथासर्व
मेश्वरमपीतियावत्। तथासतिसर्वेंद्रियविवर्जितमित्यादिविरोधइत्यतआह। अस्तानीति। भिन्नज
डेंद्रियाभावपरंतक्षक्यमितिभावः। इन्द्रियानि। यदाहभगवानितिसूदे। एतेनान्येषामभिन्नान्येवेतिप्राप्तमत
आह। अन्येषामिति। द्वैविध्यमेवदर्शयति। स्वरूपाणि चेति। यद्दृष्टमिंद्रियमितिसदुष्टत्वमुक्तं। नस्वरूपेंद्रि
याणांस्वरूपकथनमात्रं। भिन्नेंद्रियाणामेव तु विशेषणामितिज्ञापयितुं तद्विभागमाह। भिन्नानीति। सम्य
क्ज्ञानप्रचुराणिदेवानि। मिथ्याज्ञानप्रचुराण्यासुराणि। उभयसमानिमध्यानि। ननुप्रत्यक्षंत्रिविधमि

५६ क्रान्तमसङ्गतं। अक्षस्यैव प्रकृतत्वात्। हेश्वरमित्यादिना तस्यैव निर्दिष्टत्वाच्च। अत एवैतस्य समासमीरि
तमिस्रूपसंहारो प्यनुपपन्न इत्यत आह। विषयाणीति। निर्दोषानु स्वविषयानु प्रति स्थितं। तैः सन्निकृष्टं।
अनून मर्थ समासो यमिकृतो भवति। अव्ययीभावे हि प्रत्यक्षस्येति षष्ठी न श्रूयेत। यतो क्षमेव निर्दोषं
स्वगोचरसन्निकृष्टं प्रत्यक्षमिति कीर्तितं नादिके नैवर्थान्तरं। अतो नुतिमि न्नत्वाच्च केचिदुहिरोधः।
निर्वचनप्रसंगादक्षशब्दमपि निर्वक्ति। अक्षयमिति। एतेन नञुपपदे क्षे क्षय इत्यस्माद्धातोनुपस
र्गे कृ इति कप्रत्यय इत्युक्तं भवति। अक्षयमक्षमिति निर्वचनं किमन्वर्थमुत नेति शङ्कायामाह।
पुरुषस्य स्वरूप इति। एतन्नु निर्वचनं पुरुषस्येश्वरादेः स्वरूपे मुख्यमन्वर्थमेव। तदन्यत्र
विभिन्ने क्षे शब्दस्योपचारत्वं। कुतः। यतः स्वरूपेधानिसस्यापित्तस्य स्वचिरकाले भौतिकाहं
कारिकावयवोपचयरूपो सन्निरस्ति। प्रलये च तदपचयलक्षणः क्षयश्च। अतो मुख्यासंभवाद
कदेशाक्षस्यत्वनिमित्ता गौणी वृत्तिरिति। एतेनानुभवस्य प्रत्यक्षादिजन्यान्तर्भूतस्य प्रमाणत्वाभावा
त्कथमेकागमस्य तद्विरोधेनाप्रामाण्यमुच्यत इत्याशङ्का परिहृता भवति। स्वरूपेन्द्रियाभिव्यक्तस्या ५६
नुभवस्य प्रत्यक्षानन्तर्भूतत्वात्। प्रमाणत्रितयसिद्धये संभवपरिशेषादीनामन्तर्भावमाह। उपपन्नो

ति। व्याप्तिस्मरणमपेक्ष्यार्थप्रमितिजनकत्वात्संभवादिकमपि प्रमाणमनुमैव। एवमेतिह्यस्याप्याग
मेन्तर्भावो बोध्यः। अर्थापत्त्यादीनि वादिभिः पृथक्प्रमाणतयाङ्गीकृतानि। ननु संभवादीनि। किंतु प्राती
तिकमेव तेषां पृथक्त्वमिति ज्ञापनाय विप्रकर्षेणोत्तरभावोक्तिः। प्रत्यक्षशब्दे निरुक्ते अनुमानशब्दे च
प्रसक्ते तन्निर्वचनजिज्ञासायां तत्स्वयमाह। प्रत्यक्षेति। अनुकूलाभ्यां प्रत्यक्षागमाभ्यामुपोधि
प्रतिपक्षनिरासात्प्रमाणतामर्थनिश्चायकतां यातीति। अन्यथोपपत्त्यादिग्रस्तस्यानियतत्वे निश्चयहेतु
त्वं। एतेनानुसंधीयमानमनुमानमिति निर्वचनं सूचितं। एवमासमन्तान्मीयतेनेनार्थ इत्यागमशब्दनि
रुक्तिः। इष्टव्याप्तीति। एतेन विपर्ययेणाप्यनुमातुं शक्यत्वादिस्फूर्तिर्दृढीकृता भवति। इदानीं प्रकृतम
नुसरन्नुक्तमेवार्थं विशदयति। तथा चोक्तं नियतः प्राक्तनेन ग्रन्थेन। यदुक्तमुपजीव्यविरोधादे
कस्यागमस्याप्रामाण्यमिति तदसत्। अपौरुषेयत्वेन निर्दोषस्याप्रामाण्यायोगादित्यत आह। अ
त्रैवेति। अत्र ब्रह्मात्मैक्यवाक्ये चोपजीव्यत्वेन प्रमाणप्राबल्यस्योक्तत्वादुपपत्तिसिद्धत्वाच्चोत्तरप्र
कृते प्रत्यक्षोपजीव्यत्वेन भेदप्रमाणप्राबल्यान्नाद्वैतरूढस्यैक्यागमस्याप्युपजीव्यानुसारेण जीवे
श्वरभेद एव तात्पर्यं युक्तं। ननु भेदाभेदद्वयस्यैव प्रतीतार्थप्रच्युतिरेवाप्रामाण्यपदेनोक्ता। ननु सर्व

५७ थाप्रामाण्यमितिभावः। यदुक्तं भेदागमविरोधादैक्यागमस्याप्रामाण्यमिति। तदयुक्तं। भेदवाक्यानांप्रत्यक्षा
दिसिद्धभेदानुवादित्वेनदुर्बलत्वात्। ऐक्यागमस्यत्वपूर्वतालक्षणाबलवत्वात्। यदप्युक्तं। ईश्वरस्यैवासिद्धेरिति।
तन्न। केवलानुमानेनेश्वरसिद्ध्यभावेप्यागमानुकूलेनानुमानेनागमेनैववातत्सिद्ध्युपपत्तेरित्यत आह। कथमि
ति। अनुवादकत्वंभेदवाक्यानामितिशेषः। भवतु जीवेश्वरयोः प्रमाणांतरेणसिद्धिः। नतावतातद्भेदवाक्यानामनु
वादकत्वं। भिन्नविषयत्वात्। किंतुभेदस्यापिप्रमाणांतरेणसिद्धौ। नचसापरेणांगीकृतेत्याशंक्याह। अतोजीवे
श्वरभेदस्यप्रमाणांतरेणासिद्धेस्तद्भेदवाक्यानांकथमेवानुवादकताभवतीति। ननुकेवलंजीवेश्वरौकिं
नामतद्भेदोपिप्रमाणांतरसिद्धएव। अतोभेदवाक्यानामनुवादकत्वसिद्धिरित्यत आह। सिद्धोयदीति। भेदस्यप्र
माणांतरेणसिद्धत्वमंगीक्रियमाणायामभेदवाक्यस्यतेनप्रमाणेनाबाधोनुपरोधः कथंस्यात्। नकथंचिदि
अतोभेदवाक्यानामनुवादकत्वसिद्धये भेदस्ययन्नप्रमाणांतरसिद्धिरंगीक्रियते। ऐक्यवाक्यस्यतत्प्रमाणा
परोधप्रसंगात्। भेदस्यप्रमाणांतरेणसिद्धेरभ्युपगमस्तुमन्त्राकयत्वेनतद्वाक्यानांनानुवादित्वंवक्तव्यं। एवम ५७
पिभेदवाक्यविरोधोभेदवाक्यानांस्यादितिचेत्। तत्रीयपरस्याभयतःपाशारज्जुः। तदुपात्तत्त्वमस्यादि
वाक्यानांभेदएवतात्पर्यमंगीकार्यमिति। जीवेश्वरभेदः प्रत्यक्षादिसिद्धएव। तेनभेदवाक्यानामनुवा
दित्वासिद्धिः। किंतुतत्प्रत्यक्षादिकमप्रमाणमेवव्यावहारिकत्वमात्रेणतत्रप्रमाणवाद्यायुक्तिरैक्यवाक्यंतु

तत्त्वावेदकं प्रमाणं। अतीनन नेनोपरुध्यत इति चेत्। अत्र वक्तव्यं भेदवाक्यमपि किं प्रमाणमुताप्रमाण
मिति। आद्ये वक्ष्यामः। द्वितीये दोषमाह। न चेति। अप्रमाणत्वसिद्धेन प्रतिपादितेन निमित्तेन। यदि प्रत्यक्षादेर
प्रामाण्यं भेदवाक्यानां तु प्रामाण्यमङ्गीक्रियते। न तर्हि तुल्यविषयत्वं स्यात्। समानविषयत्वे हि द्वयमपि प्रमाणं
स्यात्। अप्रमाणं वा। न तत्रायं विभागः। भिन्नविषयत्वे च नानुवादकत्वं भवति। अतः प्रामाण्याप्रामा
ण्यविभागो नुवादकत्वं चेति परस्परपराहतमिति भावः। किं च प्रत्यक्षादेः कुतो प्रामाण्यं। ऐक्यवाक्यवि
रोधादिति चेत्। न। अन्योन्याश्रयप्रसंगात्। सिद्धे खल्वैक्यवाक्यप्रामाण्ये तद्विरोधेन प्रत्यक्षादेरप्रा
माण्यसिद्धिः। तस्यां च सत्यां विरोधिप्रमाणाभावेनैक्यवाक्यप्रामाण्यसिद्धिरिति। स्यादेतदन्योन्या
श्रयत्वं यद्यैक्यवाक्यं भेदविषयप्रत्यक्षादिकं च समानबलं स्यात्। न त्वेतदस्ति। श्रुतेरपोरुषेय
त्वेनानाशङ्कितदोषायाः प्रबलत्वात्। प्रत्यक्षादेः संभावितदोषस्य ततो दुर्बलत्वात्। प्रबलस्य दुर्ब
लविरोधपरिहारानपेक्षमेव प्रामाण्यस्थितेरित्यत आह। दुर्बलत्वे चेति। यदि श्रुत्यपेक्षया भेद
प्रमाणस्य प्रत्यक्षादेर्दुर्बलत्वमाश्रित्यान्योन्याश्रयत्वपरिहारः क्रियते। तदा भेदवाक्यानामनुवादित्व
मुच्यमानं न स्यात्। कुतः। आभासत्वात्। अकिंचित्करत्वात्। यथा हि दुर्बलत्वात् प्रत्यक्षादिकं नैक्य

श्रुतेर्विषयापहारं करोति न थानभेदश्रुतेर्विषयापहारमपि करोति। तथा च स्वातन्त्र्येण स्वविषये प्र
वृत्ताभेदश्रुतिः कथमनुवादिनी स्यादिति। न केवलमननुवादित्वसाम्यात् भेदाभेदवाक्यानां समबलत्वं।
किंतु स्वातन्त्र्येण प्रवृत्तानां भेदवाक्यानां संवादागमेन प्रत्यक्षादिसंवादे नैक्यवाक्यापेक्षया प्राबल्य
मेव तत्स्य संवादाभावादित्याह। अतश्चेति। तथा च तद्विरोधादैक्यवाक्यस्याप्रामाण्यमिति शेषः। न
न्वेतद्विपरीतमेव स्यात्। प्रमाणान्तरसंवादवतां भेदवाक्यानां प्राबल्यं तद्रहितानामैक्यवाक्यानां दौ
र्बल्यमिति। यतः संवादोऽपूर्वताविरोधी तद्राहित्यमपूर्वताहेतुः। अपूर्वतायां च प्राबल्यलिङ्गतया प्रसिद्धा।
ततः प्रमाणान्तरासिद्धमपूर्वमर्थं प्रतिपादयतामैक्यवाक्यानामेव प्राबल्यादन्येषामपि वाक्यानां
तदेकवाक्यत्वाज्जीवेश्वरैक्ये सर्वागमानां महातात्पर्यमिति। अत्र वक्तव्यं। किं प्रमाणान्तरविरोधे
ऽप्यपूर्वतामात्रमाश्रियेत इष्यते उत न तद्विरोधे। आद्ये तिप्रसङ्गमाह। सर्वेति। सर्वप्रमाणविरुद्धानामे
कुवचनानामेवापूर्वतामात्रेण प्राबल्याङ्गीकारे तथान्येषामपि वाक्यानां तदेकवाक्यतां व्याख्याय स ५८
र्वागमानां जीवेश्वरैक्ये महातात्पर्याङ्गीकारे दुर्वारः स्यादीनामेव वाक्यानां प्राबल्यमङ्गीकर्तव्यं कु
तः। अविचारेण प्रतीयमानस्य तदर्थस्य सर्वप्रमाणाविरुद्धत्वात् सर्वप्रमाणासिद्धत्वादपूर्वत्वाच्च प्रा
भादितियावत्। तथा चान्येषामपि तदेकवाक्यतामादाय तत्र अहं न्यस्य च जगत्कारणत्वे सर्वागमानां

महातात्पर्यभंगी कार्यप्रसज्येतात् विशेषादिति। इत्यादीनामर्थस्येति संबंधः। अर्थस्य यतावद्भङ्क्ते वस्तुन
स्तदर्थत्वे प्रतीयते। अतो विचारेणैव प्रतीयमानस्य भङ्क्ते। एतेन तत्त्वमस्यादिवाक्यानामपि जीवब्रह्मैक्यम
विचारेणैवार्थतया प्रतीयत इति सूचयति। प्रमाणान्तरविरोधाभावे पूर्वेनाप्राबल्यहेतुर्न तु तद्विरोधे। अ
स्ति च शून्यस्य जगत्कारणत्वे प्रमाणविरोधः। विमतो विवादः नासद्धेतुको विनाशित्वाद्घटादिविनाशवत्।
आदिकार्यसत्कारणकं कार्यत्वात् पटवदित्यादियुक्तिविरोधात्। अतो नातिप्रसंग इति द्वितीयपक्षमाशंक्या
ह। नचचेति। कुतो न चाव्याप्तिरिति चेत् नइदेवेक्यवाक्यानामपि तर्हि सर्वप्रमाणविरुद्धत्वान्नापूर्वतामात्रेण
प्राबल्यमित्याशंक्याप्रसक्तादिपरिहारस्य स्फुटत्वात्सो ह्यसंपरिहारान्तरमाह। तस्मिन्निति। अननुवादित्वं प्राब
ल्यकारणमित्यस्मिन्पक्षे युक्तिविरुद्धत्वादिदं वाइत्यादीनां न प्राबल्यमिति वक्तुं न शक्यते। यतो यु
क्तिविरोधेनाननुवादित्वं भवतीति युक्तिविरोधो गुणएव स्यात्। प्राबल्यकारणस्याननुवादित्वस्य
हेतुभूतो युक्तिविरोधः कथं प्राबल्यविरोधी भवेदित्यर्थः। युक्तिविरोधः कथमननुवादित्वस्य हेतु
रित्यत आह। युक्तीति। शून्यस्य जगत्कारणतायां युक्तिसिद्धत्वे हीदं वा इत्यादिवाक्यस्यानुवादित्वं
स्यात्। न तु अविरोधिनी युक्तिस्तासाधिका युक्तिमासीकुर्वतीस्यादेवाननुवादित्वस्य हेतुरिति

५८ भावः इदं वाक्यादिवाक्यं वेदवाक्यस्यापि प्रमाणविरुद्धत्वान्नापूर्वतामात्रेण प्राबल्यमिति यदभिप्रेतं तदसत्। अभे
दवाक्यानां प्रत्यक्षादिसिद्धार्थविषयतयानुवादित्वेन दुर्बलत्वात्। भेदवाक्यागमस्यानुवादित्वेन प्राबल्यात्। प्र
त्यक्षादेरप्रमाणत्वात्। नहि प्रबलस्य प्रमाणस्य दुर्बलेनाप्रमाणेन च विरोधात् किंचित्करो भवतीत्या
शंक्योपसंहारव्याजेन प्रागुक्तमेवोत्तरमाह। अनंद इति। भेदवाक्यानामनुवादित्वासिद्ध्यर्थं भेदस्य प्रत्य
क्षादिसिद्धत्वं गीकृत्य प्रमाणे प्रत्यक्षादिप्रमाणप्रतिरुद्धत्वेनाभेदवाक्येन भेदनिराकरणानुपपत्तिप्रसंगा
त्। तत्परिहाराय यदि प्रत्यक्षादीनामप्रामाण्यमंगीक्रियते भेदवाक्यानां च प्रामाण्यं न तदा भेदस्याप्रमाण
सिद्धत्वेन प्रमाणाप्रमाणयोः समानविषयत्वानुपपत्तेः भेदप्रमाणस्यागमस्यानुवादित्वाभावादभेदवा
क्यानामेव दौर्बल्यं नाभेदवाक्यानामिति यदुक्तं तन्नेत्यर्थः। अतश्चाभेदवाक्यानामेव प्राबल्यमिति। प्रत्य
क्षादिसंवादेनाभेदवाक्यापेक्षया यद्भेदवाक्यानां प्राबल्यमुक्तं तदसत्। प्रकृतसंवादस्यैव याथार्थ्येन
दौर्बल्यहेतुत्वादित्याशंकां परिहृतामप्यधिकं वक्तुं पुनः परिहरति। न चेति। एकस्मिन्नेवार्थे प्रमाणद्व ५८
हुत्वप्रवृत्ते सति द्वितीयादीनां दौर्बल्यमिति यतनेत्यर्थः। कुत इत्यत आह। दाढ्यमेवेति। निःशंकाप्रमितिरे
वेत्यर्थः। एवशब्देन नोपेक्षेत्याह। अनेनैव याथार्थ्यं परिहृतं। विषयविशेषाणां बाधकस्य कथं दाढ्यहेतु
त्वमुक्तमिति ~~मितिसचिवेति। वहत्वमा~~ त्वं। अन्यथा प्रथमस्यापि तत्स्यादित्यतो दृष्टमित्युक्तं। तेन पूर्वसंस्कारसचिवस्य

तन्मात्रगोचरस्यापि द्रष्टहेतुत्वेयुक्तमिति सूचितं। तदनंगीकारे बाधकमाह। तथाऽस्वतीति। संवादस्य
वैयर्थ्येनोपेक्षणीयत्वेसतीति। अर्थ्यमुसनेमभ्यासः। आदिपदेनानिगमनं गृह्यते। अप्रामाण्यमुपेक्षणीय
त्वं। अस्कृतदपीस्यत आह। अभ्यासस्य चेति। एवं निगमनस्यापि तु व्यारोहार्थत्वं सर्वसम्मतमपि मयानांगी
क्रियते को दोषः। नहि प्रतीतं असिद्धं तोना मन्नास्तीत्यत आह। तदनंगीकार इति। अप्रामाण्यस्यानत्व
मसिवाक्यस्यापि दोषः। वैषम्यमात्रेणैक्यापहारि हरति। प्रथमेति। असिद्धजीवेश्वरैक्यं। एकवाक्यस्य दुर्बोधत्वा
त्। परूषाणाधमद्रु मध्याधिमात्राधिमात्रत्वादिभेदभिन्नत्वादिति भावः। प्रसक्तादिनेति। प्रसक्ता
देदैषयोकाकर्लक्वित्वादिति भावः। एतेनानधिगतार्थविषयत्वमपि भेदवाक्यानामुक्तं भवति। न
च प्रमाणबहुत्वं इत्यादिनोक्तमपसंहरति। न स्मादिति। ननु किमिस्यत आह। अतइति। वाक्यस्य नत्वम
सीत्यादेः। तथाच महावाक्याभावात्तदेकवाक्यतयास्त्वेवावाक्यानामेकेमहातात्पर्यमिति भावः। ए
वं तर्हि सर्वागमानामेकस्य विषयस्याभावादेकवाक्यतानस्यादित्यभिप्रायेणपृच्छन्ति किं त्विति उत्त
रमाह। विधारिति। यदुक्तं सदागममेकविज्ञेयमिति तद्वेदमिति नियातव्यं। तस्य कारस्य प्रागेवसंक्षेपेणाव
र्णितं इति। ननु कुतएतत्। नहि जीवब्रह्मैक्यपारकत्वं सर्वागमानां महातात्पर्यं न संभवतीत्यतावतासमतीतक्ष

६० राक्षरत्वाद्विलक्षणो विष्णो तेन भाव्यमित्यत्र नियामकमस्ति नामियो नयितुं ज्ञाप्यते इत्येतावता न सिद्धिः अन्य
थापि योजनायाः कर्तुं शक्यत्वादित्यत आह नसदेवसर्वकर्मातिरिमिति प्रमाणस्योक्तत्वात्। परमात्मेति भग
वता वासुदेवेन तु तथोक्तमित्याह। तथा वेति। नहाकाथ्यतेति। द्वाविमाविति। द्वाववेति संबंधः। इमौ प्रसिद्धौ।
पुरुषो चेतनौ लोके इवलोक्यतया लोमनेसति। अथवा द्वाववेव स्वापपत्नं यपरमपुरुषं व्यावर्तयितुं लोक
इत्युक्तं। रीतिज्ञानयवगीत्यर्थः। सर्वाणि भूतानि ब्रह्मादयो जीवाः। कूटस्थः। महान् इस्मीः। यदर्थं पुरुषद्व
यनिरूपणं कृतं तदाह। उत्तम इति। अन्यः क्षराक्षराभ्यां। न पुनरेतयोरेव मध्ये कश्चित्पुरुषोत्तमः। कल्पनीयो
यः। तत्रेश्वरत्वादिसंमतिमाह। परमात्मेति। आत्मशब्दो हि चेतनपर्यायः। मुक्तिमप्याह। य इति। लोकत्र
यमिति सर्वोपलक्षणं। यो हि यस्य धारणपोषणादि कर्ता स ततस्माद्दुत्तमो युक्तः। तदाविष्टस्य तन्नाशे
नाशप्रसंग इत्यत उक्तम् अव्यय इति। तत्के थं। ऐश्वर्यादित्याह। ईश्वर इति। स च क इत्यपेक्षायामाह मेवेति सप्र
माणकमाह। यस्मादिति। क्षरं चेतनवर्गः। लोके। पौरुषेयागमे। अत्रात्मनस्तत्त्वधोतनाय ज्ञातुः फल ६०।
माह। यो मामिति। एवं न यात्त्विकपाद्दिव संज्ञात्वेन। एतच्च पुरुषोत्तमत्वमपारमार्थिकमिति स मोहव
र्जितः। सर्ववित्। अस्येव सर्वशास्त्रार्थत्वात्। सर्वभावेन। सर्वप्रकारेण। एतच्च नायोग्याय वाच्यमि

सात्रयेनाह। इतीति। स सर्वविदित्याद्युक्तं। ततः किमित्यत आह। एतदिति। बुद्धिमानपरोक्षज्ञानी। कृतकृत्यो
मुक्तः। अत्राहि सर्वविदित्युक्तत्वात्सर्वं पौरुषेयापौरुषेयागमानां विष्णोः सर्वोत्तमत्वमेव महातात्पर्यमि
ति स्फुटं प्रतीयते। श्रुतिरप्येवमेवाहेत्याह। सर्वोत्कर्ष इति। सर्वस्मादुत्कर्ष उत्तमत्वं सर्वोत्कर्षः। देवानादे
वस्मात्सोदेवदेवः। सर्वागमानां महातात्पर्यमिति संबंधः। अन्यत्र धर्मादौ तु महातात्पर्यं नैव किं तर्हीति
तदन्यत्रागमैकदेशस्यावांतरं विष्णोः सर्वोत्कर्षप्रतिपत्त्यर्थत्वादमुख्यं तत्परत्वं। यतः सर्वागमसाध्यः पु
रुषार्थो मोक्षस्तेनो विष्णोः सर्वोत्कर्षज्ञानादेव भवति। अतः कारणादुक्तमेतत्सत्यमिति। पुराणेप्येवमेवो
क्तमित्याह। मुख्यं चेति। सर्ववेदानामपि तदुत्कर्ष एव परं मुख्यतात्पर्यं। तदन्यत्र तु परं केवलमवांत
रतात्पर्यमिति योजना। न केवलं श्रुतीतिहासपुराणसिद्धमेतत् किं तर्हीत्यत आह। युक्तं चेति। युक्तिसि
द्धं चेत्यर्थः। पुरुषार्थस्तेनेत्यनेनोक्तमेव युक्तिं प्रपंचयितुमियं प्रतिज्ञेति ज्ञातव्यं। कथं युक्तमिति
चेत्। श्रुतिस्मृतिलक्षणोदितसर्वोप्याम्नायस्तावदेकमेव शास्त्रं भेदे प्रमाणाभावात्। शास्त्रैक्यं च विष
यप्रयोजनैक्यनिमित्तं। उपाध्यंतराभावात्। सर्वोत्तमं वेदशास्त्रप्रसिद्धं। वेदशास्त्रात्परं नास्तीति वचनात्।
सर्वोत्तमताचास्य सर्वनियमप्रयोजनत्वेनायोमुपपद्यते नान्यथा। सर्वनियमस्य प्रयोजनं मोक्ष एव नान्यदिति सर्व

६१ शास्त्राणां मोक्षार्थत्वे स्थिते विषयो विचार्यते। तत्र श्रुतिवाक्यं वाक्यार्थानामनेकत्वेपि न तैरस्य शास्त्रस्य विष
यत्वं युज्यते। भेदप्रसंगात्। अन्येषामपि परमार्थमितरवाक्यार्थप्रतिपादनेन तेनैकेन महात्मानमयोगेनैवरेणाभ
वितव्यम्। यश्च ज्ञानेनाभिप्रेतप्रयोजनहेतुः। सएव तथाभावमापद्यते। अन्यथा विषयप्रयोजनयोः सर्वथाभावे
शास्त्रस्यानुपादेयत्वप्रसंगात्। अभिप्रेतप्रयोजनस्य च मोक्षस्य सर्वोत्कृष्टतया ज्ञातः प्रसन्नो भगवान्विष्णु
रेव हेतुः। अतः सएव तथाविधः सकलसदागममहात्मनां योगिनां कार्यैरस्वाभायवानुस्वर्गादेरेव प
रमपुरुषार्थतामन्यमानानामपाकरणाय मोक्षस्य सर्वपुरुषार्थोत्तमत्वं साधयन्नाह। मोक्षोहीति। कुतः
इत्यतस्तत्र श्रुतिस्मृती पठति। धर्मेति। धर्मार्थकामा इत्यनित्यसाध्यः स्वर्गादिकमुच्यते। सर्वासावपि श्रुति
तदर्थः। परिवर्तिनां। परिवर्तमानानामुद्वेगपद इति शेषः। व्ययमयो वत्स लामिति परस्यैव पद। अस्तु मोक्षः सर्वपुरु
षार्थोत्तमः। सर्वोत्तमशास्त्रप्रयोजनं च। स च अन्यासैकत्वविद्यासाध्यः। कर्मसाध्यो वेति वितर्कनिराक
रणाय तस्य विष्णुप्रसादैकसाध्यतां साधयन्नाह। मोक्षश्चेति। विष्णुप्रसादेन लभ्यते। न विनान्येन न लभ्य ६१
ते इत्यर्थः। तदुभयत्र कुत इत्यतः तत्र श्रुतिस्मृती रुदाहरति। यस्मादिति। परमो विधिः। प्रीत्यर्थं स्वतोत्कृष्टतया
ज्ञातव्यः। लभ्यः। प्राप्यः। एषः परमात्मा यं वृणुते यस्य प्रसीदति। तेनैव लभ्यः। कथं यतस्तस्य स्वात्मानं विव
णुते। प्रकाशयति ततश्चास्य स्वात्मानं मायाविद्यावृतं स्वरूपं विवृणुते। आविर्भावयति। अहं समुद्धर्ता भवामीरु

क्षे प्रसन्न इत्यर्थो लक्ष्यते। एवमुक्तस्यापि ज्ञानस्य। आवृत्तिरसाने। एकदा दृष्टत्वं तत्र। विरिंच्यादि पत्नि व्याप्ति परि
हारार्थमेतत्। मोक्षदोऽपि विधानिवृत्तिदः। आनंददः स्वरूपानंदानुभवप्राप्तिदः। कैवल्यद इत्यस्याप्ययमेवार्थः।
अस्तु विष्णुप्रीतिरेव मोक्षसाधनं सा तु कर्मादिना भविष्यतीत्यत आह। प्रीतिरिति। यद्यपि कर्मादिना भ
गवत्प्रीतिर्भवति तथापि नासो मोक्षसाधनं किंतु परमप्रीतिरेव। सा च विशेषतः प्रीतिगुणोत्कर्षज्ञाना
देव भवति। न कर्मादिना। कुतः। तथा लोके दृष्टत्वादिति। ननु यदा राजा गुरुर्वा भिषक् स्वशिष्यं वा प्रति वृत्ते। अ
हमेव त्वमिति। तदा सोऽप्यसावादिः वचनानुमितयाऽभेदप्रतिपत्त्या परमप्रीतिमान् दृश्यते। तत्कथं गुणो
त्कर्षज्ञानादेव परमा प्रीतिरुच्यत इत्यत आह। नेति। प्रतिपत्तिरिह ज्ञानशब्देनोच्यते। अयमभिप्रायः। य
दुत्तमोऽधमप्रत्यभेदप्रतिपत्तिं करोति। तदाधिकगुणारोपेणाहमनेन मानित इति मन्यमानोऽधमस्तस्मि
न् प्रीयते। न त्वधमेनोत्तमप्रत्यभेदप्रतिपत्तौ कृतायामुत्तमस्याधमे प्रीतिर्भवति। निमित्ताभावात्। ततश्चा
धमो जीवः कथमुत्तमं भगवन्तं प्रति तत्प्रीतिकामोऽभेदप्रतिपत्तिं कुर्यात्। येन वेदो जीवं प्रत्यभेदप्रति
पत्त्यर्थमपि वदेदिति। न केवलमभेदज्ञानात्प्रीतिर्न भवति। किं तर्हीत्यत आह। अभेदज्ञानादिति। अभेदप्रतिपत्त्या
धमत्वारोपणात्। एतदेव दृष्टान्तेन दर्शयति। घातयन्ति हीति। पाटलिपुत्राधिपतयो भद्रसेनाद्या राजानः

६२ पाटलिपुत्रस्याधिपतिरिदानीमहमेवेति वदन्तमनुतद्धर्षवचनेन तदीयां प्रतिपत्तिमनुमाय घातयतोद्यते। तेन
तेषां तत्राप्रीतिरनुमीयते। भवेदेवं लौकिकानां भयं मत्सरादिग्रस्तानां। ईश्वरस्य तु नैवमिति चेन्न। नैतथास
त्यपराधपरिहारस्यापि कर्तव्यतापातात्। अत एवानिंदनस्तवसत्कारन्यक्कारार्थं किल्लेवरं। प्रधानपरयो
राजन्नविवेकेन कल्पितं। सर्वात्मनः समदृशो रद्वयस्यानहंकृतेः। तत्कृतं मतिवैषम्यं निरवद्यस्य न क्वचिदि
त्यादिकं भक्तकृतप्रामादिकापराधविषयं ज्ञातव्यं। एतेन जीवेश्वरयोः पारमार्थिकभेदमंगीकृत्याभेदस्फू
र्तीनां प्रतिपत्त्यर्थानत्यावलक्षणानैयायिकादयो निरस्ता वेदितव्याः। प्रीतिश्च गुणोत्कर्षज्ञानादेव विशेष
तो द्वेषस्य च कैश्चिद्घातितेति। राजानं इति वर्तते। कर्मकरेभ्योप्यातिन्यायेनेति शेषः। वयनेनु ज्ञानम
नुमायेतिचेत्। तेन च तेषां तत्र परमाप्रीतिरनुमीयते। सम्प्रदानत्वस्याविवक्षितत्वादिजकस्यव स्त्रेद दाती
त्यादिवच्छेषविवक्षयाव दत्त इति षष्ठी। वदतः प्रतीतिर्वा। तथा च प्रयोगः। विष्णुर्गुणोत्कर्षज्ञानमीति ज्ञा
येन प्रीयते। स सुरूपत्वाज्ञात्वा बदतीति। न केवलमनुमासिद्धमेतत्। किं नहीत्यत्र विहिता ज्ञाप्यार्थस्य ग्रहरू ६२
पां श्रुतिमपिपठति। ननु द्वेष्टीति कर्मकरादिष्विति शेषः। न स्रोणाना न्याय्यादि धातुः। इत्थंचैवमिप्याह। यामु
पिति। अथ भजन्ति मां। सर्वभावेनैव परमप्रीतेर्यतिके। परमप्रीतिरात्मनः। तच्च जीवानां मोक्षमुद्दिश्य भव मे
मानैः सदागमैः स्तसाधनभगवत्सौतिहेतुतद्गुणोत्कर्षज्ञानायतत्त्वमहात्म्यस्य च बद्धिर्भवति तद्यामीति स्थितं।

विष्णोः सर्वोत्तमत्वमेव यदि नोक्तं स्वपक्षसाधनमपसंहरति अत इति । स्मृतियुक्तेन पौरुषेयाः सर्वेपि सदागमा
गद्यन्ते । तेन लोके वेदे यति व्याख्यानं भवति । सर्वप्रमाणविरुद्धत्वेन जीवब्रह्मणोरभेदं तत्त्वमस्यादिवाक्यानां ता
त्पर्ययोगात् । प्रधानवाक्याभावेन तत्र सर्वागमानां महातात्पर्यं कल्पनमयुक्तमित्यत उक्तं । इतोपि तदयुक्तमित्या
ह न येति । यथास्माभिर्भगवतो गुणोत्कर्षे सर्वागमानां महातात्पर्ये ति स्मृतियुक्तयः प्रमाण
त्वेन प्रदर्शिताः । न तथा पराभिप्रेतेर्थे किंचिदपि प्रमाणमस्ति प्रत्युतानुमेदं जनमनोहरा निर्मूलत्वादुपेक्ष
णीयेति ॥ एवं तावद्विष्णोः सर्वोत्तमत्वे सर्वेषां सदागमानां महातात्पर्यमिति प्रमाणैरुपपादितं । वाक्य
परिहारार्थः कथं च जीवपरमात्मैक्यं दृष्टं ततः प्राक्तनो ग्रंथः । तथाहि । क्षराक्षरजडाजडात्मकात् सर्वस्मादु
त्तमत्वमित्ययमर्थो भेदसापेक्षः । भेदस्तु न कश्चिदपि प्रामाणिकः । न च घटपटादिभेदस्तावत् प्रत्यक्ष
सिद्ध इति वाच्यं । भेदो हि न तावत् स्वतंत्रः प्रतिभासते । किंतु घटपटौ भिन्नाविति घटपटविशेषणत
या वा घटपटयोर्भेद इति तद्विशेष्यतया वा । एकस्य च भेदस्य द्विष्ठत्वपक्षे भेदद्वयांगीकारेणान्यतरमा
त्राश्रयत्वेपि धर्मिप्रतियोगिभावमनपेक्ष्य संबंधमात्रापेक्षायां गत्यंतराभावात् । भेदस्य च विशेषणत्वे
घटपटयोर्विशेष्यत्वं तस्य विशेष्यत्वे तयोर्विशेषणत्वं । तथा च घटपटौ भिन्नौ वा घटपटयोरिति वा द्वि
त्वावच्छिन्नतयो घटपटयोर्विशेषणविशेष्यतया प्रतीतौ सत्यां भेदप्रतीतिः । विशेषणादिप्रतीते विशेष्यादि

त्रि०टी०
६३ प्रतीतिकार्यत्वानुद्दितावच्छिन्नयोर्घटपटयोर्विशेषणविशेष्यभावप्रतीतिश्च भेदप्रतीत्यपेक्षा भेदप्रती
त्यविनाभूतत्वाद्द्वित्वप्रतीतेः तथा चान्योन्याश्रयता अथान्यतरमात्राश्रयो भेदो धर्मिप्रतियोगिभावा
पेक्षश्च तथाप्यन्योन्याश्रयता घटात्पटस्य भेद इति पटस्य भेदं प्रति धर्मित्वं घटस्यावधित्वेन
प्रतियोगित्वप्रतीत्या हि भेदः प्रत्येतव्यः भेदप्रतीत्यपेक्षा च धर्मिप्रतियोगित्वप्रतीतिः अन्यथा पटस्य
ति घटादिति च विलक्षणप्रतीत्यनुपपत्तेरिति तथा चान्योन्याश्रयतया प्रत्यक्षेण भेदप्रतीतेरनुपप
त्तिरिति तद्दतस्यात्रोक्तानि षेध्याति नन्विति उक्तानुसारेण प्रमाणानि योज्यानि कुतो नेत्यत आह पदार्थेति धर्मी
ह पदार्थं उच्यते अयमर्थः न भेदो युगपद्धर्मः किं त्वेकैकस्य धर्मो परेण निरूप्यः घटपटौ भिन्नावित्यत्रा
पि घटस्पटोभिन्नः पटाच्च घटोभिन्नः इत्येवार्थः एवं घटपटयोर्भेद इत्यत्रापि घटपटधर्मिकभेद
द्वयमेव प्रतीयते एकवचनं तु घटपटयोरूपमितिवत्समुदायापेक्षं स च भेदो धर्मिणः स्वरूपमेव तेन
धर्मिप्रतीतिरेव भेदप्रतीतिरिति प्रतीतिद्वयाभावेनान्योन्याश्रयत्वं घटस्य प्रतियोगितायां पटप्रतियोगिकत्वं हि ६३
मिकि भेदनिबन्धनेव सोपि घटस्य स्वरूपमेव तथापि प्रतिपन्नभेदस्य प्रतियोगित्वात् घटात्पटस्य भेद
सिद्धौ पटात् घटस्य भेदासिद्धिरिति अन्योन्याश्र॰यत्वमिति चेन्न विद्यमानभेदस्य प्रतीतिमात्रेण प्र
तियोगितोपपत्तेरिति एतेन विशेषणविशेष्यभावप्रतीतेर्भेदप्रतीत्यधीनत्वस्य दण्डादौ दर्शनेन भेदप्रतीति

परस्परायानवस्थाप्रसंगोपि परास्तः। तथा प्रत्यक्षं किं भेदमेव गोचरयेदुत वस्त्वपि। नाद्यः। भेदस्यैवप्रतीयभावा
त्। द्वितीयेपि किं भेदपूर्वं वस्तु गोचरयेत् उत वस्तुपूर्वं भेदं। योगपद्यं वा। नाद्यः। भेदस्यैवाप्रतीतेः। विरम्यव्या
पारायोगाच्च। अत एव न द्वितीयः। नापि तृतीयः। वस्तुप्रतीतेर्भेदप्रतीतिकारणत्वेन योगपद्यायोगादिति। तदपि
निरवकाशमिति। अत्रेदं परिहारो यदि भेदस्य धर्मिस्वरूपत्वं स्यात्। न त्वेतदस्ति। धर्मिस्वरूपं हि परप्रती
तिनिरपेक्षकमेव प्रतीयते। नहि कस्यापि कस्मादयं पट इति वा कस्मादस्य पट इति वा प्रतीतिरस्ति। किं नाम पट
इत्येव। भेदस्तु घटात्पटो भिन्न इति वा घटात्तु पटस्य भेद इति वा धर्मिप्रतियोगिप्रतीत्यपेक्ष्यैव प्रतीयते
ननु ज्ञानुविद्ध इत्येव। तथा च सापेक्षनिरपेक्षतालक्षणविरुद्धधर्माधिकरणयोर्भेदधर्मिस्वरूपयोः क
थमैक्यं स्यादित्यत्राह। न भाति। धर्मिप्रतियोगीति न प्रतीतिरूपलक्ष्यते। अपेक्षया प्रतीयमानत्वादिति शे
षः। अस्वरूपत्वं परप्रतीतिनिरपेक्षप्रतीतिकधर्मिस्वरूपत्वाभावः। कुतो नेत्यत आह। ए.. वदति। यथा
नपेक्षप्रतीतिकं प्रत्यक्त्वे तन्न्यस्य स्वरूपस्यापि जीवब्रह्मैक्यस्य जीवस्य ब्रह्मणैक्यमिति धर्मिप्रतियोगिप्रती
त्यपेक्ष्या प्रतीयमानत्वं परेणाङ्गीक्रियते। तथा निरपेक्षप्रतीतिकधर्मिस्वरूपस्यैव भेदस्य धर्मिप्रतियोगिप्रती
त्यपेक्षया प्रतीयमानत्वोपपत्तेः। एतेन भेदपटो नाभिन्नो सापेक्षनिरपेक्षप्रतीतिकत्वेन विरुद्धधर्माधिकरणत्वादि
त्यस्यान्यतरानैकान्तिकत्वमुक्तं भवति। न च कथं न स्वरूपमिति वाच्यं। अस्वरूपत्वे मिथ्यात्वप्रसंगेनेतरस्यत

६४ त्वमसीत्यस्य वाक्यस्यानर्थकत्वप्रसंगात्। अस्वरूपस्यापि सत्यत्वे सद्‌द्वैतभंगप्रसंगात्। न चैक्यं न सापेक्ष
मिति वाच्यं। तथा सति तत्त्वंपदार्थप्रतिपादकानां वेदांतवाक्यानामैक्यपरमहावाक्यैकवाक्यताभावप्रसंगेन
वैयर्थ्यापातात्। अथ तत्र श्रुतीयोरेव सापेक्षनिरपेक्षलक्षणविरुद्धधर्माधिकरणत्वेन भेदोस्तु। ननु तद्विष
यस्यैकस्यैवार्थः सापेक्षनिरपेक्षानुमितिप्रत्यक्षविषयत्वदर्शनेन विरोधाभावादिति ब्रूयात्। नहि तस्य
त्वं तेपि समानं। अधिकमत्र सविशेषाभेदभंगीकारे पापरिहारो भविष्यतीति। तथापि न भेदो धर्मिस्वरूपं।
तत्प्रतीतावपि कदाचिदप्रतीतेः। यो यत्प्रतीतावपि कदाचिन्न प्रतीयते नासौ तत्स्वरूपं। यथा घटप्रतीतावप्य
प्रतीयमानः पटो न घटस्वरूपं। न चायमसिद्धो हेतुः। स्थाणुशुक्तिकाप्रतीतावपि पुरुषरजतभेदस्याप्रती
तेः। प्रतीतौ वा संशयविपर्ययानु[illegible]त्पत्तिप्रसंगात्। नह्यप्रतीते स्थाण्वादौ संशयादिर्भवतीत्यतश्चा
हा स्वरूपं ति। धर्मिप्रतीतावपि भेदस्याप्रतीतिरभेदाविरोधित्वेन जीवब्रह्मैक्यं वदतः परस्य संमतेर्वा इद ६४
मुक्तं भवति। प्रत्यक्त्वे तन्त्रे स्वप्रकाशत्वस्यासिद्धेपि जीवब्रह्मणोरैक्यं नासिद्धं। अन्यथोपदेशानर्थक्यप्रसं
गात्। विप्रतिपत्त्यभावे प्रसक्तेश्च। तथापि न स्वरूपं तथा परेणांगीक्रियते। तस्मादयमपि हेतुरन्यतरानैका
न्तिक एव। स्वरूपं मध्ये कामविद्याप्रतिबंधात् न प्रकाशत इति मतं तत्। अनैकान्त्यापरिहारात्। विशेषणप्रक्षेपा
भिप्राये चात्रापि साध्यस्यादेः प्रतिबंधकस्यैवकुंठाकत्वेन विशेषणासिद्धिप्रसंगादिति। असिद्धश्चायं हेतुरि

साह भेदसिद्धिरिति। तुच्छादेर्नैक्यादिविशेषमावश्यते। एवं चाद्वैतनियमं। कदाचिद्धर्मिस्वरूपासिद्धौ भेदसिद्धेः परे
णाभ्युपगतत्वात्। कुत इत्यत आह। प्राय इति। भूमार्थे प्राय इत्यव्ययमुक्तास्ति। विलक्षणं व्यावृत्तं। प्राय
इति सत्यादिस्वरूपलक्षणसार्थं। तत्रापि विशेषं वक्ष्यामः। यद्यद्दृश्यते तन्न सर्वतो व्यावृत्तमेव दृश्यते।
ननु सर्वात्मकत्वेनानित्यत्वेनानुभवसिद्धं। व्यावृत्तिरेव च भेदः। नैवैकस्मिन्वस्तुन्यनेके भेदाः। किं त्वेक ए
व वस्तुभेदो दृष्टः। कथं तर्हि धर्मिप्रतीतावपि भेदस्याप्रतीतिः सिध्यादिति। तथापि भेदस्य धर्मिस्वरूपत्वं न यु
ज्यते। पटस्य भेद इति तत्संबंधितया प्रतीयमानत्वात्। यो यत्संबंधितया प्रतीयते नासौ तत्स्वरूपं। य
था केवलो ब्राह्मणस्य सत आह। अस्याति। इति ननु संबंधितया प्रतीतिर्व्यपदेशाविविक्तमात्रः। इति विवदुपप
घत इति च। यथा पदार्थस्य स्वरूपमिति पदार्थसंबंधितया प्रतीयमानमपि स्वरूपं न ततोन्यत्। तथा भेदो
पीत्यनैकांतिकत्वमनेनोक्तं। तथा आनंदं ब्रह्मणो विद्वानित्यादावुदाहरणीयं। यदि तत्र भेदातिरिक्तं किमपि सं
बंधप्रतीतिनिमित्तमुच्यते। तर्हि तत्रापि विशेषं वक्ष्यामः। इत्यन्यथासिद्धिः। यदि तत्र व्यपदेशमात्रेण प्रतीतिरि
त्यभिधीयेत। अत्रापि तत्स्वभावमिति स्वरूपासिद्धिः। अन्यथैव वदि आपटाद्भिन्न इति विशेषणतया प्रतीतिरपि
न भेदसाधिकेति द्रष्टव्यं। अत एवं सत्येतद्विलक्षणा हीत्यादिप्रयोगोपि युज्यते। नन्वेवं तन्निमित्तत्व
रादिकल्पनं भेदस्य धर्मिस्वरूपत्वे सिद्धं स्यात्। तत्रैव किं प्रमाणमिति च। तु यो भेदमेव नांगीकरोति।

वि०२१

६५ किंतस्यानयातद्विशेषप्रमाणाविनया। स्वरूपेप्रमाणंनेक्तं। तस्यचबाधकानि च परिहृतानि। अनुमानमात्रे
णप्रत्यक्षेनबाध्यतइतिवक्ष्यते। अथयोभेदमंगीकृत्य तस्यधर्मिस्वरूपत्वेप्रमाणंजिज्ञासते। तत्राह।य
दीति। अत्रापिसंशयादिस्थले व्यावर्तमायद्रूपेणोक्तो। भेदस्यधर्मिस्वरूपत्वेहितद्ग्रहणएवप्रतिभासो
युज्यते। यदितुभेदोधर्मिस्वरूपाद्व्यतिभिन्नःस्यात् तत्सपटदर्शनेघटद्वत्तस्यसर्वतोव्यावृत्तिर्नप्र
तीयेत। नियामकाभावात्। ततःकिमित्यतआह। अज्ञातेवेति। असद्दर्शनेनतस्यघटादिसर्वव्यावृ
त्तवज्ञाततायामासविषये किमुपलभ्यमानोहंवाघटोवेतिसंशयोघटएवेतिविपर्ययोवास्यात्।
समानधर्मादेःसद्भावात्। प्रतिबंधकस्यचव्यावृत्तिज्ञानस्याभावात्। अस्तुतथासंशयादिकमि
तिचेत् न। अप्रामाणिकांगीकारस्यानुचितत्वादित्याह। नहीति। इदमुच्चैर्भवति। अस्तितावदिदं।
तस्यवेद्यैवगतिः। धर्मिस्वरूपत्ववानतोभिन्नत्वंवेति। तत्रभेदपक्षस्यसर्वत्रसंशयादिप्रसंगेनानुपपन्नत्वा
त्परिशेषात्स्वरूपत्वमेवसिध्यतीति। ननुबाधधर्मिप्रतीतवप्रतीतोपिभेदःपश्चात्प्रसेत्स्यते। सचप्रसक्तमपिसं ६५
शयादिकंनिरोत्स्यतीति। पश्चाद्धिभेदोस्यास्मादितिप्रत्येतव्यः। नचप्राप्रेसनवगतावखंडवस्तुन्यस्यास्मा
दितिविभागेनानुवादोघटते। अतोधर्मिप्रतीतावेवभेदोनप्रतीयतेचेन्नप्रतीयेतएवकेनापिरूपेणेतिसंशयादि

प्रसंगो दुर्वारस्तु। अनापातज्ञाया निर्विकल्पिकायां संविदि भेदस्य भेदिनोऽप्ययुगपदगृहीतत्वे यद्वदवभासा
त्संज्ञाद्यवच्छिन्नाज्ञाने ऽस्तु। तस्य भेदस्य तदीयतयानवगतस्य तद्विषयसंज्ञाद्यादिप्रतिबन्धकत्वानुप
पत्तेः। अन्यथा सर्वत्र संज्ञाद्यनुदयप्रसंगादिति। ननु यदि भेदो धर्मिस्वरूपस्यान्तरि न प्रतीतो नावप्रतीयते।
न चेव। तथा सति संज्ञाद्यभावप्रसंगात्। आस्तिच संज्ञायादिकं प्रमाणसिद्धमिति। न धर्मिप्रतीतौ भेदप्रतीति
रिति न कथं तस्य तत्स्वरूपत्वमित्यत आह। नानैवेति। अयमभिप्रायः। एकरूपत्वे एकस्य वस्तुनो भेदः। अ
नेकत्वे प्रमाणाभावात्। स्वरूपं प्रतीतौ प्रतीयेतैव। किं त्वस्य घटप्रतियोगिकत्वं पटप्रतियोगिकत्वमित्या
दयोऽनेके तद्धर्माः। तत्र भेदनिष्ठाप्रतियोगिकत्वरूपो धर्मः साहचर्यादिवशान्न प्रतीयते तत्र संज्ञादिक
मुत्पद्यते। ननु तत्रापि भेदस्याप्रतीतिः। अतः संज्ञादेरनुपपत्तेः। नन्वर्थे धर्मिप्रतीतौ भेदाप्रतीतिरंगीका
र्येति। यथा भेदस्यास्वरूपत्वं भवेदिति। संज्ञादिस्थलेऽपि सर्वतो भेदः प्रतीयत एवेत्युक्तम्। नन्वेवं तर्हि नेति चेन्न। भे
दस्य सर्वथाप्रतीतौ वा आत्मनि प्रतीयमानोऽहं किं देवदत्तोऽथवा घट इत्यादि संज्ञायां घट एवेति विपर्ययो वा स्यात् न
चैवमस्तीत्याह। नहीति। न चेयमस्य घटो वेत्यर्थः। ननु घटादौ घटत्वाद्यसाधारणधर्मदृष्टवत् तन्मात्रे
ऽप्यपन्नपतः संज्ञाद्यनुत्पत्तेः। नन्वर्थं स्वरूपतो व्यावृत्तिप्रतीतिः कल्पनीया। किं च सर्वाप्रतीतौ सर्व

६६ तोव्याप्तेः।प्रमेयत्वमज्ञातत्वात्सर्वेषांसर्वज्ञताऽऽपत्तेरतआह।सामान्यतइति।घटत्वादिज्ञानमसाधारण
तयेतिशेषः।घटत्वाद्यसाधारणधर्मज्ञानेनसंशयाद्यनुत्पत्तिमभिलक्षतोपिप्रथमंसर्वेषांवृत्तिज्ञानमेष्टव्यमे
वतेनविनाघटत्वादेरसाधारण्याज्ञानासंभवात्।नहिधर्मिणामविविक्तत्वेधर्मस्यासाधारण्यंभवति।नच
सर्वज्ञतापातोदोषः।सामान्यतःसर्वव्यावृत्तिज्ञानस्योपमानत्वात्।सामान्यतःसर्वज्ञानस्यप्रामाण्यमात्र
टनित्वात्।न।सर्वत्वमकमिदं।किंतुस्वयमेवेतिधर्मिस्वरूपेणप्रतीयमानस्यभेदस्यसामान्यतःसर्वप्रतियोगि
कत्वस्यधर्मिणाकतिपयविशेषप्रतियोगिकत्वस्यानुभूयते।इदंवभेदस्यधर्मिप्रतीतावेवप्रतीतिसंभवा
द्यकत्वेतस्वरूपत्वं।ननुभेदस्यकेवलस्यधर्मिस्वरूपत्वंउतप्रतियोगिघटितस्य।नाद्यः।कदापिकेवलस्य
तस्याप्रतिभासात्।द्वितीयप्रतियोगिनोपिधर्मिस्वरूपत्वापत्तौसर्वाद्वैतप्रसंगइति।मैवं।प्रतियोगिनानिरूप
कत्वेनबहिरंगत्वात्।कुत्रचेदमुपलब्धंयेननिरूपितस्ययद्भवतितन्नेस्वनिरूपकस्यापिभवतीति।ले ६६
वकर्णमानयेत्यादावितिचेत्।न।चित्रगुमानयेत्यादौतदभावेपिकिंचिन्नोपलब्धेः।ततःस्वदृष्टिपक्षपा
तमपहायलौकिकींदृष्टिमाश्रित्यभेदःकौरीतिमवलंबतामितिविचारेयदिप्रतीत्यनुसरणंतदाचित्रगुन्यायो
भवति।प्रतीत्यतिक्रमेत्वापादनमप्यशक्यमिति।ननुविदारणात्मनोभेदस्यघटस्वरूपत्वेतस्यापिविदारणे

स्यात्। तथा नद्वयवानामपीति सर्वैकत्वन्य नापत्तिरिति भैव। न हि भेदो विदारकः किन्तु विदारणं। विदार
कत्वेपि प्रतियोगिनो धर्मिणा विदारयेत्। ननु स्वतन्त्रएव। प्रतियोगिनिरूप्यत्वं न स्वरूपस्यापि भेदस्योपप
दितः। अंगीकृत्य वेदमुक्तं। वस्तुतस्तु न भेदो विदारणात्मा किन्त्वन्योन्याभावएवेति। तथाप्यनेक
त्वे कार्थसमवायिनो भेदस्य पटस्वरूपत्वे पटस्याप्यनेकत्वं स्यात्। तथा नद्वयवतां नामपीति
तद्विरुद्धमेकत्वं कुत्रापि न स्यात्। एकत्वाभावे नेकत्वमपि न भवेत्। तथा च संख्यारहितस्य द्रव्य
स्य गुणन्यत्वापत्तिरिति भैव। एवं हि पटोप्यनेकत्वं स्यान्नत्वनेकः। अनेकत्वेपि वा कुतो नेकत्वं। स्वास्मिन्नेका
न्येन सहितो नेक इति विरोधाभावात्। अनेकत्ववत्त्वे नेकत्वाभावमुक्त्वा पुनस्तेनानेकत्वाभावेवं
दतः कुतो न पूर्वोत्तरविरोधः। न च त्रेकाप्यस्तु इति रत्नकोशकृतोक्तं येन परशीसापरस्यापादनमि
ति निस्सारः। एवं बाधकाभावात्साधकसद्भावाच्च भेदस्य धर्मिस्वरूपत्वान्न तत्प्रतीतावन्योन्याश्र
यत्वमित्युपसंहरति। अत इति। पटः प्रतीयमानः सर्वव्यावृत्तेनैव प्रतीयत इत्युक्तं। तदयुक्तं। प्रति
योगि भूतस्य सर्वस्य धर्मिणश्च पटस्य युगपज्ज्ञानप्रसंगात्। यद्यपि ज्ञानानां वध्यघातकभावे
न यौगपद्यमस्ति तथापि युगपदुत्पत्तिस्तु नास्ति। मनसोणुत्वेन युगपदनेकेंद्रियसान्निकर्षाभावा

सि॰दी॰

६१ न। एकेंद्रियविषयेपि सजातीयानां गुणानां युगपदुत्पत्त्यदर्शनादित्याशंक्याह। नयेति। कुतो नेत्यत आह।
यथेति। इत्थं तेनेनेति रश्मिना चक्षुःसन्निकर्षः। तथा स्यादित्यत इति शेषः। यद्यपि युगपदनेकज्ञानोत्पत्ति
र्नास्ति तथापि समुदायालंबनस्यैकस्य ज्ञानस्योत्पत्तौ न काचिदनुपपत्तिरिति भावः। ननु सर्वेंद्रि
तिसामान्यतोयत्सर्वविषयं ज्ञानं तत्साक्षिरूपं तस्मिन्नुत्सर्वदासत्येव घटादिज्ञानानि मनोवृत्तिरूपा
णि जायंते तत्कथमेतावाक्षेपपरिहारौ। सत्यं। तथापि विशेषतो व्यावृत्तिप्रतीतौ घटपटज्ञानोत्पत्ति
यौगपद्यं प्रसज्यत एव। तत्र धर्मिभिः प्रतियोगिनां वपुरवस्थितत्वे युगपदिंद्रियसन्निकर्षेवसत्ति
समुदायालंबनेकज्ञानोत्पत्तिरुक्ता। धर्मिप्रतियोगिनोरन्यतरस्यैव सन्निधानेन तु संस्कारसहकृते
द्रियसन्निकर्षेणैक ज्ञानोत्पत्तिरित्यादि बोध्यं। ननु भेदस्य पटस्वरूपत्वे पट एवास्ति न भेद इति
वा भेद एवास्ति न पट इति वा पटभेदशब्दौ पर्यायाविति व्यापद्येत। मैवं। विद्यमानयोरेव पटभेदयोः स
विशेषाभेदस्वीकारात्। अत्राभेदे नान्योन्याश्रयादिपरिहारो भविष्यति विशेषेणानान्यतरमात्रावशे ६१
षादिकं न भविष्यति। विशेषस्य भेदप्रतिनिधित्वात्। अभिन्नेव स्वकनि पुनर्विशेषोस्तीत्येतदप्रसिद्धं
कथमंगीक्रियत इत्यत आह। एकस्मिन्नेवेति। तैः सर्वाभेदवादिभिरपि। किमुत पदार्थान्तरवादि

स्थापयद्भिरन्यैः। अंगीकृतांगीकृतप्रायः। एतदविनाभूतस्यार्थस्यांगीकृतत्वात् तत्कथमित्यत आह।
नेतीति। स एष नेति नेत्यात्मेत्यत्र वाक्ये प्रतिपाद्यतया ब्रह्मणः सर्ववैलक्षण्यमंगीकारात्। नावता च
किं प्रकृतमित्यत आह। विशेषेति। इदमुक्तं भवति इदं तावद्वाक्यं पदसमन्वयबलेन ब्रह्मणः सर्वपदार्थ
व्यावृत्तिप्रतिपादकमिति परेणाप्यंगीकृतं। तत्रासत्त्वाद्यर्थस्य वाक्यप्रतिपाद्यत्वे यो व्यावृत्तयोश्च
न तावद्भेदाभेदो भेदो वांगीकर्तुं शक्यो। अखंडार्थांगीकारविरोधात्। अत्रासतो भेदे विशेषस्य वानंगी
कारे पदानां पुनरुक्तिप्रसंगेनाम्नानं प्रसज्येत। अतो नेह नानास्तीति वचनेसादिवाक्यविरोधपरिहाराय
सतो भेद इव पौनरुक्त्यादिप्रसंगपरिहाराय विशेषोप्यंगीकार्य एव। नन्वेवमादिपदजातेन वचनस्या
त्मनि प्रवर्त्तते। किंतु लक्षणया तत्र च वचस्या प्रतिपाद्ययोर्व्यावृत्त्योर्भेदसद्भावान्न पौनरुक्त्यं। लक्ष्यार्थ
भेदाभावान्नाखंडार्थताहानिरिति। नैव। लक्ष्यार्थविशेषाभावे पुनर्वैयर्थ्यापरिहारात्। नानाविधा
रोपपरिहारस्य प्रयोजनत्वान्न वैयर्थ्यमिति चेन्न। प्रतिपाद्यविशेषाभावे न तत्परिहारस्याप्युप
पत्तेरिति। न केवलं व्यावृत्तिद्वयस्य निर्विशेषाभेदे पौनरुक्त्यादिदोषः। किं तर्हीयसतो दोषांतरं प्रति
जानीतेन चेति। इतश्च न व्यावृत्तिद्वयस्य निर्विशेषाभेद इत्यर्थः। कुतो नेत्यत आह। अनुभवेति। अ

६८ नुभवेनस्यैककार्यविशेषणत्वेन प्रतीयमानेऽन्यारत्नद्वयमभिन्नमपि सान्निध्यं प्रतीयते ननु तन्मात्रमिति। य
थापि सत्यज्ञानादिवाक्यमप्यखण्डोदाहर्तुं शक्यं। तथापि भेदस्य सविशेषाभेदप्रतिपादनप्रसक्तमिति तथाविधमेव वाक्यमु
दाहृतं। क्वापि भेदानभ्युपगतावेतद्वाक्यविरोधश्चानेन सूचितो भवति। किं चात्र कथमापादनं। यदि भेदो दृश्येत
तदान्योन्याश्रयत्वं स्यादिति चेत् न। भेददर्शनस्य संमतत्वे न विपर्यया पर्यवसानस्य स्यात्। दर्शनमात्रसद्भावेऽपि त
स्य प्रमात्वं निराक्रियत इति चेत् न। अन्योन्याश्रयत्वस्य प्रमात्वाप्रतिबंधकत्वात्। एतेन दर्शनस्य वास्तवत्वनि
राक्रियत इत्यपि परास्तं। किं चान्योन्याश्रयदुष्टस्य व्यावहारिकसत्त्वमपि कुतः। नहि मद्वासनवासितावतायस्य घ
टस्य कारणान्तरवत्त्वोत्पत्तेर्नु तस्यापि मनोगतं भविष्यति। अथ यदि धर्म्यादिप्रतीतिमपेक्ष्य भेदः प्रतीयते तदा
न्योन्याश्रयत्वं स्यादित्यापाद्यते तदा धर्म्यादिप्रतीत्यपेक्षैव निवर्त्तते भेददर्शनस्य किमायातं। प्रकारान्तराभावा
त्तन्निवृत्तिरिति चेत् न। दर्शनमात्रस्यांगीकृतत्वेन निवर्त्तयितुमशक्यत्वात्। प्रमात्वादि निवर्त्तने अन्योन्याश्रय
त्वादेः सामर्थ्याभावस्योक्तत्वात्। किं च स्पष्टदृष्टभेददर्शनप्रकारान्तरं कल्पयिष्यति। अस्मिन्नेव वा प्रकारे कम ६८
प्यवान्तरविशेषं। स्वयं तु न निवर्त्तते नहि स्पष्टदृष्टांकुरादिः परिचितबीजासंभवमात्रेण स्वयं निवर्त्तते। किं तु बीजां
तरं वा परिचितेष्वेव जात्यादिविशेषं वा कल्पयतीति लोके दृ[illegible]ष्टमित्याशयवानुपसंहरति। तस्मादिति। प्रत्यक्षेणे
तिशेषः। एवमनुमानादिनापि स्वविषये भेदप्रतीतिर्वक्ष्यमाणन्यायेन द्रष्टव्या। ननु व्याप्यव्यापकादिभेदप्रतीते

पक्षमनुमानादिकं कथं भेदे प्रमाणं भविष्यतीति चेत्। नाद्वैते प्रतीतिमात्रं परो नाङ्गीकरोति। तथा सति तस्याप्यनुमाना
दिव्यवहारो न स्यात्। प्रमात्वनिवृत्तिकारणस्य च बाधकप्रसंगस्य निरासो ऽनुपदमेव करिष्यत इति॥ ॥ननु विवादप
दं मिथ्या दृश्यत्वाज्जडत्वात्परिच्छिन्नत्वाच्छुक्तिरजतवत्। अयं परः एतदनुनिष्पाद्यताभावप्रतियोगी परत्वात्सदा
नरवत्। विपक्षे दृक्संबंधानुपपत्त्या दृश्यत्वाभावप्रसंगो वा बाधकः। तथा च प्रपञ्चस्यैव मिथ्यात्वात्कथं तद्गमितो
भेदः सत्यः स्यात्। किं च विमतो भेदो मिथ्या भेदत्वाच्चन्द्रभेदवत्। विवादपदं भेदसंवेदनं भ्रान्तिः भेदसंवेदनत्वात्
चन्द्रभेदसंवेदनवत्। विमतं तात्त्विकत्वं तद्भेदहीनं मतत्वात्। गगनवत्। विमता आत्मानो देवदत्तान्न भिद्यन्ते आत्म
त्वाद्देवदत्तवत्। विमतानि शरीराणि देवदत्तस्यैव भोगायतनानि शरीरत्वात्संमतदेवदत्तशरीरवत्। एवं विमता
नीन्द्रियाणि प्रत्येकं समुदितानि च पक्षीकृत्य प्रयोक्तव्यं तथा जीवाः परमात्मनः सत्त्वतो न भिद्यन्ते आत्मत्वात्परमा
त्मवत्। विपक्षे कल्पनागौरवप्रसंगो बाधकः। तदेवं भेदस्य भेदिनश्च सर्वस्यापि प्रपञ्चस्य मिथ्यात्वमुक्तं कुतो विष्णोः
सर्वोत्तमत्वं कुतश्च तत्र सर्वागमानां महातात्पर्यमिति। अत्रोच्यते। किं वियदादिपदार्थास्तद्भेदश्च प्रत्यक्षादिप्र
माणसिद्धा दृश्यमीक्रियन्ते न वा। नेति पक्षे ऽनुमानानामाश्रयासिद्धिः स्यात्। यदि प्रत्यक्षादिप्रमाणादृष्टपदार्थ
पक्षीकारेणैव मनुमीयन्ते न ग्राह्य। यद्वेति। न केवलं जीवब्रह्मणोरैक्ये सर्वागमानां महातात्पर्यकल्पनमि
तिं यत्र वदः। पदार्थानां तद्भेदस्य च कल्पनमनुमानैः प्रमाणविरुद्धत्वात्। धर्मिग्राहकप्रत्यक्षप्रबलैः प्रमाणैर्बाधि

ग

६० तत्वेनानुमानानां कालात्ययापदिष्टत्वात्। धर्मिग्राहकाणि प्रत्यक्षादीनि पदार्थास्तद्भेदं च सत्त्वतया विषयीकुर्वंति।
प्रकाशनस्फुरत्वं प्रकाशेन स्फुरत्वमिव। नन्वनुमानेन प्रत्यक्षादीनां बाधो भविष्यतीत्यत आह। न हीति। कुतो
नेत्यत आह। प्रत्यक्षादीति। भवेदनुमानानां प्रत्यक्षादिविषयबाधकत्वं यदि प्रामाण्यं स्थितं स्यात्। न चैवं। प्रत्य
क्षादिविरुद्धानां तेषामप्रमाणत्वात्। न चात्र प्रत्यक्षादीनामप्रामाण्यं बाधितविषयत्वरूपं स्यात् पर्यनुमाना
नामप्रामाण्यं। तस्मिन्नस्ति हि तद्विरोधेन प्रत्यक्षादीनामप्रामाण्यमितीतरेतराश्रयत्वं स्यात्। न चैवं। प्रत्यक्षादि
प्रामाण्येपीतरेतराश्रयत्वं समानमिति वाच्यं। प्रत्यक्षादीनां धर्मिग्राहकत्वेन प्रबलानां दुर्बलानुमानविरोध
परिहारमनपेक्ष्यैव प्रामाण्यस्य स्थितत्वात्। नहि हरिणशावाभावमपेक्ष्य पञ्चाननो वनमवगाहते इति। य
द्यनुमानस्य न प्रत्यक्षादिबाधकत्वं तर्हि शुक्त्यादौ रजतत्वादिप्रतीतेः प्रत्यक्षरूपाया दाहच्छेदाद्यनुमान
बाधितत्वेन भ्रमत्वं कल्प्यते। अन्यथा बाधितत्वेन तस्या भ्रमत्वं न स्यादित्यत आह। शुक्त्यादेरिति। परीक्षादि
सहकृततया बलवता नेदं रजतं किंतु शुक्तिकैवेति प्रत्यक्षेण बाधितत्वादेवेत्यर्थः। न तर्कमात्रादिति वदता ६०
नुमानमपि तत्र प्रत्यक्षस्य सहायमात्रं न तु निवार्यं तदिति सूचितं। एवमन्यत्रापि प्रत्यक्षादेः प्रबलप्रत्यक्षा
दिबाधितत्वेनैव भ्रमत्वं साधके बलानुमानबाध्यत्वाभावनियमः समर्थनीयः। नन्वनुमानमप्यनुकू
लतर्कसनाथं व्याप्तिपक्षधर्मताबलेन निरवकाशत्वात् प्रत्यक्षमिव बलवत् प्रत्यक्षस्य बाधकं भवत्विति

रोधाभावात्। किमनेन सर्वत्र प्रबलप्रत्यक्षाद्यन्वेषणव्यसनेनेति चेत्। तर्हि कालात्ययापदिष्टमात्रलोपप्रसं
गः स्यात्। सर्वत्रैवमनुमानप्राबल्यस्य वक्तुं शक्यत्वादित्याशयवानाह। तर्कमात्रं त्विति। अन्तय
नुष्टयस्याकारः पृथिवीत्वादृष्टेरित्यनेन बाह्येन्द्रियग्राह्यगुणवत्त्वलक्षणत्वस्य भूतत्वस्य पृथिवी
त्वेन व्याप्तिं साधयति। पक्षधर्मतानुसन्धेवं पृथिव्या अपि गन्धवतो द्रव्यस्यापि। पृथिवीत्वं जातिविशेषः। गन्ध
वद्द्रव्यं पृथिवी न भवति भूतत्वादवादिवदित्याद्यनुमानेन पृथिवीत्वादिग्राहकप्रत्यक्षस्य बाधः स्यात्। अस्याप
नुमानस्य व्यभिचारादर्शनादिनाप्यप्रामाण्यादिमत्वादिति। विषमोऽयमुपन्यासः। पृथिवीत्वाभावबोधनेन ग
न्धवतो द्रव्यस्य साध्यत्वे अभावस्य प्रतियोगिज्ञानाधीनज्ञानतया तस्मादेवमनुमिमानेन पृथिवीत्वं ज्ञातं। अन्य
थाप्रसिद्धविशेषणत्वापत्तेः। न तु गन्धवति द्रव्ये एव प्रत्यक्षेण ज्ञातव्यमित्युपजीव्यत्वेन प्रबलस्य प्रत्यक्षस्य
नानुमानं बाधकं। अन्यथा स्वस्यैवोदयाभावप्रसंगात्। किंतु प्रत्यक्षबलेन गन्धवतो द्रव्यस्य पृथिवीत्वस्थितौ
तत्रैव भग्नव्याप्तिकमनुमानमप्रमाणं। यथा नैजोवयविनोऽनुष्टत्वसाधकत्वानुमानं। तत्रापि त्वनुष्टत्वप्र
तियोग्युष्णत्वस्य नैजोवयविनि प्रत्यक्षेण ज्ञातत्वात्। न च प्रकृते तथास्तीति। मैवं। येन विना यस्यादयो नास्ति।
तेनैतस्योपजीव्यत्वं। न त्वनसाध्यधर्मप्रतियोगिग्राहकमेवेति नियमः। किंतु धर्मिसाध्यलिङ्गव्याप्त्यादिग्राहकमपि।

७० नद्विरोधश्चास्ति प्रकृत इति कथमनुमानं प्रत्यक्षस्य बाधकं भवेदित्याशयवानुक्ताति प्रसंगस्य विपर्ययपर्यवसान
माह। अन्द्वेति। इष्टस्येति भावे क्तः। प्रत्यक्षस्येत्यर्थः। अथवा भ्रान्तिरेव भ्रान्तिकल्पितत्वं। यदा तु प्रत्यक्षविरुद्धत्वादेवा
नुमानस्याप्रामाण्यं तदा किमु वाच्यं सर्वप्रमाणविरुद्धत्वादिति कालात्ययापदिष्टत्वमुक्तमुपसंहरति। अत इ
ति। शंकानास्पदत्वं नितरामित्यस्यार्थः। नन्वस्त्वत्र व्यवस्था। शुष्कतर्कमात्रमुपजीव्येन बाध्यते। प्रमाणानु
कूलं त्वनुमानमेवोपजीव्यं बाधते। तत्र प्रसक्तिहेतुत्वेनोपजीव्यस्य प्रामाण्यानपेक्षणात्। प्रतीतिमात्रेण चाश्र
यतोपपत्तेः। प्रकृते चानुमानजातमागमानुकूलमिति। मैवं। तत्त्वमीमांसायामागमानामेकपरत्वस्य निरू
ढत्वात्। नन्वस्तु प्रत्यक्षादिकमुपजीव्यं। तथापि नोक्तानुमानजातस्याप्रामाण्यं। भिन्नविषयत्वेन विरोधाभा
वात्। भेदप्रपंचस्य पारमार्थिकं सत्त्वमस्माभिर्नांगीक्रियते। व्यावहारिकत्वं गीक्रियत एव। तत्रोक्तानुमानजा
तं भेदप्रपंचस्य व्यावहारिकीं सत्तामनुपमृद्य पारमार्थिकसत्ताप्रतिषेधपरं प्रत्यक्षादिकं तु व्यावहारिकीं स
त्तां गोचरयतीति पृथिव्यादावनुमानप्रत्यक्षयोरुभयमप्यपरमार्थविषयमिति युक्तस्तत्र बाध्यबाधकभावः इ ७०
त्यभिप्रायेणाशंक्य प्रतिषेधति। नचेति। भेदाभावः सोऽनुमानसाध्य इति शेषः। सभेदोऽस्ति। स प्रत्यक्षादेर्विषय
इति शेषः। कुतो न बाध्यमिति चेत्। प्रत्यक्षादेरपि भेदप्रपंचपरमार्थसत्त्वविषयत्वात्। तदपि कुतः इति चेत्। परिशेषा
त्। भेदप्रपंचगोचरयतो हि प्रत्यक्षादेः परमार्थसत्त्वासत्त्वो विषयो भवेत्। असत्त्वासदसद्विलक्षणानिर्वचनीया

वा। तत्रानिर्वचनीयासत्पक्षयोः प्रतिषेधे परमार्थसद्विषयत्वमेव परिशिष्यतीत्याशयवान् सदसद्विलक्षणपक्षा
नुपपत्तौ न च हेतुमाह। सदसदिति। भेदप्रपंचस्येति शेषः। सदसद्विलक्षणत्वं नाम सत्त्वेनासत्त्वेन च रहितत्वं। दृश्य
त्वादिहेतुभिर्वियदादिप्रपंचस्य सदसद्विलक्षणसाधना कथं तत्र प्रमाणाभाव इति चेत्। दृष्टांताभावेन व्या
प्त्यसिद्धेः। शुक्तिरजतादिकं दृष्टांत इति चेत् न। कुत इत्यत आह। सदसद्विलक्षण इति। शुक्तिरजतादेरि निरो
धः। नन्वस्त्यर्थापत्तिस्तत्र प्रमाणं। तथाहि। न तावच्छुक्तिरजतादिकं सत् नासत्। असतः ख्यात्ययोगात्। अ
स्य च ख्यायमानत्वात्। नापि परमार्थसत्। सतो बाधायोगात्। अस्य च बाध्यमानत्वात्। [redacted]
अतः ख्यातिबाधान्युपपत्त्या सदसद्विलक्षणं शुक्तिरजतादिकमिति सिद्धं। न। असतोऽसत्त्वेनैवोपपत्तेः। न च असतः
ख्यात्ययोगात् ख्यायमानमिदं नासदिति [illegible] यतोऽसतः ख्यातिमुपपादयितुं प्रक्रमते। असत इति।
इति वदतः इदमसतः ख्यातिप्रतिषेधनपरस्य सर्वः। ख्यात्यसंभावपक्षस्य परेणांगीकृतत्वात् न मे वादो निराकरो
ति। यदि नेति। यद्यसत्स्वरूपेण कदापि न प्रतीतं तदा तस्यासतः ख्यातिनिषेधो न युज्यते। असद्विशिष्टा खलु
ख्यातिर्निराक्रियते। न चाविशिष्टप्रतीतौ विशिष्टप्रतीतिरस्ति। न चाप्रतीतस्य प्रतिषेधो युज्यते। अतः पर
कीयप्रतिषेधानुपपत्त्यैवासतः ख्यातिः सिध्यतीति। आद्यं दूषयति। यदीति। अस्त्वसतः ख्यातिः तथापि न तत्ख्या
तिनिराकरणं युज्यते स्वक्रियाविरोधात्। तथा चासतः ख्यातिरनिवार्या। इतोऽप्यसतः ख्यातिरंगीकार्येत्याह। न वेति।

७१ शुक्तिरजतादेरसतो वैलक्षण्यं खल्वर्थापत्त्या ज्ञायते। न च तदसत्प्रतीतिं विना ज्ञातुं शक्यते वैलक्षण्यं हि व्या
वृत्तिः सा च प्रतियोगिज्ञानाधीनज्ञानेति कथं तदप्रतीतौ प्रतीयेत। अतोऽर्थापत्तेः फले न विरोधः स्यात् तथा
प्यसत्त्वेनैवोपपत्तेर्नार्थापत्त्या शुक्तिरजतादेरनिर्वाच्यत्वसिद्धिरिति न चाथापि शुक्तिरजतादिकमनिर्वचनीयं
बाध्यत्वात् व्यतिरेकेणासद्वदित्यनुमानेन तत्सिद्धिरिति विषयतासत्त्व आह। न च शुक्तेरिति। अनुमानेन कल्पनीयमि
ति शेषः। असतो सतोर्जनत्वस्य शुक्तिकया सतो सन्नेव संसर्गो विरजतस्यैव तादात्म्यसंबन्धात् तिविषय इति
सापयितुं केचिज्ञ वनिर्दिश्यः किं विद्युव्यनिर्दिश्यः कुतो नेति चेत्। बाधकप्रत्ययेनासत्त्वस्यैवावधारणे
न कालातीतत्वादित्याह। असदेवेति। बाधकप्रत्ययस्य वस्तुतो वस्तुत्वस्य प्रकटत्वेन प्राबल्यान्निश्चितमेव। नन्व
यं बाधकप्रत्ययः सत्ताभावविषयः शुक्तिरजतादेः प्रतीतत्वादसत्त्वाभावात्। तथा सतोऽपि प्रतीतिरूपपादि
तेति वाच्यम्। असतोऽसत्त्वेन प्रतीतावपि सत्त्वेन प्रतीत्यभावात्। अस्य च सत्त्वेन प्रतीतत्वात्। तेनार्थापत्तिरपि स
मर्थिता भवति। प्रतीतिमात्रसद्भावेन प्रतिबंधाद्युपपत्तेः। सत्त्वेन प्रतीतेरार्थापत्तिशरीरप्रवेशादित्यत आ
ह। न चेति। प्रतीतत्वासत्त्वेनेति शेषः। असत्त्वाभावः शुक्तिरजतादेः कुतो नेति चेत्। किमसतः सत्त्वेन प्रतीति ७१
रभावो नास्ति उत तदभावो वापि। नाद्यः प्रकृतानुपयोगात्। द्वितीये भ्रान्त्यभावप्रसंगः। कुत इत्यत आह।
असत इति। असतो रजतादेः सत्त्वेन प्रतीतिः सतश्च शुक्त्यादेरसत्प्रतीतिरित्युभयरूपान्यथाप्रतीतेरवभासाति

त्वादिसत्तावश्यवोक्तेनासतः सत्त्वेन प्रतीतिः सिध्यति। अन्यथाख्यातिवादिभिरप्यसतः सत्त्वेन प्रतीतेरं
गीकृतत्वात्। अतो ऽसत इत्याद्यन्यथाख्यातिव्याख्यानं कृतं। यद्यसदसत्त्वेन सत्त्वं सत्त्वेनैव प्रतीयेत तदा का ना
मभ्रांतिः। असतः सदंतरात्मना प्रतीतिर्भ्रांतिरिति चेत्। किं सतः सदंतरात्मनासतो उतासतो। नाद्यः भ्रांतित्वा
भावप्रसंगात्। द्वितीये साक्षिमसत्त्वेन प्रतीयते किंवा सत्त्वेन। आद्ये पुनर्भ्रांतित्वानुपपत्तिरेव। द्वितीये क
थमसतः सत्त्वेन प्रतीत्यभावः। असतो धर्मस्य सत्त्वेन प्रतीतिरस्ति। ननु धर्मिणि इति तदुनियामकत्वान्नु। अ
प्रतीतस्यारजतस्यान्यत्र सत्त्वकल्पने च प्रमाणाभिकले। विज्ञानवादिनाप्यंतरस्य बाह्यत्वमसतो नासत्त्व
सत्त्वेन प्रतीयत इत्यंगीकर्त्तव्यमेव। अतोन्यथाभ्रांतित्वानुपपत्तेः स्वल्लोभादवश्यमसतः सत्त्वेन प्रतीतेरंगी
कार्यत्वेन बाधकप्रत्ययस्य विषयांतरकल्पं। नाप्यर्थापत्तेः समर्थनमिति। भवेदयं दोषो न्येषां यदसतः स
त्त्वेना प्रतीतो भ्रांत्यभावप्रसंग इति मम त्वनिर्वचनीयार्थावभासो भ्रम इत्यंगीकृतत्वाद सतो भ्रांतावपि
प्रतीतिर्नास्तीत्यंगीकृतेपि न कश्चिद्दोष इत्याशंक्य प्रतिषेधयति। न चेति। प्रतीतिः सत्त्वेन निरोषः। कुतो न वाच्य
मिति चेत्। रजतमनिर्वचनीयमिति पक्षेपि तत्किमनिर्वचनीयतया प्रतीयते उतासत्त्वेन। अथ सत्त्वेन। न प्रथम
द्वितीयो न तथा प्रतीत्यनुपलंभात्। प्रत्ययाभावप्रसंगाच्च। न च सत्प्रातिभासिकं वा कदाचिदनेनार्थक्रियास्व
पयुज्यमानं दृष्टं। येनासत्त्वादिकं प्रतीतावपि प्रवर्त्तेत। तस्मात्सत्त्वेनैव प्रतीयत इत्येवांगीकार्यं। तथा च प्रती

७२ तिप्रवर्त्तीयुज्यते' न च रजतमप्रतीतिमात्रात्मरजतिरितिनाप्या अनुभवविरोधात्' विधिनिषेधावच्छयप्रश्न
याथोगाच्च' तत्सत्त्वे सदसदनिर्वचनीयता' नाद्यः। अनिर्वचनीयताविरोधात्' नहि यस्य सत्त्वं स सदनिर्वाच्यमि
ति संभवति' तस्माद्द्वितीयोंगीकार्यः। ततः किमित्यत आह' अनिर्वचनीयेति' अनिर्वचनीयस्य प्रातिभासिक
स्य रजतस्य यत्परमार्थत्वं व्यावहारिकसत्त्वेन स्यात् तदेव सत्त्वेन दृष्टमंगीकारात् तत्सत्त्वाभिमानावपि स
त्त्वेन प्रतीतिनोसौ तिवाच्यमिति। ननु रजतस्यापि प्रातिभासिकसत्त्वमस्त्येव' मैवं' व्यावहारिकत्वाप्रती
तौ प्रत्ययभावस्योक्तत्वात्' सत्यं' प्रातिभासिके रजते व्यावहारिकत्वप्रतीयत इति तथापि न सास
तीनाप्यसती किंतु चक्षुरादिकं दत्तासंसर्गवत्त्वेन व्यावहारिकत्वासंसर्गस्याध्यानिर्वाच्यस्यारोपितस्य प्रतिभा
सः। ततो नासतः सत्त्वेन प्रतीसंगीकार इति तृतीयपक्षं निराकरोति' नचेति' न केवलं रजतं' अपि
तु' प्रातिभासिकस्य रजतस्य यद्व्यावहारिकं सत्त्वं प्रतीयते तदप्यनिर्वाच्य' शुक्तिकागतमेव रजतेसमारो ७२
पितमिति यतोर्थः। कुत इत्यत आह' अनवस्थितेरिति' शुक्तिकागतमेव व्यावहारिकत्वं रजते समारोपि
तमनिर्वचनीयमिति कोर्थः। किं व्यावहारिकमुत प्रातिभासिकमिति' नाद्यः' अनंगीकारात्' अंगीकारे वा
रजतस्यापि व्यावहारिकत्वापातात्' द्वितीयेपि किं प्रातिभासिकतयैव प्रतीयते' उत व्यावहारिकतया। नाद्यः'

प्रत्ययभावप्रसंगात् । नहि प्रातिभासिकमर्थक्रियास्तूपयुक्तं क्वचिदनेनोपलब्धं । यतस्तथात्वप्रतीत्यापि प्रवर्त्ते
त । द्वितीये तद्व्यावहारिकता किं सती उतासती । नाद्यः । प्रातिभासिकत्वानुपपत्तेः । द्वितीये सत्तापि सत्वेन प्रतीति
प्रसंगः । अथ सा व्यावहारिकताप्यनिर्वचनीयैवारोपितेति चेत् । नन्वनिर्वचनीयेति कोर्थः । इत्यादेरारोपप
रंपरापर्यवसानानुपपत्तिः स्यात् । यत्रैवारोपपर्यवसानं तत्रैव प्रत्ययभावो वा सत्तोपि सत्वेन प्रतीतिर्वा प्रसज्ये
त । नन्वयमपर्यवसितापरंपरासिद्धविषया । येन बीजांकुरवत्परंपरावत् दूषणं स्यादिति । ननु मूलक्षतेर
भावान्नेयमनवस्था दूषणमिति चेत् । केयं मूलक्षतिर्नाम किं परंपराकल्पकाभावोथवा प्रयोजनपरिक्ष
यः । आद्यो दोषस्तत्र कृत इत्याह । प्रथमेति । प्रथमस्य रजतस्यानिर्वचनीयत्वासिद्धेरित्युपपत्त्यर्थमुत्तरोत्त
रानिर्वचनीयारोपपरंपराकल्पनं स्यात् । नवेत्तदस्तीति । द्वितीयेप्येतद्दोषान्तरं । प्रथमेति । पूर्वपूर्वारोपानु
पपत्तावुत्तरारोपाभावप्रसक्तिः । नदेवमसतः सत्वेन ख्यात्युपपत्तेन तद्बलेन बाधकप्रत्ययान्यथोपपत्तेन व्यर्थ
त्यर्थः । इतश्चेत्याह । अनिर्वचनीयत्वे चेति । यद्यनिर्वचनीयमिदं रजतमिति स्फुटं बाधकज्ञानमुपस्थेत
तदा सदेव प्रत्यक्षादिस्वनुभवस्याविषयांतरकल्पनेन युक्तं स्यात् । न चैवमस्ती तिभावः । ननु भ्रांते कात्
न्त्वाबाधितमिथ्यैव रजतं प्रत्यभादित्यनुवदति मिथ्याशब्दस्त्वानिर्वचनीयवाची । तेनानुमीयते रजतस्या
निर्वचनीयतानेनानुभूयतेति । तत्कथमुच्यते निर्वचनीयताविषयं बाधकज्ञानं नोपस्थापयतीति तत्राह ॥

१५०८१
७३

मिथ्येति। अभावप्रतियोग्यसद्भाववदसमीच्यते। न भवतीत्यभाववदिति वा। अत्राभिधानात् वस्तुनोऽनिर्वचनीयत्वाभी-
तिरुक्तेयं। न तो निरर्थकः स्यादिष्यतो भाववाभीत्युक्तं। कुतो नानिर्वचनीयत्वाभीष्यत आह। न येति। सदसद्विलक्षण
वस्तुनि प्रमाणासिद्धे पश्चात् कथंचिन्नहाचित्वमेव भवति। न चेतदस्ति। प्रमाणस्यैवसनीविचार्यमाणत्वात्। नेव
तद्बलादेव सर्वं कल्प्यं। तस्यासद्भावितेनान्यथासिद्धत्वात्। एवमनुमानस्य कालात्ययापदिष्टतामभिधा-
यदूषणांतरमाह। अनुभवेति। शुक्तिरजतादेरनिर्वचनीयत्वसाधनेनुभवविरोधश्चानुभूतार्थविपरीत
प्रतिपादकत्वमप्रसिद्धविशेषणता चेति यावत्। कथमित्यत आह। सदसत्तोरिति। ननु सत्वासत्वे एकध-
र्मिनिष्ठासत्त्वाभावप्रतियोगिनी धर्मत्वाद्रूपरसवदिति। सामान्यतोनुमानेनानिर्वचनीयत्वसिद्धे तस्यके-
वलव्यतिरेक्यनुमानेन शुक्तिरजतादि विषयतामात्रसाध्यत्वेनो नाप्रसिद्धविशेषणतेति भावः। न। अ-
विरुद्धत्वस्यापाधित्वात्। नवगोत्वाश्वत्वादौ साध्यमाव्यापकतो। प्रतिषेध्यप्रतिषेधात्मकत्वस्य विरोध
स्य विवक्षितत्वात्। प्रतिज्ञापदव्याघातो वा न नवाकेन न सत्यते इति एवं प्रत्यक्षादिविषयभेदप्रपंचस्या ७३
निर्वचनीयतां प्रतिषिध्योपसंहरन्नसत्त्वमपि प्रतिक्षिपन्नुपरिशेषसिद्धमर्थं दर्शयन्नु प्रकृतम-
नुसरति।। अतद्धीति। अनिर्वचनीयेति भावप्रधानो निर्देशः। भेदस्येति वक्ष्यमाणमत्रापि संबध्यते। असतद्व्या-
दिकमसत्त्वानिराकरणं। अनंगीकारासरेणेति शेषः। भेदस्य सतः परमसत्त्वस्याप्यनुपपन्नेरितिपूर

पीय। सत्त्वप्राप्तेः। परिज्ञापकप्रमाणपारमार्थिकसत्त्वसिद्धेरिष्टत्वादिति चेन्न। वादिनीयत्त्वप्रयुज्यते। त्वप्रत्यक्षा
दीनामपि परमार्थविषयत्वेनानुमानबाधकत्वोपपत्तेरनुमानेऽपि भेदाभावसाधनं न युज्यत इत्यर्थः।
यदेव प्रत्यक्षानुमानसिद्धभेदबाधनमनुमानेनेत्याक्तं। किमु वाच्यं तदापौरुषेयत्वेनानाशंकितदो
षया श्रुत्यास्तिद्धस्य जीवपरमात्मभेदस्य प्रत्याख्यानादित्याह। कथं चेति। भेदश्रुतीनां मतत्त्वावेदको
बाधकं श्रुत्यन्तरं बाध्यं नमितिति यत्तन्न परिज्ञापकप्रमाणेन निराकृतत्वात्। अधिकं वदोषमाह। मिथ्यावादित्वे
चेति। जीवेश्वरैक्यमपि हि श्रुतिसिद्धमित्येव परेणांगीक्रियते। तत्र भेदश्रुतेर्मिथ्यावादित्वे श्रुतित्वा
विशेषादैक्यश्रुतेरपि तथात्वप्राप्तेः। कथं तत्प्रतिपादितस्यैक्यस्य सत्यत्वमंगीक्रियते। बाधकानां
मत्रापि सत्त्वात्। दोषान्तरमप्याह। कथं चैवमिति। एवं वादिनो वेदोक्तस्यापि मिथ्यात्वमंगीकुर्वतो।
वेदोक्तस्य मिथ्यात्वांगीकारेऽपि कुतो न वेदवादित्वमित्यतो व्याप्तिं दर्शयति। वेदोक्तस्येति। ननु वेदो
क्तस्य मिथ्यात्वांगीकारादधिकमवेदवादित्वं नास्ति। तत्कथं व्याप्यव्यापकभावादिकमिति चेन्न। नाव्य
वहारस्यात्र विवक्षितत्वात्। विमतो वैदिकत्वेन न व्यवहर्तव्यः। अवैदिकत्वेन व्यवहर्तव्यो वा वेदोक्तमि
थ्यात्वांगीकारित्वाद्बौद्धादिवदिति। ननु मया वेदैकदेशस्य तत्त्वावेदकत्वमंगीक्रियत इति चेन्न। बौ
द्धादीनामपि तत्साम्यात्। नहि तेऽपि वेदोक्तस्य दर्शनानुगुणमपि मिथ्येत्याहुः। न वयं बौद्धादिवत्सर्वथा वेदस्याप्रा

माण्यक्रमः। किं तु मद्वधिकारिणः प्रतिबन्धाभेदाश्रयं कर्मादिकं प्रतिपादयतीति वदाम इति चेत्। सत्यं। न तथा
७४ प्युच्यमानस्यापि ध्यात्वाङ्गीकारात् किमनेन वल्गितेन। ऐक्यज्ञानस्य मिथ्याभूतमपि कर्मादिकमंगमि
ति चेत्। न। जिद्वासनापरिपाकस्य तद्विरोधित्वेनांगत्वानुपपत्तेः। अनुवादपरोऽसौ वेदभाग इति चेत्। न। अ
नुवादे प्रयोजनाभावात्। नेह नानेति प्रतिषेधार्थमिति चेत्। न। स्वर्गापूर्वादीनां वेदमन्तरेणाप्राप्यमा
णत्वात्। वेदप्राप्तप्रतिषेधे पुनरप्रामाण्यतादवस्थ्यात्। किंच तत्त्वस्यावेद्यत्वेन नैकदेशस्यापि तत्त्वावेदकत्वमं
गीकर्तुं शक्यते। तथापि प्रयोजनहेतुत्वमस्तीति चेत्। न। प्रयोजनवत्त्वस्य प्रामाण्यपदार्थत्वाभावात्।
अन्यथा मणिप्रभाविषयमणिविभ्रमस्यापि प्रामाण्यप्रसंगात्। लोकसिद्धार्थाङ्गीकारेणानृतत्वविवा
रोधि परीक्षकाणामुचितो न तु स्वसंकेतेनेति। एवं बाधकपरिहारेण यत्सिद्धं तदुपसंहरति। अत इति।
सिद्धमिति वाक्यशेषः॥ आ परिच्छेदपरिसमाप्तेः उक्तार्थप्रपंचार्थः परो ग्रंथः। यदुक्तं जीवपरमैक्य
स्याप्रामाणिकत्वात् प्रमाणविरुद्धत्वाच्च न तत्र वेदानां तात्पर्यमिति। न तत्र पराभिप्रेतप्रमाणानि ७४
स्वरूपेणोपपन्नस्य दूषितानि नापि विरोधिप्रमाणान्युपपन्नस्य समर्थितानि। अतस्तदुभयं विधित्सुः प्रस्तावं
तावत्करोति। कथं चेति। कुतो न युज्यत इत्यत आह। सर्वेति। प्रत्यक्षानुमागमविरुद्धत्वात्। प्रत्यक्षादि
प्रमाणासिद्धत्वाच्चेत्यपि द्रष्टव्यं। तत्कथमित्यतः प्रत्यक्षविरोधादिकं तावत्सतीति जानीते। तथाहीति। अनु

भवः साक्षिप्रत्यक्षं। जीवेश्वरैक्यस्य निषेधः। प्रत्यक्षासिद्धत्वं चेत्यपि ग्राह्यं। तत्र प्रत्यक्षासिद्धत्वं नाम द्वितीय
तिः न सीति। ईश्वरस्यैव सर्वज्ञ एव सर्वेश्वर इत्यादिभिः श्रुतिभिः सार्वज्ञाद्युपेततया प्रमितः। जीवस्य तदै
क्यानुभवे ~~[illegible]~~ सर्वज्ञः इत्यादिप्रतीतिः स्यात्।
न चैवं मस्तीत्यर्थः। आत्मनि साक्षिण एव संभावितत्वादनुभव इत्युक्तं। न चायं सार्वज्ञादिमत्तासङ्गेनैश्व
र्येण जीवस्यैक्यं न मनः। सार्वज्ञादेः परोपाधिकस्य मायिकत्वेन मिथ्यात्वात्। अतस्तदनुभवाभावान्न दो
षाय। किंतु निरतिशयो निरवद्य इत्यादिश्रुतिप्रतिपादितेन निर्गुणेन ब्रह्मणैवेति चेत्। सत्यं। एवंविधाप्यनु
भवो नास्तीत्याह। निर्दुःख इति। ननु ब्रह्मात्मत्वं तत्त्वमिति वाक्यानुगृहीतप्रत्यक्षवेद्यं। तत्कथं के
वलेन प्रत्यक्षेण गृह्यतामित्युक्तं। कस्यचिदिति। अधिगतब्रह्मात्मस्यापीत्यर्थः। ऐक्यसाक्षात्कारे हि स
विलासाया अविद्याया विच्छिन्नत्वात्। ततश्च भेददर्शनरहितस्य शरीरपालनाद्यर्थं भिक्षाटनादिप्रवृत्तिर्न स्यात्।
न चाविद्यानुवृत्ती। येनाविद्यालेशावस्थानानिमित्ता प्रवृत्तिः स्यात्। तथात्वे वा तस्य लेशस्यैक्यसाक्षात्का
रेणानिवर्तनस्य कदाप्यनिवृत्तिप्रसङ्गः। प्रारब्धकर्मवशात्प्रवृत्तिरिति चेत्। न। कर्मादेरप्यविद्याकार्यस्यै
क्यसाक्षात्कारेण समूलघातं हतत्वात्। प्रक्रियामात्रस्याप्रामाणिकत्वात्। एवमैक्यस्य प्रत्यक्षासि
द्धत्वमुक्त्वा तद्विरोधं दर्शयति। आस्तां चेति। तद्विपर्ययेण। उक्तरूपद्वयस्य विपर्ययेण। यो हि श्रुत्यैक्ये ल

क्षणमीश्वरं विदित्वा तद्विपरीतं चात्मानमनुभवति सोऽयमात्मनस्ततो भेदमनुभवत्येव । संधानुसंधानवतः
७५ स्तद्विपरीतकुंभदर्शनेन तद्भेददर्शनस्यानुभवसिद्धत्वात् । तस्माज्जीवेश्वरभेदस्य प्रत्यक्षसिद्धत्वादैक्यस्य
तद्विरोधः सिद्धः । न चाहं दुःखी रागद्वेषादिदोषवांश्चेति । ब्रह्मरूपविपर्ययेणात्मनि योऽनुभवः स सत्य एव । अ
तस्तदनुगतो भेदानुभवोऽपि तथा । तत्कथं तद्विरोधः क्षतिमावहतीत्यत आह । नयेति । मिथ्याविषयत्वान्मि
थ्या । तत्र हेतुमाह । तद्विपरीतेति । बाधकप्रत्ययाधीनं हि ज्ञानानां भ्रमत्वकल्पनं । न चात्र बाधकप्रत्ययो
स्ति । ननु दुःखादिकं मनःकरणधर्म एव । तत्र सन्निधानाज्जपाकुसुमगतं लौहित्यं स्फटिक इवात्मनि
भासा प्रतिभासनं इयस्याभिरव्यंगीक्रियत एव । तत्कथमुच्यते न वा मिथ्यानुभवोऽयमिति । उच्यते ।
दुःखादिकं मनःकरणपरिणाम एव । तस्यात्मसमवेतत्वप्रतिभासो भ्रमः । एतत्सर्वं मन एवेति श्रुतेः ।
दुःखादिरूपमात्मनः स्वत्वमित्त्वं तदनुभवस्तन्निमित्तानीत्याद्यज्ञानलक्षणा विक्रियास्तस्येव । बा
धकाभावात् । असंभावत्वादनित्यत्वाज्ज्ञं बंधस्य विमुक्तश्च विमुच्यत इत्यादिवचनानामोपपन्निरिति ॥ ७५
एवं सर्वप्रमाणज्येष्ठसाक्षिप्रत्यक्षसिद्धत्वं ~~[illegible]~~ । तद्विरुद्धत्वं चैक्यस्य प्रथममनुक्त्वा नुमा
नागमस्य प्राबल्यादित्युक्तानी तदसिद्धत्वेन द्विरुद्धत्वं च प्रतिपादयंस्तदसिद्धत्वं तावदुद्घाटयति । न वा भेदधी
र्जीवेशयोरिति प्रकृते । एतच्चोपपादयिष्यते । आगमविरुद्धत्वं चाह । संति चेति । तत्कथमित्यतः सावदेकमा

गमवाक्यं पठति। तथाहीति। जीवेश्वरभेदेऽस्तीति वदन्ति। स आत्मा तत्त्वमसि। स एव परमात्मा त्वं त्वन्तु तस्मादन्यद
स्त्वसीत्युद्दालकेन पित्रा पुत्रं श्वेतकेतुं प्रत्युपदेशः क्रियते। अतोनेन तद्विरोधेन प्रति प्रजापतिवाक्यवत्तारण
मिति स्त्वयि तु मुपदेशा इति। न चास्य स्वार्थता स्वर्थाभावः शंकनीयः। नववारमुपदेशात्। शकुनिसूत्रादि
दृष्टांतैरुपपादनाच्च। प्रसिद्धं ह्यभ्यासोपपत्ती तात्पर्यलिंगत्वमिति उक्तं। न च वक्ष्यते। स दृष्टांत उक्त इति। यद्य
प्यसंदिग्धानि जीवेश्वरभेदे वेदवाक्यानि संति। न चाप्येकस्यागमासिद्धत्वं तद्विरुद्धत्वं वा भवयमुपपा
दयितुमस्य वाक्यस्योदाहरणं। ननु तत्त्वमसीति पदविच्छेदेनायं जीवेश्वराभेदोपदेशः प्रसिद्धः। न त्वम
कारप्रश्लेषेण पदविच्छिद्य भेदोपदेशः कथ्यते इत्यत आह। न चायमिति। कुतो नेत्यत आह। स य एषेति स
य एषेत्यादिना। स्वच्छानन्तवेदेषु न च स्वविप्रकरणेषु भेद एव दृष्टांताभिधानात्। एतदुक्तं भवति। यद्यप्युभ
यथापदविच्छेदसंभवे नेदं संदिग्धवाक्यं। तथापि असंदिग्धभेदविषयदृष्टांताभिधानानुगुण्येन भेदोपदे
श एवायमिति निश्चीयते न त्वभेदोपदेश इति। न ह्यन्यत्प्रतिज्ञायान्यत्र दृष्टांताभिधानमुपपद्यते। यथा स
धर्मे घटदृष्टांताभिधानसामर्थ्यादिष्टो नित्य इति प्रतिज्ञा संदिग्धार्थाप्यनित्यताविषयेति निश्चीयते तद्वत्।
यदा त्वेकमपि भेदविषयत्वेनासंदिग्धदृष्टांताभिधानं संदिग्धप्रतिज्ञावाक्यार्थनिश्चयायालं तदा किमु

कृ यो॰ नवस्वपि प्रकरणेषु पुनर्वा संदिग्धार्थानि भेदविषयाणि दृष्टांताभिधानानीति। अत्र दृष्टांताभिधानानी
रूपलक्षणं। अन्यान्यपि नव प्रकरणान्यभेदविषयाण्येव वाक्यानि सत्यमेवापि यापि द्रष्टव्यं। तत्रादौ जीवेश्व
रयोरत्यंतभेदबोधनाय सहायस्यैव भगवतः स्वतो जीवनादि समस्तजगन्निमित्तकारणत्वादि रूपं जीवेश्व
सम्भाव्यमानं महन्माहात्म्यमुपवर्णितं। न केवलमेतावदेव पुनरनुभवसिद्धमित्यतो जागरे जीवस्य स्वा
तंत्र्याभिमानात्स्वापे तदभावात् न जीवस्य भगवदाश्रयत्वमनुभवारूढं कर्तुं स्वप्नांतमसौम्य विजानी
हीत्युपक्रांतं। तत्र जागरस्वप्नयोः शरीरेंद्रियमनसामितस्ततो विक्षेपेण श्रांतस्य जीवस्य श्रमापनोदना
य स्वापे परमेश्वराश्रयणमभिधाय तत्र दृष्टांत उच्यते। स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वान्य
त्रायतनमलब्ध्वा बंधनमेवोपाश्रयत इति। आप्रसिद्धयोरशनायापिपासयोः स्वरूपपर्यालोचनया
पि जीवानां भगवदधीनत्वं प्रतिपाद्योपसंह्रियते। सन्मूला इति। एवमाद्येन प्रकरणेन जीवानां भगवदा
श्रितत्वे कथिते तन्मनोन्योऽस्मिन्देहे स्तिमयाभेदेनानुपलभ्यमानत्वादित्याशयवतापुत्रेण भूय एव ७६
मा भगवान्विज्ञापयत्विति पृष्टः पितोवाच। यथा सौम्य मधु मधुकृतो निस्तिष्ठंति नानात्ययानां वृक्षा
णां रसान् समवहारमेकतां गमयंतीति। यथा तत्र सारि मधुकृतो भ्रमराः मधु निस्तिष्ठंति निर्मिमते। क
थं नानात्ययानां नानागतानां परस्परविलक्षणानां वृक्षाणां रसान् समवहारं समूहमेकतां मिश्रतां ग

म्यन्ति यथा। यथा वै ते नाना वृक्षरसास्तत्र मिश्रिता या विद्यमानपरिविवेके परस्परभेदमपि न लभन्ते न जानन्ति
अमुष्याम्रस्य वृक्षस्य ... स्याहं रसोस्म्यमुष्य वान्यस्येति। तथा परोस्म्यमुष्य पनसस्य वृक्षस्याहं रसोस्म्यमुष्य वान्यस्ये
ति। एवमेव परस्परभेदं सोम्येमाः सर्वाः प्रजा जीवाः परमेश्वरआत्मनि भिरेव स्वे स्वे शरीरे सति परमे सुषुप्ते संपद्य
तेन मिश्रभावं प्राप्य सति संपद्यामहे उपलक्षणमेतत्। संपन्नाः संपद्यामह इति न विदुः। इह लोके ते प्रसि
द्धा व्याघ्रो वेत्यादि यद्यद्भवन्ति न ते स्वानस्मात्परमेश्वराश्रितत्वाज्ञानापराधाद्भवन्तीति। एतेन योयमात्माभेदेन
न पश्यन्ति सतन्तो न भिद्यन्ते इति व्याघ्रे भंगो दर्शितो भवति। भवत्येवं तेन नानां नाना वृक्षरसानां भेदापरिज्ञानं।
मयानुपेतनत्वेन हेतु विज्ञोध्यन इत्यभिप्रायेण पुनः पृष्टे पिता वाच। इमाः सोम्येत्यादि इमाः प्रसिद्धा गंगाद्या न
दीदेवताः प्राच्यः प्राग्वनात्प्राचीं दिवा प्याः पुरस्तात् स्यन्दते स्रवन्ति। तथा प्रत्यस्यन्तात्प्रतीचीं दिवा प्याः प
श्चात्स्यन्दते। एवमत्यन्त विलक्षणा स्तामेघादिद्वारेण समुद्रात्समन्तोजलत्वात्समुद्रमेवापियन्ति। प्रविशन्ति।
तथापि समुद्र एव भवतीति। नानदीदेवता यथा तत्र समुद्रे इयं गंगा अहमस्मीयं इयं तु यमुनायं च समु
द्र इत्येवमन्या अपि न विदुरेवमेव खलु सोम्येमाः सर्वाः प्रजाः सतः परमेश्वरादागत्यो सद्यापि सत आग
च्छामहे उसद्यामहे उसन्नाः इति न विदुः। एवं परमेश्वरस्थितत्वापि न माश्रितास्म इति न विदुस्त इहेत्यादि पूर्व

७७ वत्। अनेन चेतनत्वविशिष्टस्यापिहेतोरनैकांत्यमुक्तंभवति। अस्तीश्वरःस्वतोभिन्नस्तथापिजीवस्यतदधीन
त्वंकुतइत्यभिप्रायवतापुनःपर्यनुयुक्तः। पिताब्रवीत्। अस्यसोम्यमहतोवृक्षस्ययोमूलेऽभ्याहन्याज्जीवन्
स्रवेद्योमध्येऽभ्याहन्याज्जीवन्स्रवेद्योऽग्रेऽभ्याहन्याज्जीवन्स्रवेत्सएषजीवेनात्मनेत्यादि। अङ्कुरमात्र
स्याभ्याघातेनस्रावानासंभवान्महतइत्युक्तं। योयःकश्चिद्घदी[illegible]ः जीवन्जीवेनपरमेश्वरेणाधिष्ठित
श्चेत्तदास्रवेदसमेवाङ्कुरन्तुम्रियेत। सएषवृक्षोजीवेनानेनप्रकृतेनजीवेनात्मनापरमेश्वरेणानुप
प्रभूतःआत्माधिष्ठितदेहःपेपीयमानःपुनःपुनर्भृशंवापिबन्। अनेनेदमुक्तंभवति। यथावृक्षजीवस्यसर्वदा
नुपहतासक्तदेहेनसुखेनैवसमयास्त्यात्वव्याप्तिनीच्छायामपिकदाचिदीश्वरानुग्रहेसतिविघातिनुबा
ह्यकारणेषुसत्स्वप्येवमवस्थानंभवति। कदाचित्पुनरीश्वरानुग्रहाभावेबाह्यकारणबलवत्त्वाभावेऽपि
शरीरशोषणत्यागादिनिष्ठंभवति। एवंमानुषशरीरेऽपिजीवस्येश्वराधीनत्वंज्ञातव्यमिति। एवंजीवस्य
सत्त्वादिप्रदःपरमात्मैवशरीरेवर्तमानोजीवेनकुतोनदृश्यते। सौक्ष्म्यादितिवक्तुंन। जीवस्यसूक्ष्म ७७
त्वात्स्वदर्शिनःसूक्ष्मदर्शनशक्तिसद्भावादित्याशयेनपुनःपृष्टःपितावोचत्। न्यग्रोधफलमित्यादि। अतो
दृष्टान्तइत्युक्तावपिनेतिशेषः। आहरेदंन्यग्रोधफलमाहृतंभगवोभगवन्नितिपुत्रः। मनुवसारुःसंबुद्धोद्ध
इसि। इदंफलंभिन्धीतिपिता। भिन्नमितिपुत्रः। अत्रभिन्नेफलेकिंपश्यसीतिपिता। अण्व्यइवस्येमाइ

माधानाबीजानि पश्यामीति पुत्रः । आसां धानानां मध्ये एकां धानां भिंधीति पिता । तां भित्त्वा भिन्नेति पुत्रः । अत्र
भिन्नायां धानायां किं पश्यसीति पिता । किंचन न पश्यामीति पुत्रः । एवमुक्तवंतं तमुवाच पिता । यमेतमणिमान
भावं विप्रोरस्तेदासरम सूक्ष्मं परमात्मानं न निभालयसे न पश्यसि । अस्य अणिम्नः सामर्थ्यादेवं परि
दृश्यमानप्रकारेण महान्न्यग्रोधस्तिष्ठतीति । अत्र वृक्षः प्रपंचः फलं शरीरं धाना जीवः । तत्र यथा सूक्ष्मे वट
बीजे दृश्यमानेपि यत्सत्तावाद्वटावस्थानं स बीजांतर्गतः परमात्मा परमसूक्ष्मत्वान्न दृश्यते । तथा जीवा
दपि सूक्ष्मत्वान्न दर्शनं तदस्य तं भवति । ननु वटावस्थानादिना कार्येणेश्वरसामर्थ्यं तावत्प्रसक्षमि
वशनीयते । एवं तत्सामर्थ्ये दृश्यमानेपि तस्यादर्शनमित्यत्र तत्कथमहं जानीयामिति प्रार्थितः । प्रोवाच पिता ।
लवणमित्यादि । अवधाय निक्षिप्य तत्तथा चकार पुत्रः । यद्यथा पित्रोक्तं । स ह तत्तथा चकारेति केचित्साहुः ।
सस्यदृशा शास्वातुरगतो ज्ञानयः । एवमन्यत्रापीति । तं होवाच पिता । दोषा रात्रौ । अवधा अवाधाः । वहेल्लोहि
दस्य मां यो गेयीति स्मरणात् । तल्लवणमुदके हस्तेनावमृश्य न विवेद पुत्रः । यथा विलीनमेवास्य तत्तन्न दृ
वस्तुं न विंदति तथा अंगास्योदकस्यांतात्सर्वदिगवस्थितादवयवादुद्धृत्य केन रसेनास्वाद्यमानमिति पिता । आ
चांतवंतं कथं तिष्ठतीति पप्रच्छ पिता । लवणं लवणरसोपेतमाह पुत्रः । एवं मध्याद्दसात्ताभ्रिमदिगवस्थि
तोयं । एतदुदकमभिप्रास्यानिरस्याथ मा मामुपसीदथा इति पिता । तं तथा चकार पुत्रः । तल्लवणं शश्वदुद

७८ कुरुवसवर्त्तितनत्वपगतमितिश्रुतेः स्ववाक्यं तद्वत्तथा यकारेति वा क्यशेषश्च दगतदाहरेणाघनेनतरसं
वर्त्तितेनुवर्त्तनीयमितिवा। तद्धोवाचपिता। अत्रैवकिलेतिपुनर्वचनमादरार्थं। अनेनयथालवणमुदके
दृश्यमानेपिनलवणंदृश्यतेतथासोम्यसद्दृश्यमानेपिनभगवानिससत्त्वं भवति। एवंभूतोहरिर
विद्यापटलपिहितनयनेनानेनकथंदृश्यतेप्राप्यतेवेतिजिज्ञासामाहपिता। यथासोम्यपुरुषमिस्ता
दिविसृजेदित्यतःपरंवाक्यं। यथातत्रप्राङुदङ्वाधराङ्वाप्रध्मायीताभिनद्धाक्ष आनीतोभिनद्धा
क्षोविसृष्टस्तस्ययथाभिनहनंप्रमुच्यप्रब्रूयादेतांदिशंगांधाराएतांदिशंव्रजेतिसग्रामाद्ग्रामंपृ
छन्नुपंडितोमेधावीगंधारानेवोपसंपद्येतैवमेवाहाचार्यवान्पुरुषोवेदेतिपुरुषंधनिकंगंधारसंज्ञके
भ्योजनपदेभ्यः। अभिनद्धाक्षंअक्षिणीबद्ध्वानीयावनेनानीतोभिनद्धाक्षं रण्ये। विसृजेद्धोरः
सविसृष्टः। प्राङ्वेतिसर्वदिगभिमुखं। प्रध्मायीतउच्चैःशब्दंकुर्याद्धीकिमितिअभिनद्धाक्षइत्यादि। असौ
विशेषः। यथासोम्यकूतद्धाकश्चैत्वाकश्चित्कृपावान्प्रब्रूयात्। एतांदिशंअस्यांदिशिगंधारासंतिव्र
जयावहलमितिस्मरणात्। सतेनोपदिष्टात्ग्रामात्निर्गत्यापरंग्रामंपृच्छन्। पंडितः प्राज्ञः मेधावीस्मृति ७८
मान्। एवमेवेति अनाद्यविद्यादिशिरादिहितनिजानंदोजीवःसंसारेपतितःपरमेश्वरानुग्रहात् ज्ञातजिज्ञासोगु
रुपदेशेनलब्धाक्रमापन्नाश्रवणादीनिसाधनान्यनुष्ठायस्वजन्मभूमिंभगवंतंप्राप्नोतिसुंकंभ
वति। अवगतंसत्स्वशरीरेभगवदधीनत्वंजीवस्य। मानुषशरीरएवत्तोपदेशः स्थितः। पितोवाच। पुरुषसौम्योपतापि

ज्ञातयः पर्युपासते ज्ञानसि मां जानासि मामिति। तस्य यावन्न वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः
परस्यां देवतायां तावज्जानात्यथ यदास्य ज्वराद्युपतापिनं रोगिणं। पर्युपासते परित उपविशं तिष्ठन्ति वदन्तः संप
द्यते अस्य संसारो भवति। य एवं सर्वप्रेरकं महानुभावं भगवन्तं योऽन्तर्भेदेन जानाति यश्च स एवाहमस्मीति तयोः
कीदृशं फलमिति जिज्ञासायामाह पिता। पुरुषं सोम्येत्यादि। राजद्रव्येऽपगते सति शंकास्पदं पुरुषमान
यन्ति राजभटाः। अथ सपहार्षीदित्याहार्षीत्। पश्यतो हरत्वमपहारः। अन्यस्तेयं इति वदन्न इति शेषः। ततस्तेन
नेदं मयाकृतमित्युक्ते भटान् प्रति राजा वक्ति। परशुमस्मा अस्य परीक्षार्थं संगृहीतो यदि तस्यापहारादेः कृ
तमभिव्यवधं चनेति श्रुते। अनृतेऽभिसंधाभिसंधिरस्येति तथोक्तः। अन्तर्ध्यायाद्याघ। एवमेव खलु सोम्यायम्
वानिति। वाक्यस्थानान्तरस्थमपीदं सर्वत्र संबध्यत इति ज्ञापयितुमत्र पठितम्। एवं स्थानान्तरविवेकेऽपि भेद एव
दृष्टान्ता अभिहितास्तत्त्वे कोऽपि दृष्टान्तोऽभेदविषयोऽभिहितस्ततो नायमभेदोपदेशः इत्यर्थके। न हि वृणानि
नहीति। अल्पाक्षरमिदं स्यान्नियन्तृसाधकुनि सूत्रयोरिति साधु। अत्रत्यस्येति इत्यस्यापुनरुक्तलक्षणं। अपहार्षीद्द्रव्य
तस्य बंधाद्राज्ञापि। ऐक्यं नहि। किंतु भेद एव प्रसिद्ध इति शेषः। ननु नानावृक्षरसदृष्टान्ते नदीदृष्टान्ते यथा तत्र
